THE BOOK WAS DRENCHED

काव्यमाला ।

द्वादशो गुच्छकः ।

S 8 8
D95k
V XII

मु[illegible]यकः ।

UNIVERSAL
LIBRARY
OU_184443
UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY

Call No. S88/D95K Accession No. S 1270

Author दुर्गाप्रसाद तथा परब

Title काव्यमाला। 1938

This book should be returned on or before the date last marked below.

KAVYAMALA.

A collection of old and rare Sanskrit Kāvyas, Nāṭakas, Champūs, Bhāṇas, Prahasanas, Chhandas, Alañkāras &c.

Part XII.

EDITED BY

PAṆḌIT DURGĀPRASĀDA

AND

KĀS'ĪNĀTH PĀṆḌURANG PARAB.

SECOND EDITION.

PUBLISHED BY

PĀNDURANG JĀWAJI,

PROPRIETOR 'NIRṆAYA SĀGAR' PRESS,

BOMBAY.

1938.

[All rights reserved by the publisher.]

Publisher:-Pandurang Jawaji, } Nirnaya Sagar Press,
Printer:-Ramchandra Yesu Shedge, } 26-28, Kolbhat Street, Bombay.

॥ श्रीः ॥

काव्यमाला

नाम

नानाविधप्राचीनकाव्यनाटकचम्पूभाणप्रहसन-
च्छन्दोलंकारादिसाहित्यग्रन्थानां
संग्रहः ।

द्वादशो गुच्छकः ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितः ।

द्वितीयं संस्करणम् ।

स च

मुम्बय्यां

पाण्डुरङ्ग जावजी इत्येतैः,

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्राकाश्यं नीतः ।

शाकः १८६०, ख्रिस्ताब्दः १९३८.

मूल्य[illegible] [illegible]कः ।

अनुक्रमणिका ।

१. श्रीरामभद्रदीक्षितविरचितो रामचापस्तवः १–२०

२. श्रीरामभद्रदीक्षितविरचितो रामबाणस्तवः २०–४२

३. कविवरनरहरिविरचितं शृङ्गारशतकम् ४२–६०

४. उत्प्रेक्षावल्लभकविविरचितं भिक्षाटनकाव्यम् ६१–१६१

काव्यमाला ।

श्रीरामभद्रदीक्षितविरचितो

रामचापस्तवः ।

यन्मूलो रघुनन्दनस्य जगतां त्रातेति कीर्त्यङ्कुरो
देवी चार्चति जानकी सविनयं यद्गन्धपुष्पाक्षतैः ।
यत्कोट्या कृतलाञ्छनश्च जलधौ सेतुर्जगत्पावनो
भद्रायास्तु जगत्त्रयस्तुतिपदं तद्राघवीयं धनुः ॥ १ ॥

यः शत्रुंजयकुञ्जरेश्वरशिरःसंघट्टनाकर्कशो
वैदेहीकुचकुम्भपत्रमकरीविन्यासवैज्ञानिके ।
चञ्चत्पञ्चवटीकुटीरजटिलव्यूहाय दत्ताभये
पाणौ कौणपवैरिणो विजयते चापाय तस्मै नमः ॥ २ ॥

दारुण्यप्यवलम्बिते कृतवतः साकेतराज्यश्रियं
केलिन्यासविधूतगौतमवधूदुःशीलमूलैनसः ।
पादस्याक्रमणेन पूतमसकृत्कोटौ गुणारोपणे
चापं[1] चन्द्रवतंसचापमथितुर्देवस्य सेवामहे ॥ ३ ॥

मद्रक्षाकथनेच्छयेव गतया देवस्य कर्णान्तिकं
मौर्व्या मार्गणपक्षपातघटनापारीणया संगतम् ।
कोटौ चामरहेमभूषणमिषात्कीर्तिप्रतापाङ्कुरौ
बिभ्राणं करवाणि रावणरिपोश्चापं शरण्यं प्रभोः ॥ ४ ॥

---

१. " तं बाणासनमीशचाप " इति पाठान्तरम्.

लब्धोन्मेषविशेषभीषणशिखिज्वालाजटालेक्षण-
श्लिष्टाभ्यन्तररुष्टरुद्रनिटिलस्निग्धं विशुद्ध्यै गिराम् ।
अन्तः संततकाञ्चनाञ्चितशरश्रीमञ्जरीपिञ्जरी-
भूतं भातु पुरः कबन्धमथितुर्ज्याबन्धवामं धनुः ॥ ५ ॥
कल्याणं वितनोतु नः करुणया काकुत्स्थचूडामणे-
श्चापः कोपदुरापरुद्रविकटभ्रूवल्लरीविभ्रमः ।
यत्रोद्घाटितनैटिलेक्षणपुटप्रोद्दामधूमध्वज-
ज्वालावल्लिविडम्बडम्बरमथत्यापिञ्जरा शिञ्जिनी ॥ ६ ॥
कर्षद्दक्षिणपाणिलग्नसशरज्यावल्लिचक्रीकृतं
गृह्णद्दामकराङ्गुलीयकमणिच्छायोल्लसल्लस्तकम्[1] ।
संरब्धस्य निषेदुषो रघुपतेरालीढ[2]भङ्ग्या रणे
धावद्राक्षससैनिकाक्षिविषयं क्षेमाय चापं भजे ॥ ७ ॥
भास्वच्चन्द्रकलाग्रमाशरकुलासृग्लोहिताङ्गं बुध-
ध्येयं चित्रशिखण्डजातघटितं वाल्मीकिकाव्यस्तुतम् ।
मन्दस्यापि मतिप्रदं प्रणमतो बाणं रणे बिभ्रते
श्रीरामस्य शरासनाय शिरसि न्यस्ये नमस्याञ्जलिम् ॥ ८ ॥
भद्रं यच्छति पापमत्ति भणितिं दत्ते यशः पुष्यति
प्रागल्भ्यं विवृणोति तस्य नुवति स्वं यो नरः सूक्तिभिः ।
यो देवान्निरुणद्धि विप्रकुरुते विप्रान्निगृह्णाति तं
चापं दाशरथेरिति श्रुतवता संसेव्यते तन्मया ॥ ९ ॥
आस्तामिन्द्रयमादिदिक्पतिकुलं तिष्ठन्तु देवास्त्रयो
देवो वा रघुनन्दनो विहरतु स्वैरं समं सीतया ।

---

१. धनुर्मध्यम्. २. अवस्थानविशेषः.

अस्माकं तु शरण्यमस्ति परमं तत्किंचन प्राणिनां
कोटिस्पृष्टपयोधिसेतुसलिलैरेनः पुनानं धनुः ॥ १० ॥
अन्ये केलिगृहीतकालियफणारङ्गस्थलीनर्तन-
क्रीडामर्दलवाद्यहृद्ययमुनाकल्लोलकोलाहले ।
देवे प्रेम वहन्त्वहं तु कुतुकी काकुत्स्थहस्तद्वयी-
रङ्गोत्सङ्गनटे धनुष्यरिभटाक्रन्दोरुभेरीरवे ॥ ११ ॥
कालव्यालकपालजालघटितस्रग्भारघोरं परे
रुद्रं भद्रतृषाविषादकृतधीलोपा वृथोपासताम् ।
श्रीमच्चामरबद्धमृद्धसुषुमज्यावल्लिकावेल्लितं
दध्यां बुद्धिमहं तु राक्षसचमूहन्तुः प्रणन्तु धनुः ॥ १२ ॥
धावंधावमबन्धगन्धगजवद्विन्ध्याद्रिवन्ध्याटवी-
कल्पेऽप्यत्र जगत्त्रये सर इव स्नातुं ममेदं मनः ।
नन्वन्विष्यति धन्व मन्वभिजनोत्तंसस्य हंसच्छद-
स्वच्छोद्यच्छदभीशुपेशलशिरोबद्धोच्चलच्चामरम् ॥ १३ ॥
धर्मं निर्मलमाप्नुयामिति तथा विन्देय मन्देतरा-
नर्थानित्यहमत्यये दिवि वधूर्भुञ्जीय मञ्जूरिति ।
ब्रह्मानन्दसुधाविधायिनि मम प्राचां प्रवाचामपि
ध्यातव्ये रघुनन्दनस्य धनुषि त्रेधा मनो धावति ॥ १४ ॥
नाहं यष्टुमलं भवामि न घटे दातुं धनान्यर्थिनां
का शक्तिर्मम दृश्यते तपसितुं दुर्निग्रहे मानसे ।
आत्मज्ञानमवाप्नुयामिति तथाप्याराधयेयं गिरा
वाराशिस्मयघस्मरास्त्रमहसो वीरस्य सारं धनुः ॥ १५ ॥
मातुर्गर्भकुटीरमर्भकतनुः संप्राप्य कं प्रायशो
नो जन्मानि कियन्त्यगाहिषि कियद्दुःखं च नाज्ञासिषम् ।

दिष्ट्या संप्रति जायते मम नृणां जन्मात्ययध्वंसने
चापे चन्द्रवतंसचापमथितुर्देवस्य भावः स्थिरः ॥ १६ ॥
वल्गन्मन्दरशैलमूलमुखरक्षीरोदपूरोदर-
क्षिप्रानर्गलनिर्गलन्नवसुधामाधुर्यधुर्या गिरः ।
निर्गच्छन्तु निसर्गवेगविधुतस्वर्लोककल्लोलिनी-
गर्वाः शर्वधनुर्विमर्दनधनुःस्तोत्राय वक्त्रान्मम ॥ १७ ॥
कालोन्मीलदमन्दकुन्दमुकुलस्पर्धानिबद्धादर-
प्रौढोदारपरप्रबन्धरचनापाण्डित्यनार्डिधमम् ।
अस्तु प्रस्तुतदुर्घटस्वमहिमस्तोत्रस्य मे त्रस्यतः
खेदच्छेदकृतादरं भगवतश्चापं रुचा बन्धुरम् ॥ १८ ॥
गौरीतातगिरीशमञ्जुलदरीकेलीधुरीणामरी-
वीणोरीकृतवैखरीमधुझरीपारीणरीतिक्रमम् ।
मारीचारिधनुः सरीसृपपुरीनारीजनैरीडितं
सारीकृत्य सरीसरीतु हृदि मे भूरीर्वचोमञ्जरीः ॥ १९ ॥
चित्रस्वीयचरित्रचिन्तनसुधाकृष्टाय शुश्रूषवे
मह्यं स्निह्यतु दातुमुक्तिमवनीपुत्रीशमित्रं धनुः ।
श्लाघान्दोलितचन्द्रचूडमकुटीविभ्राम्यदभ्रापगा-
पाथःपातगृहीतगर्वगिरिजानेत्रान्तपात्रीकृताम् ॥ २० ॥
पापार्थस्मरणेन जातु जनितं पापं कृपापक्ष्मलो
गौरीकान्तशरासनान्तकधनुर्दूरीकरोतु स्मृतः ।
नैवं चेत्कथमेष भीषणदवज्वालाकरालाटवी-
विक्राम्यद्भवचक्रनिग्रहविधौ प्रागल्भ्यमभ्येतु मे ॥ २१ ॥
शस्त्राचार्यभुजंगभूषणधनुर्भङ्गप्रसङ्गश्रव-
प्रादुर्भूतलग्नः कराङ्कुगुपतेर्यङ्कृहति श्रेयसि ।

ईर्ष्यारोषकषायिता दरदलत्कह्लारगर्भश्रियो
जानक्या निहिता दृशो हृदि वयं तत्कार्मुकं कुर्महे ॥२२॥

सङ्घीभूय कुतूहलेन गगने स्थित्वा मुहुः पश्यतां
संतानद्रुमपुष्पवृष्टय इव स्वर्गौकसां दृष्टयः ।
यत्र क्षत्रियकण्ठलाविपरशोर्वीरादुपात्तेऽपत-
न्कुर्यामुत्तरकोसलेन्द्रधनुषे तस्मै प्रणामाञ्जलिम् ॥ २३ ॥

हेलाकालमुहुर्गृहीतकमलाचेलान्तदृश्यस्तन-
श्रीखण्डद्रवमुद्रिताच्युतकरस्पर्शस्फुरत्सौरभम् ।
शश्वद्भुष्प्रतिलम्भसंभवमनःशर्मण्यधर्मे मम
श्रावण्यं प्रणुदेद्विदेहतनयापाणेशबाणासनम् ॥ २४ ॥

त्रासोत्क्रान्तशकुन्तसंततिजवव्याधूतचूताटवी-
शाखाशेखरमञ्जरीपरिगलन्माध्वीनिषिक्ताध्वानं ।
गोदावर्युपकण्ठसीम्नि कुहनागोकर्णहत्यै गुणं
यस्यारीरणदीश्वरो रघुभुवां तद्धन्व मन्ये गतिम् ॥ २५ ॥

पश्चात्पश्यति बाणपातचकिते शश्वन्निवृत्त्याननं
विद्राणे कुहनामृगे विकिरितुं बाणो यदारोपितः ।
देवेन श्रवणान्तकृष्टकपिलज्यावल्लि तत्कार्मुकं
केकागर्भितकण्ठकाननशिखिप्रेक्षापदं पातु नः ॥ २६ ॥

वेगभ्रंशितवृक्षनीडविहगव्यागीर्णविद्रावित-
क्रीडद्रोहितपङ्क्ति दर्भकवलव्यावृत्तमत्तद्विपम् ।
द्रागुत्थापितसुप्तकेसरि जनस्थाने खरायोधने
ज्याघोषं जहति प्रभोर्धनुषि मे चेतो मुहुर्धावति ॥ २७ ॥

वीर्योत्सिक्तखरप्रयुक्तसमरप्रक्रान्तचक्रभ्रमी-
चञ्चत्काञ्चनपञ्जरोदरचरश्रीरामकीरार्भके ।

धावत्येव मनो विनोदरसिकं दिक्षु प्रविक्षिप्तया
विष्वग्घट्टितहेमपट्टकपिशे चापे रुचा पेशले ॥ २८ ॥
त्रासोल्लासविलोललोचननदीपर्यन्तनिर्यन्मृगी-
घासग्रासनिरासशासनगिरा ज्यागर्जितेनोर्जिते ।
कीशाधीशविनाशसाशयशरव्यामोक्षभीमोद्यमे
श्रीमद्रामशरासने सरति मे भद्राय भद्रा मतिः ॥ २९ ॥
तद्दिग्भागनिविष्टदृष्टिमचिरव्यापन्नदोर्विक्रमं
चेतःस्फीतभयप्ररोहमुदितप्रत्यङ्गरोमोद्गमम् ।
उद्यद्गद्गदकण्ठनादमुरसि द्राङ्न्यस्ततीक्ष्णाशुगं
कुर्वद्वालिनमाहवे भगवता कृष्टज्यमीडे धनुः ॥ ३० ॥
चञ्चच्चामरदामरश्मिहसितैर्व्याप्तोदरौदन्वत-
त्वङ्गत्तुङ्गतरङ्गगर्वगरिमप्रध्वंससंसूचनम् ।
कोदण्डं कलिखण्डनाय कलये रामस्य भीमस्य त-
त्क्षिप्तोद्दीप्तशराग्रजाग्रदनलज्वालाकरालाम्बरम् ॥ ३१ ॥
यन्मौर्व्यामिषुमोचनाय जलधावास्फालितायां प्रभो-
रङ्गुल्या चिरकालविस्मृतमहीकन्याकुचस्पर्शया ।
टङ्कारो निरुणद्धि कर्णविवराण्यन्यानि दिग्दन्तिनां
शुण्डादण्डमुखेन गाढपिहितात्तन्मे शरण्यं धनुः ॥ ३२ ॥
वेलाशैलगुहाविहारिवनकर्यादानमोदाकुल-
क्रामद्भीमविलासकेसरिमुखव्याकर्षणैकक्षमम् ।
तारज्यारवमुद्गमद्रचयितुं भव्यं शरव्यं पयो-
राशिं मे शिवलम्भकं भवतु तद्देवस्य तावद्धनुः ॥ ३३ ॥
कालीयानकरालकण्ठनिनदन्यक्कारलीलासख-
ज्याकर्षस्तनितातिगन्धचकितक्रन्दद्दिशादन्तिनि ।

गर्जन्निर्झरिणीशतर्जनदशानिर्यच्छ रे धीरियं
सीताकान्तकरान्तकेलिसदने काण्डासने खेलति ॥ ३४ ॥

पारावारतटीकुटीरविटपिस्त्यायत्कुलायस्थित-
श्येनोड्डीनविधानकेलिरसिकज्याघोषणाघोरया ।
वारिप्रेरितसायकायतशिखाचक्रत्रुटन्नक्रया
भास्वद्वंशवतंसचापलतया नूनं मनो नन्दात ॥ ३५ ॥

वन्दे कार्मुकमीशकार्मुकभिदो वीरस्य यस्मिन्रुषा
कल्पान्तानलकल्पमब्धिहतये बाणाग्निमुन्मुञ्चति ।
कन्थादाहधिया करेण ममृशे चूडानदी शंभुना
पीठप्लोषविशङ्किना च विधिना स्पृष्टा पयःकुण्डिका ॥३६॥

ज्यामौखर्यविदार्यमाणदराद्रूपर्यन्तगिर्यन्तरं
स्थैर्यौदार्यनिवार्यमेरुमदमत्यैश्वर्यकार्यर्थिनाम् ।
पर्यन्तार्णववार्यजीर्यदिषुचर्याश्चर्यधुर्यं नम-
स्कुर्यामर्यमवंशजार्यकरयोः पर्यायधार्यं धनुः ॥ ३७ ॥

ज्याविद्धेषुसमिद्धपावकशिखासंनद्धगाढोद्धत-
क्रीडद्वाडवपीडनाचटचटाकुर्वाणसर्वाण्डजात् ।
अब्धेर्लब्धतरङ्गमङ्गलमृदङ्गारावधारावता-
त्सीतावल्लभचापवल्लिरुदयल्लीलामतल्लीसखी ॥ ३८ ॥

मौर्वीविद्धशराग्निदग्धकमठीपाठीनगाढोल्लुठ-
त्कल्लोलोद्भटपूरपूरणरणत्पर्यन्तगिर्यन्तरे ।
अप्रासप्रतिबिम्बडम्बरवपुःसिन्धौ कबन्धद्विषः
कोदण्डं गुणमण्डितं मम शुचः स्यात्खण्डने पण्डितम् ॥३९॥

ज्याविक्षिप्तपृषत्कवल्गदनलक्काथोद्भवद्बुद्बुद-
क्षारक्षीरविपाचिताचिततिमिक्रव्यग्रहव्यग्रया ।

त्रासत्यक्तनिवासमब्धिजठराद्दूरे वधूरेखया
शार्ङ्गं कैकसलोकमाकलितवद्देवस्य सेवे धनुः ॥ ४० ॥
लङ्कातङ्कविशङ्किशंकरगिरिप्रक्षोभिरक्षोऽभितो-
निक्षिप्ताप्तनिशाटपाटनपटुस्फोटप्लवङ्गच्छटे ।
विष्वग्विष्वणदिष्वरिष्ववतरज्जन्ये रजन्येधिते
मन्ये धन्व शमन्ययाय(?) हृदये मान्यस्य धन्विप्रभोः ॥४१॥
नन्दन्निर्जरवृन्दमुक्तकुसुमैः सुग्रीवविग्रीकृत-
प्रक्रान्ताहवकुम्भकर्णदुरवापामन्दगन्धग्रहैः ।
सामोदं मनसा मनूद्वहधनुर्ज्याटंक्रियान्धोरग-
द्वन्द्वान्योन्यदुरीक्षकेलिविरसाधोलोकमालोकये ॥ ४२ ॥
सक्रोधप्लवगाग्रणीनखरदश्रेणीनिकृत्तश्रवो-
नासत्रासदकुम्भकर्णवदनव्यालोककालोचितम् ।
कर्तुं योऽक्षिसहस्रमीलनमलं नासीत्तदा सीदत-
स्तस्येन्द्रस्य मनोरथप्रदशरं चापं प्रभोश्चिन्तये ॥ ४३ ॥
हेषामश्वगणस्य बृंहितमिभव्यूहस्य चक्रक्रम-
त्कारं रथमण्डलस्य समरे क्ष्वेलां भटानामपि ।
भेरीभांकृतिमायुधव्यतिकरध्वानं पृथङ्मागध-
स्तोत्रोद्घोषमपि ज्यया परिभवद्देवस्य वन्दे धनुः ॥ ४४ ॥
एकं देहभृतामुमे हुतभुजस्त्रीण्यामयानां प्रभो-
श्चत्वारि द्रुहिणस्य पञ्च विषमापाङ्गस्य षट् शाङ्करेः ।
सप्त त्रीणि च रावणस्य फणिनां पत्युः सहस्रं तुद-
ज्ज्यानादेन शिरांसि संयति धनुर्यादुद्वहः पातु नः ॥४५॥
शार्ङ्गं स्मारय चाण्डिकं विकलय ब्राह्मं समुत्सारय
स्कान्दं नर्तय यानमित्यधिरणं मल्कीडति ज्यास्वनैः ।

तूर्णं विस्मितसिद्धचारणगणप्रस्तूयमानस्तव-
व्याप्ताशेषदिशे नमोऽस्तु धनुषे सप्ताश्ववंशप्रभोः ॥ ४६ ॥
नश्यन्निद्रमहापुमांसि नटनक्रीडाचलत्कौश्वभि-
द्वाहाश्वत्तनुरुंहि क्षुम्भदमनायानाहितक्रुन्धि च ।
सीदत्कुम्भिककुम्भि सिद्धपरिरम्भारम्भियोषिन्ति खे
कुर्वाणं गुणटंकृतानि समरे कोदण्डमीडे विभोः ॥ ४७ ॥
यन्मौर्वीनिनदे निरुन्धति युधि द्यावापृथिव्यन्तरं
दृग्भिर्द्वादशभिर्विलोक्य शिखिनो यानस्य नृत्तं पुनः ।
षड्भिः स्तौति गुहो मुखैः प्रियतमापर्यायपीताधरैः
सीतान्तःपुरधन्व तन्मृडजटाशीतांशुवक्रं भजे ॥ ४८ ॥
स्वं पाशाङ्कुशदन्तमोदकधृतौ दोष्णां चतुष्कं दिश-
न्हेरम्बो निजवल्लभामभिमृशन्काञ्चीपदे शुण्डया ।
कर्णौ च्छादयितुं विषीदति चिराद्दोरन्तरासंभवा-
द्यज्ज्याघोषविजृम्भणे युधि धनुस्तद्राघवीयं भजे ॥ ४९ ॥
यद्धोषप्रथमप्रबोधितरमाप्राणेशवामेक्षण-
च्छायामीलितनाभिपङ्कजकुटीगर्भस्थितोऽप्यब्जभूः ।
कर्णैरष्टभिरात्मनोऽप्यकलितामेवाध्यगीष्ट त्रयीं
नद्धं तेन गुणेन राघवधनुर्विद्येत हृद्येव नः ॥ ५० ॥
कल्पापायवितर्ककर्कशहरव्यामुक्तभीमध्वनि-
व्यामृष्टान्तरविन्ध्यकन्दरशिलाविष्टब्धदुष्टद्विपम् ।
ज्याघोषक्षणमक्षिपत्किल विपर्यस्य त्रसद्भारती-
जिह्वात्यागगृहीतकण्ठवसतिस्तद्रामचापं भजे ॥ ५१ ॥
कल्पान्तक्षणबद्धकौतुककरप्रस्फालितोरूत्पत-
द्भर्गोन्मुक्तमहाट्टहासपरुषज्याघोषविप्रोषिते ।

स्वापे शार्ङ्गभृतः सुखेन वहता लम्बीभवन्ती तनुं
चक्रीन्द्रेण कृतस्तवं युधि विभोश्चापं शरण्यं मम ॥ ५२ ॥
संवर्तव्यतिषङ्गभङ्गुरकृपभ्रूभङ्गगङ्गाधर-
क्ष्वेडाचण्डिमगर्वखण्डननिजज्यानाददीनात्मनि ।
व्यालेन्द्रस्य दृशां सहस्रयुगले पातालवास्तव्यया
प्रस्ताव्यस्तवविस्तरं जनतया नाथस्य चापं भजे ॥ ५३ ॥
काकुत्स्थस्य धनुस्तदेव कलये गर्जासृजा यज्ज्यया
बाधिर्ये भुवनत्रयस्य जनिते का मेऽस्तु का मेऽस्त्विति ।
बाणोत्खण्डितयातुवीरसुरवाग्गुम्भेन मामेहि मा-
मेहीत्यप्सरसां वचांसि च समं कुण्ठीभवन्ति द्यवि ॥ ५४ ॥
अव्याद्व्ययदीव्यदाशुगजवव्याधूतदिव्यापगा-
नव्याब्जव्यवसृतभव्यमधुपव्याजाभ्रसेव्याम्बरम् ।
क्रव्याद्व्यथनोत्थनाव्यरुधिरव्याप्ताजि कव्युक्तिभि-
र्व्यङ्क्तव्यश्र्यपसव्यसव्यभगवत्पाणिव्यवस्थं धनुः ॥ ५५ ॥
दुर्लङ्घाशरसङ्गसङ्गरपरिक्रामद्धनूमल्लल-
ल्लाङ्गूलाग्रनियन्त्रितप्रतिभटक्रव्याद्रोदध्वनिः ।
यज्ज्यागर्जितपूर्णकर्णविवरैर्नोमानि वैमानिकैः
शर्मार्थं नमिकर्म धार्मिकविभोस्तत्कुर्महे कार्मुकम् ॥ ५६ ॥
खड्गान्पातयतः शरान्विकिरतः शक्तीस्तनौ मुञ्चतः
पद्भ्यां मृद्नति मुष्टिना घ्नति तलेनाविध्यति द्वेषिणः ।
उत्साहं जनयत्प्रभञ्जनसुते तत्साधु भूयो रणे
ज्यानादैः रघुनाथकार्मुकवरं शर्माणि निर्मातु नः ॥ ५७ ॥

---

१. नावा तार्य. २. कवीनामुक्तिभिर्व्यङ्क्त्या श्रीर्यस्य तत् इत्यर्थः.

एकद्व्यान्वपुषा दृशा त्रिचतुरान्पादाहतैः पञ्चषा-
न्सप्ताष्टान्करताडनैर्नवदशाञ्जानुप्रहारैररीन् ।
युद्धे द्रावयता कृतं हनुमता चण्डाट्टहासध्वनिं
ज्यानादेन विवर्धयद्रघुपतेश्चापं भजे संपदे ॥ ५८ ॥
आढ्यंभावुकमर्चिषा सरभसान्धंभावुकारातिना
स्थूलंभावुकहर्षवानरचमूदृष्टिप्रियंभावुकम् ।
तत्पायाद्धनुरुत्पतिष्णुविशिखं वर्धिष्णुघण्टारवं
रोचिष्णुज्यमलंकरिष्णु समरं वर्तिष्णु हस्ते विभोः ॥५९॥
कालीकेलिकरालमांसलरणक्ष्माधूलिपालीजल-
क्ष्वेलापेतवलीमुखालिकवलीकालिव्यलीकच्छिदम् ।
खेलन्तं गलदर्यरालकुरलाधारालटक्कज्जलं
कालव्यालकुलीनकालियनिभं चापं विभोः शीलये ॥६०॥
द्राङ्निश्चूषितरक्तबीजरुधिरप्राग्भारधारामिल-
च्चामुण्डामुखमण्डलोदरचलज्जिह्वालताह्वायिना ।
विद्धारिव्रजविस्रविस्रवदसृग्व्याप्तेन दीप्तौजसा
चापः साभरणः शरेण स रणे पायादपायात्प्रभोः ॥ ६१ ॥
यत्क्षिप्तैरिषुभिर्गृहीतशिरसामायोधने रक्षसां
सद्यः स्वर्गमुपेयुषां सुरवधूतुङ्गस्तनालिङ्गिनाम् ।
वाग्भिर्मन्मथकेलिगद्गदगिरां प्राचीनवैरत्यचां
प्रक्रान्तस्तुति मे चकास्तु हृदये तद्राघवीयं धनुः ॥ ६२ ॥
स्वर्गस्त्रीग्रहणाद्भयं विदधिरे ये यातुधानाः पुरा
तैरेव स्वविमुक्तबाणदलितग्रीवैर्दिवं प्रापितैः ।
स्वैरं हारयदप्यसत्यर्युवतीरेषा ममैषाममे-
त्यारब्धस्तुति हृष्यता बलजिता तद्रामचापं भजे ॥ ६३ ॥

रोषश्लेषखराक्षराक्षसचमूपादातदातद्रुत-
क्रोशत्कीशभयापयापनपटुज्याघोषघोषद्दिशम् ।
चापं तापनिविष्टविष्टपमनःशोकान्तकान्तक्रियं
रक्षत्वक्षकुमारमारणमहादूतस्य धन्विप्रभोः ॥ ६४ ॥

नाराचक्षतयातुवीरवरणव्यापारिपौरंदर-
स्थानस्त्रीजननिस्तलस्तनतटीपाटीररेणूत्करैः ।
अस्यद्भिः शिशिरांशुरश्मिभिरिव स्फारश्रमीवारितै-
रप्राप्तपाटनि ताटकारिपुधनुः पापानि मे पाटयेत् ॥ ६५ ॥

भक्षालम्पटकङ्कसङ्घचटुलत्रोटीविघट्टत्त्रुट-
द्रक्षःकोटिकरोटिकोटिररटितप्रोद्घाटितक्रूरते ।
युद्धे विद्रुपतद्भयद्विपतनूविस्रंसिविस्रामिषा-
कृष्टक्रोष्टुनि विष्टपत्रयपतेः क्रीडत्तदीडे धनुः ॥ ६६ ॥

घण्टाचण्डनिनादमण्डितनिजज्यानादनानादल-
द्व्योमस्थेमविधायकायतकुशीनीकाशनैकाशुगम् ।
चापं तापविलोपदायि भजतां ध्यायामि मायामृग-
प्राणप्रीणितबाणरिङ्खणगुणालंकारि लङ्कारिपोः ॥ ६७ ॥

हस्ते दाशरथेर्दिशो गुणरवैर्भक्ताय भद्रं द्विषा-
माटोपं मरुतां भयं हरिचमूं जेतुं रणे वैरिणः ।
भाति भ्राति ददाति दाति हरति प्रीणाति जानाति य-
त्तद्वाञ्छामि च पूजयामि च धनुर्ध्यायामि च स्तौमि च ॥६८॥

चक्षुर्लक्षितलोकरक्षि तरुणाक्षीवामरैणेक्षणा-

---

१. 'वर्तुलं निस्तलं वृत्तम्' इत्यमरः. २. स्थामन्शब्दो नास्तीति केचित्. तन्मते स्थेमेति पाठः.

द्राक्षेक्षुद्रवमाक्षिकाक्षिपवचःसंधुक्ष्यमाणस्तवम् ।
अक्षीणाक्षमराक्षसक्षयविधारूक्षेषुविक्षेपणं
स्यादैक्ष्वाकऋभुक्षपक्ष्यमशुभक्षोदैकदक्षं धनुः ॥ ६९ ॥

अक्षुभ्यन्मरुदक्षिवीक्षितरणक्षीबर्क्षकीशाक्षय-
क्ष्वेडाधुक्षणदक्षिणक्रियमृभुक्ष्यस्त्रेण भिक्ष्योपमम् ।
रक्षस्तक्षणशिक्षणक्षमशरक्षेपक्षरज्ज्यास्वन-
क्षुण्णक्षेमफणीन्द्रचक्षुरवतादैक्ष्वाकपक्ष्यं धनुः ॥ ७० ॥

कान्त्या क्षेपयतीन्द्रकार्मुकमदं मन्दांश्च सेनाहरी-
ज्ज्याघोषेण दुरासदं प्रथयति स्वां रक्षसां च व्यथाम् ।
बाणं प्रापयति द्विषो यदपि तान्स्ववीरवामभ्रुवां
संग्रामे तदुमेशचापमथितुश्चापं शुभायास्तु नः ॥ ७१ ॥

वन्दे मन्दरशैलकन्दरकुटीवास्तव्यजायापति-
श्रद्धाभक्तिकृताभिधाजपविधेरीशस्य शस्यं धनुः ।
यज्ज्यारावभरावकर्णनदशासातङ्कलङ्कावधू-
गर्भस्रावहृतास्रवासववधूबन्दीपुरन्ध्रीनुतम् ॥ ७२ ॥

तन्वानन्तरशिञ्जिनीरवकिरा शक्रायुधस्य भ्रमं
तन्वानं दिवि देवदानवततेरालोकयन्त्या रणम् ।
मन्वानं शरणार्थिनामभिमतं यच्छ्रेयमित्यन्वहं
मन्वानन्त्यवदन्वयोदधिमणेरन्वेमि धन्वेशितुः ॥ ७३ ॥

---

१. क्षेपयति निरासयति; अन्यत्र क्षिप्रान्करोति. २. प्रथयति कथयति; अन्यत्र पृथुं करोति. ३. प्रापयति गमयति; अन्यत्र प्रियान्करोति. ४. तन्वा मूर्त्या, अनन्तरान् निबिडान्, शिञ्जिनीरवान् किरन्त्या. ५. मनोः राज्ञः आनन्त्यवान् अन्वयः.

पाणिच्छादितकर्णपत्ति भयभृत्सूतावसीदद्रथं
दूरभ्रान्ततुरङ्गमङ्कुशशिखादुर्वारवेगद्विपम्।
लङ्कानाथवरूथिनीं विकलयत्तारेण घोरेण च
ज्यानादेन रणे धनुर्भगवतो जागर्तु भद्राय नः॥ ७४॥
सक्रोधं दशकन्धरेण सभयं रक्षोभटानां गणैः
साश्चर्यं कपिसैनिकैः सकुतुकं गन्धर्वविद्याधरैः।
सश्लाघं च विभीषणेन सजयाशंसं च सौमित्रिणा
दृष्टं शक्रसुतद्विषा युधि धनुर्विस्फार्यमाणं भजे॥ ७५॥
कालीयप्रतिवंशविंशतिभुजालंकारलङ्कापुरी-
नाथक्रोधनिरोधसाधनकलाधौरेयधीरध्वनि।
जीवा यस्य वयस्यतामुपगतैवायस्यतो रक्षसां
शिक्षायै कलुषक्षयाय भवतात्तद्रामचापं मम॥ ७६॥
युद्धे यद्गुणघोषणानिशमनप्रोन्मीलदीर्ष्यामिथः-
श्लिष्यद्दन्तपरम्पराकटकटाकारातिघोरैर्मुखैः।
पौलस्त्ये दशभिः प्रदर्शितवति क्रोधं वरे धन्विनां
श्लाघ्यस्यामुमुदे रिपोरुपगमात्तच्चापमर्च्यं मम॥ ७७॥
प्रत्यग्रप्रणयापराधसमयानानन्दमन्दोदरी-
पादाम्भोरुहताडनैरपि सुखाकुर्वद्भिरप्रस्तुतान्।
कुर्वद्दर्वितराक्षसेश्वरशिरःस्तोमान्निरस्तोपमा-
ञ्ज्यावल्लिस्तनितेन राघवधनुर्धूनोतु दैन्यं मम॥ ७८॥
मा युद्धे प्रवृतो मदुज्झितशरैर्मा तेऽसवो विस्रस-
न्मा रुद्धं हृदि विस्रभः शरणितं मा ते रुचज्ज्वाल्मता।
इत्याह्वेव दशास्यमाहवमहीवास्तव्यमस्तव्यय-
ज्यानादेन यदानयेदभिमतं तद्रामभद्रायुधम्॥ ७९॥

स्यादैक्ष्वाकसमीकमित्रमसखं चापं मम श्रेयसे
यस्य ज्यानिनदस्तनूकृतदशग्रीवाट्टहासो रणे ।
लङ्कोद्याननिरुद्धमुग्धवसुधाकन्याकपोलस्थली-
रोमाञ्चव्यतिषङ्गमङ्गलसमारम्भैकभेरीरवः ॥ ८० ॥

कुप्यन्मातलिमुन्नवाहनवहत्संक्रन्दनस्यन्दना-
क्रामञ्चक्रसमुत्थभूमिरजसामोघेन मोघा दृशः ।
बिभ्राणस्य दशाननस्य बधिरीभावं श्रवोविंशतौ
कुर्वज्ज्यारसितेन कोसलपतेः कोदण्डमीडे रणे ॥ ८१ ॥

कल्पान्तोद्भटचण्डमारुतजवप्राग्भारसंघट्टन-
क्षुभ्यन्नीरदगर्भनिर्भरमिलन्निर्घोषघोरश्रुतिम् ।
ज्यानादं निशमय्य यस्य विवशश्चक्राम मन्दोदरी-
कान्तः शान्तमदो मृधे स जगतां नेतुर्धनुः पातु नः ॥८२॥

वैरिक्षारितशक्रविक्रमकथानीशानदाशानन-
श्लाघालाघवखिन्नकिन्नरवधूहर्षप्रकर्षप्रदम् ।
घोरज्यारसितेन मानवपतेः कुर्वे धनुर्वेधसा
गेयं सायकभूषमेष मनसि क्षेमाय भीमायतम् ॥ ८३ ॥

लङ्कानाथनिमाथनाथनविधापर्यायपर्याप्त-
द्गीर्वाणीमुखवाद्यवाद्यपटुतादुर्वारमौर्वीरवम् ।
वक्रप्रक्रमदुष्टदिष्टदमनं शक्रायुधप्रक्रिया-
निष्णातं रघुमल्लवल्लभधनुर्मुष्णातु तृष्णां मम ॥ ८४ ॥

मौर्वीकर्षणमण्डलीकृतिवशादुर्वीकुमारीपतेः
प्रासायाम्बररत्नबिम्बतुलनां सङ्ग्रामरङ्गाङ्गणे ।
दुर्दान्ताशरनाथदुर्दमभुजावीर्याम्बुसंशोषणीं
नाराचद्युतिमञ्जरीं विकिरते चापाय तस्मै नमः ॥ ८५ ॥

चेतश्चातकपोतकल्पचलितानल्पामरालोकित-
श्रीमद्रामशरीरनीरदशचीनाथायुधे धन्वनि ।
पङ्क्तिस्कन्धशरप्रबन्धदलनाधौरंधरीबन्धुर-
ज्याविद्धेषुविमर्ददुर्दिनहरिच्चक्रे मम क्रीडति ॥ ८६ ॥
दृप्यद्राक्षसराजविंशतिभुजीराजीवनालावली-
लावार्धेन्दुमुखेषुमोचनविधिव्याकृष्टमौर्वीरवे ।
रन्ध्रं रुन्धति खस्य भिन्दति भृशं कुम्भांश्च दिक्कुम्भिनां
तुष्टास्तुष्टुविरे पुरायममरास्तं नौमि चापं विभोः ॥ ८७ ॥
चण्डीनाथबलीकृतानि चटुलभ्रूवल्लरीकिंकरी-
भूतामर्त्यकुलानि मृत्युविमुखीकाराट्टहासानि च ।
नाराचेन निराचिकीर्षु समरे शीर्षाणि लङ्कापते-
र्मारीचारिकराब्जचारि महता भावेन सेवे धनुः ॥ ८८ ॥
कल्पान्तोद्भटकालरुद्रवदनव्यादानकेलिस्फुर-
द्दंष्ट्राविक्रमगौरवक्रमगलग्राही जिताहीनिषून् ।
मुञ्चन्पञ्चशरार्तिकीर्तितपरस्त्रीनामनानामुखे
पौलस्त्ये रघुवीरहस्ततुलितश्चापोऽस्तु नस्त्राणदः ॥ ८९ ॥
यज्ज्यावल्लिविमुक्तशंकरजटाचन्द्राभवक्राशुग-
च्छिन्नभ्रंशितपङ्क्तिकन्धरशिरोमुण्डावलीताण्डवे ।
वेतालाः करतालयन्ति विविधं गायन्ति गोमायवः
पश्यन्ति त्रिदशाश्च कश्चन विभोश्चापः स मे पालकः ॥ ९० ॥
पौनःपुन्यविलूनपातितनटत्पौलस्त्यदोर्मस्तक-
श्रेणीदर्शनभीतसिद्धवनिताप्रोन्मुक्तसंदर्शनम् ।
दूरद्रावितरौद्रराक्षसचमूनाथश्रवोदुःश्रव-
ज्यानादं जगदीशचापमगदीकर्तुं प्रवर्तेत नः ॥ ९१ ॥

दंष्ट्राभ्रूकुटिभीमवक्त्रदशकक्रोधाट्टहासप्रभा-
निष्पिष्टस्मयहारयष्टिनि दशग्रीवस्य बाहन्तरे ।
विस्रम्भानुपलम्भकं स्वनुदधज्जम्भारिकौतूहलं
नाराचाग्निखनद्व्रणे रघुपतेराराधयामो धनुः ॥ ९२ ॥
मुष्टीमुष्टि तलातलि प्रचलितं क्रव्यादशाखामृग-
व्यूहस्याहवमैहलौकिककथाप्रस्तारविस्तारकम् ।
दृष्ट्वा कष्टमिति त्रिविष्टपजने शंसत्यरं साधयं-
स्तत्कामं शरकृत्तरावणवपुश्चापो विभोर्मे गतिः ॥ ९३ ॥
शश्वन्नश्वरजीवितेश्वरमुखश्रीदृश्वविश्वामरी-
निश्वासश्वसनश्वयद्भुजमहो वैश्वानराम्रेडितम् ।
पूर्वं दुर्वहसर्वपर्वतभृतो निर्वाप्य गर्वं द्विषः
कुर्वत्सर्वसुपर्वनिर्वृतिमवेदौर्वीसुतेशं धनुः ॥ ९४ ॥
पौलस्त्योपरमे परस्परबलग्राहावहेलाग्रह-
व्यग्रोदग्रबलीमुखावलिमुखव्यालोलकोलाहले ।
भूकन्याकमनैकपाणिनलिनन्यासेन धन्याटनि-
श्चापस्तम्भितशंभुकङ्कणनिभः शर्माणि निर्मातु नः ॥ ९५ ॥
सिद्धस्त्रीमुखबद्धहासचपलत्वङ्गत्प्लवङ्गच्छटा-
वक्त्रानुक्रियमाणकौणपतरुण्याक्रन्दितप्रक्रमे ।
युद्धान्ते धनुरिद्धमुद्धतदशग्रीवान्तवान्ताशर-
स्थैर्ये हृन्मम रामभद्रकरभृत्कोटीकमाटीकते ॥ ९६ ॥
गृह्णद्रामकरारविन्दनखरश्रीपुञ्जमिश्रान्तरा-
मश्रान्तं परिचिन्तये हृदि धनुर्वल्लीं रुजाशान्तये ।
लङ्कानाथनिपातजातकुतुकव्योमाङ्गणस्त्रीभव-
द्गीर्वाणीरमणीयमीतिसरणीनिष्पन्नपुष्पामिव ॥ ९७ ॥

माद्यद्यातु विभिद्य यद्युधि शरैरामोद्य विद्याधरी-
स्तद्वक्रोद्यतगद्यपद्यनुतिभिः सद्योऽभवद्योजितम् ।
धन्व द्योमणिवंशनद्यधिपतिप्रद्योतिशीतद्युते-
र्देवाद्यस्य तदद्य हृद्यनुपमां विद्यां प्रदद्यान्मम ॥ ९८ ॥

बाणाशीविषशीर्णशीकरदशीभूताम्बुराशीडितं
जन्यं शीतलशीलशालिरघुभूशीतांशुशीघ्रोद्यतम् ।
वाताशीशवशीकृतश्रि दशशीर्षाशीःकशीयस्त्वक्र-
क्रव्याशीकुलशीधुशीलनहरं चिन्वीत चापं वचः ॥ ९९ ॥

चञ्चत्कुण्डलगण्डकाण्डरुहभूवाङ्मण्डलीवर्णितं[1]
तद्ब्रह्माण्डकरण्डखण्डनगुणोच्चण्डस्वनालंकृतम् ।
चण्डीशानशिखण्डखण्डशशभृत्पाण्डित्यवैतण्डिकं
मार्ताण्डान्वयमण्डनस्य हृदि मे कोदण्डमाहिण्ड्यते ॥१००॥

बाणः श्रीरमणो गुणः फणिपतिर्लक्ष्यं पुराणां त्रयं
वोढा धूर्जटिरेव यस्य बिसवत्तद्येन लूनं धनुः ।
तेन श्रीरघुवीरबाहुयुगलेनारोपणीयं रणे
यत्कृच्छ्राद्भवति श्रियं दिशतु मे तच्चापमुच्चावचाम् ॥१०१॥

ये खिद्यन्ति तपस्विनः कथमपि प्रत्याहृतैर्मानसै-
र्ये चैते विषयानुरक्तमनसो द्रुह्यन्ति नक्तंचराः ।
यल्लीलाव्यपनीयमानतमसः स्वर्यान्ति तेऽपि द्वये
तत्पुण्यं शरणीकरोमि धरणीकन्यापरिण्यो[2] धनुः ॥ १०२ ॥

पुण्यत्तक्षकभोगविभ्रमजुषां येषामभूत्कन्दुक-
क्रीडाकौतुकहेतुरद्रिरभवच्च(तुलश्च)न्द्रार्धचूडामणेः ।

---

1. काण्डरुहभूः ब्रह्मा. 2. धरणीकन्यापरिणीः श्रीरामस्तस्य.

मौर्व्यै दुर्विनमं दशाननभुजैस्तैरेव शैवं धनु-
र्भङ्क्तुर्धन्व विभोः शरण्यमुररीकुर्यामुपर्यायुषे ॥ १०३ ॥

कण्ठं रुन्धति भैषजेन महतामच्छिद्यमाने कफे
मार्गालाभपरिप्लवेन मरुतां संधौ तनोस्त्रुट्यति ।
तामुल्लिख्य दशां विषादविवशं चेतः सुखावाप्तये
चापे दाशरथेर्विषण्णजगतां बन्धाविदं धावति ॥ १०४ ॥

यावत्पावकपुञ्जपिञ्जरदृशो हस्तन्युदस्तायुधा
रुन्धि च्छिन्धि जहीति भीतिदगिरो नृत्यन्ति मृत्योर्भटाः ।
तावद्धावतु चित्तमुत्तमगुणाकल्पे ममाल्पेतर-
क्षेमस्थेमकरे शरासनवरे रामस्य नाम स्वयम् ॥ १०५ ॥

यावद्भीषणवेषकालमहिषग्रीवासमालम्बिनी
घण्टा चण्डमुदञ्चयत्यनुपदं नादं जवादम्बरे ।
तावद्धावितदूतपातचकितव्यावृत्तकीनाशया
मौर्वीटंक्रियया भयं शमयतामौर्वीसुतेशं धनुः ॥ १०६ ॥

एषा दक्षिणतो दिगस्तु महतो यस्यां पथो नावधिः
पान्थास्तत्र चरन्तु येषु भयदा भ्राम्यन्ति याम्या भटाः ।
तेभ्यः पातकिनां व्यथा भवतु या शक्या न सोढुं नृणां
का भीतिर्मम यस्य शर्मणि धनुर्जागर्ति सीतापतेः ॥१०७॥

यत्तेजस्यति कीर्तिकाम्यति युधि प्रह्वान्कुमारीयति
प्रासादीयति देवहस्तकमले भासेन्द्रचापायते ।
रत्नैः पर्वसु लोहितायति भृतैः शब्दायते च ज्यया
तन्नः पातु नमस्यतो रघुपतेश्चित्रीयमाणं धनुः ॥ १०८ ॥

कल्पत्यर्थिनि कालिकाति रसिते कालाग्नियत्योजसि
स्थैर्ये मेरवति श्रिते पितरति श्रीराघवे यायति ।
यच्चाप्यर्यमणत्यबोधतमसि द्वीपीनति द्विण्मृगे
चापेऽस्मिंस्तपनीयपट्टघटिते कुर्मो नमः कर्मताम् ॥ १०९ ॥

योऽपास्यन्नपि मार्गण[नभिमतं] दत्ते जनायार्थिने
स्वीकुर्वन्नपि वक्रिमाणमधिकं यः सद्गुणालंकृतः ।
यः श्रीमानपि शश्वदीश्वरकरालम्बेन मध्येकृश-
स्तं चापं चलचामराञ्चितशिखं स्तुध्वं खरध्वंसिनः ॥ ११० ॥

पुत्रेणेव शिलीमुखेन ऋजुना सज्जाययेव ज्यया
रज्यन्त्या सुभटैरुपात्तरुचिभिः सौवर्णपट्टैरपि ।
आराध्यस्य रघुप्रवीरधनुषस्त्रैलोक्यरक्षामणेः
प्राचीनेन फलोन्मुखेन तपसा दासा वसामो वयम् ॥ १११ ॥

इति श्रीरामभद्रदीक्षितविरचितो रामचापस्तवः संपूर्णः ।

श्रीरामभद्रदीक्षितविरचितो

रामबाणस्तवः ।

मारीचोपज्ञवेगं बलविजयिसुतप्रेक्षितामोघभावं
पारावारावरोधव्रजविदितमहादुःसहार्चिःप्रभावम् ।
लीलालोलूयमानत्रिदशरिपुशिरोधोरणीदृष्टतैक्ष्ण्यं
भक्तत्राणप्रवीणं शरणमशरणो रामबाणं प्रणौमि ॥ १ ॥

---

१. 'योऽपि' इति स्याच्चेत्पाठः स समीचीन इति संदृश्यते. २. उपज्ञा ज्ञानमाद्यम्. ३. इन्द्रसूनुर्जयन्तः काकरूपः, ४. अन्तःपुरम्. ५. पङ्क्तिः.

पौलस्त्ये निस्तुलौजस्तुलितहरगिरौ बाधमाने त्रिलोकीं-
मग्नौ भग्नप्रभावे द्रवति च पवने क्वापि तान्ते कृतान्ते ।
वित्रस्ते वज्रहस्ते कृतमखिलजगद्रक्षणं येन सोऽयं
त्र्यम्बकाचण्डीशकाण्डासनभिदभिमतो मार्गणो दुर्गतिं नः ॥२॥
निर्भग्नस्ताटकोरस्स्फुटनविगलितासृक्प्रवाहे सुबाहो-
र्वक्षोमध्यं प्रविष्टो दलितखरवसापङ्कदिग्धोज्ज्वलाङ्गः ।
मारीचाग्रैकहाराभरणकृतरुचिर्वालिहृत्पद्महारी
पौलस्त्यप्राणकुक्षिंभरिरवतु जगद्रक्षको रामबाणः ॥ ३ ॥
भक्तानामिष्टदाने सुरतरुरुदधेः शोषणे वाडवाग्निः
क्रव्याद्व्याजखेलत्प्रबलतमतमःखण्डने चण्डभानुः ।
पुष्णातु क्षेममेकाधिकदलितमहासालषट्कः पृषत्कः
श्रीरामस्कन्धपीठप्रथितशरधिवल्मीकशायी फणीन्द्रः ॥ ४ ॥
प्राप्यानुज्ञामभिज्ञात्कुशिककुलभुवस्तापसात्कोपसान्द्रे
स्वामिन्युन्मोक्तुकामेऽप्यनुचितमिदमित्यन्तरुद्भिन्नचिन्तः ।
कंचित्कालं विलम्ब्य स्मृतनिखिलजगद्रक्षणस्तत्क्षणं यः
संतापं ताटकाया व्यधित युधि तमेवाश्रये रामबाणम् ॥५॥
मौर्वीटंकारघोरश्रवणकटुरटत्ताटकोद्घाटितास्य-
भ्रश्यज्ज्वालाविनश्यद्घनतमतिमिरारण्यलीलाधरण्याम् ।
भिन्दन्यो वृक्षवृन्दं विगलितगरुतं विक्षिपन्पक्षिपङ्क्तिं
कर्षन्मेघान्व्यहार्षीद्रघुपतिविशिखं तं भजे रोगहत्यै ॥ ६ ॥
संभ्राम्यत्ताटकाम्भोवहनिवहरजोवृष्टिनष्टावकाशे
दिक्चक्रे येन चक्रे स्फुटतरुपटलोत्पाटनापाटवेन ।

---

१. शंभुचापदारी. २. शरः. ३. मेदः. ४. दलितसप्तसालः ५. बाणः. ६. तूणीरः.

रंहःसंमुग्धसिंहच्युतमदकरिणा चण्डवातस्य लीला
स स्ताद्राजेन्द्रहस्ताम्बुजवसतिरिषुः श्रीनिदानं सदा नः ॥७॥
संक्रुद्ध्यत्ताटकाभ्युत्पतनजवसमुद्भूतपीत्कारघोर-
व्यात्तास्योद्भ्रान्तवक्षःसृगदसृगभितस्वप्रवेशप्रदेशः ।
लीलाविध्वस्तमूलावनिरुहनिवहानुद्रुतो रौद्रवेगो
हर्षोद्ध्यामावृणोद्यो हरतु स दुरितं रामभद्रस्य बाणः ॥ ८ ॥
नीलाम्भोवाहलीलां विदधति दलिते ताटकाबाहुमध्ये
विद्युल्लेखामिवैकामुदसृजदसृजा वाहिनीं लोहिनीं यः ।
दीप्तानां प्राप्तिमावेदयितुमिव भुवि स्वप्रतापातपानां
बाणो राजेन्द्रतूणोदरकृतभरणो वैरिणोऽसौ कृणोतु ॥ ९ ॥
येन प्रौढेन मध्ये[1] महितरसभरालंक्रियाकल्पकेन
श्लोकानुत्पादयित्रा रजनिचरकुलोत्पाटनानाटकस्य ।
न्यस्तं प्रस्तावनायाः सपदि किल पदे ताडनं ताटकायाः
सोऽस्माकं रामबाणः सुललितरचनां सूक्तिमाविष्करोतु १०
हस्तोदस्तत्रिशूलक्षपितमुनिपृथुस्कन्धनिष्यन्दमान-
स्फारासृक्पूरधाराभजनजठरभृत्ताटकापाटनेन ।
नन्दद्योगीन्द्रवृन्दस्तुतिमुखरितदिक्चक्रवालान्तरालो
रक्षेदिक्ष्वाकुचूडामणिकरकमलोत्सङ्गशायी शरो नः ॥११॥
होतर्युन्मुक्तशस्त्रे विरमति सहसोद्गातरि स्तोत्रगाना-
दध्वर्यावस्तपात्रे द्रवति किमिदमित्युन्मिषत्यन्यलोके ।
यो वेगादुज्जिजृम्भे कुशिकसुतमखे वर्षतो विस्रमास्रं
रक्षोमेघाञ्जिघांसुर्घटयतु स घनां संपदं रामबाणः ॥ १२ ॥

---

१. 'मध्येमहि तरसभरालंक्रियाकल्पकेन' इति च पदच्छेदः.

दुर्दान्तो रक्तबिन्दून्विकिरति परितो वेदिकां कौशिकस्ये-
त्यर्धोक्ते सिद्धसङ्घैर्झटिति पटुतरो यः शठं ताटकेयम्।
धृत्वा धूत्वार्दयित्वा जलनिधिकुहरे मज्जयामास वेगा-
द्रोगानस्माकमुच्चाटयतु स जवनः सायकस्ताटकारेः ॥१३॥
विश्वामित्रीयसत्रप्रतिहतिकलनोड्डामरव्योमरङ्ग-
त्वङ्गन्मारीचदूरीकरणरयसमुद्भूतजीमूतचक्रः।
तत्कालोद्भूतहर्षाद्भुतभयशबलस्वान्तयोगीन्द्रदत्त-
द्राघीयःश्लाघनोक्तिर्दलयतु दुरितं सायको राघवीयः ॥१४॥
मौलिभ्रश्यत्किरीटं गलपरिविगलच्चारुमुक्ताकलापं
त्रासोद्यन्मुष्टिबन्धश्लथकरयुगलस्रंसमानासिखेटम्।
दूरक्षिप्तान्तरीयप्रकटकटितटीबद्धकौशेयकक्ष्यं
धून्वन्मारीचमुच्चै रघुपतिविशिखः पावनो नः पुनातु ॥१५॥
स्रस्तव्यालोलकेशे ततकरचरणच्छादिताशावकाशे
त्रासव्यात्तास्यगर्तप्रकटितविकटाक्रन्दितोद्घोषघोरे।
मारीचे व्योम्नि धूते भयतरलवधूस्वैरसंश्लेषहृष्य-
त्सिद्धश्रेणीनिबद्धस्तुतिरवतु सदा राघवीयः शरो नः ॥१६॥
भग्नर्षिस्कन्धरन्ध्रस्रुतममितमसृक्पूरमुत्कण्ठितेन
प्रागाकण्ठं निपीतं वमयितुमिव यस्ताटकेयेन गाढम्।
भ्रामंभ्रामं तमभ्रे भ्रमिरभसदलत्संधिबन्धं विजह्रे
दारिद्र्यं दारयेद्राक्क्षयमयमिह मे रामभद्रीयबाणः ॥१७॥
रंहोनिर्धूतमूर्धच्युतमुकुटतटभ्राजिमाणिक्यराजि-
श्रीपुञ्जाव्याजनव्यारुणितपतदसृक्पाटलं यज्ञवाटम्।
क्रूरोऽयं ताटकेयो व्यतनुत इति तं क्रोधतोऽम्भोधितोये
सद्यः प्रापातयद्यस्तमिषुमिह विभोश्चिन्तयाम्यन्तरङ्गे ॥१८॥

क्षिप्तश्चण्डानिलेनाम्बुद इव गगने येन वेगोत्तरेण
न्यञ्चन्कुत्राप्युदञ्चन्कचिदपि विततः क्वापि भग्नः कुहापि।
मारीचः प्राप वाचप्रचमकरघटानिर्भरंगर्भमब्धेः
कौसल्यासूनुबाणः कलयतु स रुचा पेशलः कौशलं नः १९
भ्रश्यन्मारीचपातप्रचलितसलिलोत्पीडनिर्वेलमूर्छ-
त्कल्लोलोत्खातमूलोद्दलिततटमहीरूढतालद्रुजालः।
वेगोद्भिन्नाम्बुपूरोदरविवृतलुठन्नक्रपाठीनचक्र-
श्चक्रे येनार्णवस्तं मनसि मनुमहे रामकाण्डप्रकाण्डम् ॥२०॥
ऊर्ध्वक्षिप्तार्धतारप्रतिभयनयनं वक्रदंष्ट्राग्रदष्ट-
स्थूलास्यप्रान्तलोलद्रसनमुरुनसाप्रस्रुतोद्बुद्बुदास्रम्।
हृन्मर्मस्फोटकर्मण्यरमुपजनिते येन मारीचसैन्यं
स्वादभ्रंशीददभ्रं दिशतु स कुशलं दाशरथ्याशुगेशः ॥२१॥
विध्वंसन्ते शकुन्ता युगविगमघनस्फारनिर्घातघोरं
मौर्वीनिर्घोषमुर्वीरुहशिखरगतास्तूर्णमाकर्ण्य यावत्।
यस्तावत्रस्तधावत्सुरजनमभिनद्बाहुमध्यं सुबाहो-
र्ज्वालानिष्पीतकालानलबहलमदं रामबाणं तमीडे ॥ २२ ॥
यश्चापज्यापविद्धः सपदि घनपदव्यन्तमुत्पत्य कृन्त-
न्बाहामध्यं सुबाहोरतिरभसवशादप्यनासक्तरक्तः।
सेवासंनद्धदेवावनमितमुकुटोद्दीप्तमाणिक्यसूत-
श्रीपुञ्जेनाररञ्जे स भवतु भगवत्सायकः श्रेयसे नः ॥२३॥
भित्त्वा सत्त्वानुरूपं झटिति घनमुरः क्रामति व्योमरङ्गं
यत्र भ्रश्यत्तनुत्रः पतदसिलतिकारिक्तबाहुः सुबाहुः।
प्रागभ्यासादिवागस्कृदजनि पुनरप्यस्रविस्रावणेन
स्थानारण्ये मुनीनामवतु स जवनो रामनाराचराजः ॥२४॥

यश्चञ्चत्कङ्कचञ्चूपुटहठविकटाकृष्टभीमान्त्रजाला-
न्विद्राणक्रोष्टुघोणाधृतपिशितगलद्रक्तसंसिक्तमार्गान् ।
खण्डंखण्डं सुबाहोर्भटकुलमकरोत्कौशिकस्याश्रमान्ता-
न्कौसल्यासंभवस्याशुगमखिलरुजाशान्तये चिन्तये तम् २५
कर्मप्रत्यूहभङ्गान्नियमिपरिषदो भव्यहव्योपलम्भा-
द्दिव्यानां क्रव्यदानादपि वनपततामुत्तमां प्रीतिमत्ताम् ।
प्रायच्छत्ताटकेयप्रमुखमखरिपुक्षोदरूक्षोदयो यो
वन्दे तं देववृन्दस्तुतमुषितमिषुं रामहस्तारविन्दे ॥ २६ ॥
कोदण्डे भार्गवेण त्रिपुररिपुधनुर्भङ्गरुष्टेन दत्ते
भक्तिप्रह्वाब्धिकन्याकरकमलपरिक्षिप्तगन्धाक्षताङ्के ।
संनद्धः सिद्धविद्याधरसुरपरिषत्पक्ष्मलाश्चर्यवीक्षा-
पात्रीभूतः स पत्री भवतु शुभवहोऽस्माकमैक्ष्वाकधार्यः २७
ज्वालानिर्दग्धमूलावदलनविगलत्काञ्चनस्तम्भमौलि-
व्यत्यस्तभ्रश्यदत्यद्भुतमणिशिखराक्षिप्तनश्यद्विमानान् ।
सौवर्गान्भार्गवीयप्रचुरतरतपःसाधितान्बाधितारं
लोकानापन्नशोकानपनुदघनुदं नौमि रामस्य बाणम् ॥२८॥
पक्षव्याक्षेपरूक्षास्यदचकितमिषत्सिद्धगन्धर्वयक्षं
धावन्तं देववृन्दं प्रति मम शरणं त्वं भव त्वं भवेति ।
एषा रोषाज्जयन्तं करटतनुमनुक्रामते भीमतेजो-
नुद्ध्याय स्यान्नमस्या मम रघुवृषभप्रेयसे सायकाय ॥ २९ ॥
त्राणानीशे हुताशे वितरितुमभयं पाशभृत्युज्झिताशे
रक्षावैमुख्यदीक्षां विदधति धनदे वज्रहस्ते विहस्ते ।
काकेनालम्भि लोके क्वचिदपि न किल त्रस्यता यस्य पाता-
द्ग्रामादन्यः शरण्यः प्रथयतु स शुभं मैथिलीनाथबाणः ३

[1]मारीचानुप्रचारावहितनवमृगाकाररक्षोयुगोरः-
प्रध्वंसस्रंसिमांसग्रसनरसनटत्संकुलश्येनकङ्कम् ।
कुर्वन्प्रह्वाधि सर्वंकषगुणघटितो दण्डकामण्डलं यः
संचिक्रीडे तमीडे तपनकुलमणेः सायकं भावुकाय ॥ ३१ ॥
घोरासृग्वर्षिधाराधरमवनिपतत्तुङ्गरथ्याश्वसङ्घं
दुष्टश्येनोपविष्टध्वजशिखरमुरुक्रन्दगोमायुचक्रम् ।
नासीरं पूर्व[2]मासीदति सपदि खरे योद्धुमुन्नद्धधूमो
युद्धाशंसामशंसत्किल रघुपतये यः स बाणः पुनातु ॥ ३२ ॥
एकोऽनेकोपरोधश्चरतु कथमिति व्याकुले दिव्यलोके
युद्धालोकाय बद्धादरमनुपतति व्योमसीमां विमानैः ।
तच्चिन्तां भङ्क्तुमेको दशशतमिति यो जातु मुक्तोऽपि यातु
क्षिप्रं चिच्छेद दीप्रं तमिनकुलमणेः सायकं भावयामः ३३
रुन्धन्रक्षोद्दगन्धंकरणरुचिभरैरन्तरिक्षं तरस्वी
वृन्दं वृन्दं विभिन्दन्समिति खरचमूचारिणां वैरिणां यः ।
नन्दन्नाकेशमन्दप्रचलितनयनाम्भोजसंभावितोऽभू-
दन्तर्ध्यायामि संतर्पितमुनिसदसं तं शरं वंशनेतुः ॥ ३४ ॥
गोमायुत्यक्तभीमायुधसचिवभुजच्छेदसंबाधमुर्व्या-
मुच्चण्डश्मश्रुमुण्डग्रहविमुखवलद्गृध्रनीरन्ध्रमूर्ध्वम् ।
धर्मारण्यं वितन्वन्नपि खरसमरे तापसारब्धसार-
स्तुत्यानत्यास्पदं यः समजनि तमहं रामबाणं नमामि ३५
[3]सद्यःसंघट्टरंहस्त्रुटितखरचमूचक्रचश्चत्करीन्द्र-
स्कन्धस्त्रुद्दिस्त्रगन्धक्षतजतटवतीनद्धडिण्डीरबुद्धिम् ।

---

१. अत्रारण्यकाण्डे एकोनचत्वारिंशसर्गोक्ता रामायणकथानुसंधेया. २. आसीदति सति. ३. श्टङ्गपादविहीनोऽयं श्लोकः. श्टङ्ग=ए ऐ ओ औ=एच्; पाद=आकारः.

कुर्वन्पश्यज्जनस्य व्यपदलितसितच्छत्रमूर्च्छेद्गुचीभिः
पृथ्वीपुत्रीशपत्री विपदमनुपदं हन्तु निर्विण्णबन्धुः ॥३६॥

कृत्तच्छत्रप्रभग्नध्वजमुपदलितस्यन्दनं मारिताश्वं
निर्भिण्णस्कन्धगन्धद्विरदमवयवच्छेदनिष्पन्दयोधम् ।
चिक्रीड क्रूरमेव प्रखरखरचमूचक्रमाक्रम्य यः प्रा-
ञ्जद्रोगानेष विद्रावयतु भगवतो रामभद्रस्य बाणः ॥३७॥

भग्नासिच्छिन्नशक्तित्रुटितपरिघनिर्भिण्णकोदण्डलून-
प्रासोत्कृत्तत्रिशूलप्रभृतिभिरवनीमायुधैराशराणाम् ।
द्यामप्युद्यत्कबन्धव्रजगलविवरोद्गच्छदास्रच्छटाभिः
संरुन्धन्नः समिद्धः खरसमरविधौ संपदे रामबाणः ॥ ३८ ॥

क्वापि च्छिन्नैः शिरोभिः क्वचिदपि दलितैर्दोर्भिरेकत्र कृत्तैः
पादैरन्यत्र लूनैरवयवशकलैः क्रव्यमात्रानुभाव्यैः ।
आस्तीर्यास्तीर्य भूमिं व्यहृत खरचमूरक्षिणां रक्षसां यो
गुर्वीमुर्वीकुमारीसहचरविशिखः स श्रियं नस्तनोतु ॥ ३९ ॥

भिन्दन्स्वच्छन्दमुद्यन्नखरुचिकुसुमं दूषणाख्यद्रुमस्य
स्त्यायद्रत्नाङ्गुलीयद्युतिकिसलयितं बाहुशाखायुगं यः ।
आरण्यायां[1] धरण्याममृडयत दृढं मण्डलीमण्डजानां[2]
जानाम्येकं शरण्यं विपदि सपदि तं जानकीजानिबाणम् ॥४०॥

आतङ्कोड्डीनकङ्कस्थगितघनपथं भीतगोमायुधूत-
क्रव्यादानं भयव्याकुलहरिणकुलाक्रान्तपर्यन्तकुञ्जम् ।

---

१. अरण्ये भवायामारण्यायाम्. २. अण्डजानां गृध्राणां मण्डलीममृडयत मृडां सुखितामकरोत्. 'मृड सुखने.' इगुपधात्कः. ततः 'तत्करोति-' इति णिच् 'णिचश्च' इति लिङ्स्तङ्.

गात्रं यो दूषणस्य त्रुटितभुजमवापातयद्भीतयत्नं
त्राता मे सोऽस्तु सीतारमणकरमहामण्डनं काण्डवर्यः ४१
[1]स्थूले माहाकपाले शिरसि निपतिते प्रोज्झिते च प्रमाथि-
न्याशु स्थूलाक्षनाशे सति द्रुगपनयाददर्दिते चान्यसैन्ये।
पश्यद्भिः श्येनगामिप्रभृतिषु निधनं व्योम्नि विद्याधराद्यैः
संतुष्टैस्तुष्टुवे यः स रघुपतिशरस्त्रायतामायतौ नः॥४२॥
सर्पास्यं द्रागपास्यन्परुषमपि रुषा तर्जयन्दुर्जयस्य
छिन्दन्देहं च वैहंगममसुविगमाभिज्ञयन्यज्ञशत्रुम्।
जन्यावन्यामथान्यानपि खरपृतनामद्ध्यगानाशु विद्ध्य-
न्कुर्याद्भूमीकुमार्याः कमितुरिषुवरः संपदं सांप्रतं नः॥४३॥
संरुष्टक्रोष्टुकृष्टक्षितिपतिततनूभङ्गनिःशङ्ककङ्क-
क्रोधोपावर्तिताधोरणमुखविकलस्कन्धरन्ध्रान्त्रजालम्।
दृष्ट्वा नासीरमासीद्रणरणरणकत्रस्तशस्त्रत्रिशीर्षं
यत्र क्रीडत्यमित्रच्छिदि स दिशतु शं भूमिपुत्रीशपत्री ४४
आतन्वन्नेकतोऽपि प्रवणवनतसंपातमात्रापसर्प-
त्कृत्तत्रैमूर्धमूर्धत्रयपिशिततृषानुद्रवद्गृध्ररौद्राम्।
अन्यत्रामर्त्यहस्तोज्झितकुसुमवलद्गन्धलोभान्धभृङ्ग-
श्यामामृष्याश्रमक्ष्मां रघुवृषभशरः शर्म मे निर्मिमीते॥४५॥
एकस्तूणीरगर्भे दश धरणिसुतानाथहस्ताभिमर्शे
चापारोपे सहस्रं प्रयुतमुडुपथे न्यर्बुदं कर्बुरेषु।

---

१. 'महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा। चत्वार एते सेनान्यो दूषणं पृष्ठतो ययुः॥ श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहंगमः। दुर्जयः करवीराक्षः परुषः कालकार्मुकः॥ मेघमाली महामाली सर्पास्यो रुधिराशनः। द्वादशैते महावीर्याः प्रतस्थुरभितः खरम्॥' इति श्रीरामायणे त्रयोविंशे सर्गे.

दृष्टो यो वेगकृष्टोपहतखररथः सिद्धगन्धर्वयक्षै-
रक्षीणं दीनरक्षी दिशतु स कविताद्दाक्ष्यमैक्ष्वाकबाणः ४६
हेमाकल्पाभिरामां कुपितखरकरप्रेरितां प्रावृताशां
वीरुन्नद्धावनीरुत्समुदयमुदयद्विस्मयं भस्मयन्तीम् ।
दूरादभ्राम्बुधारां मरुदिव बिभिदे यो गदां रोगदायी
यातूनामेष दूनावनपटुरवताद्रामभद्रस्य बाणः ॥ ४७ ॥
केतुर्भग्नो निपेतुर्भुवि शबलरुचो दारिताङ्गास्तुरङ्गा-
नीतः सूतस्य मूर्धा गलगलितदशां जातभङ्गः शताङ्गः ।
इत्यायान्तं निहत्याहवशिरसि खरं रुष्टमुन्मृष्टशोक-
स्वर्गस्त्रीवृष्टकल्पद्रुमकुसुमजुषं राघवेषुं निषेवे ॥ ४८ ॥
जीवन्नेवैष धावन्मम कनकमृगः शक्यते न ग्रहीतुं
हन्यां तेनेति वन्यामभिमृशति विभौ यं करालं करेण ।
भीतः प्राग्वत्पपात व्यसनभरमये वीतमुद्रे समुद्रे
मारीचः क्ष्माकुमारीरमणशरमणिं तं शरण्यं भजामः ॥४९॥
मेघश्यामे घनानां विपिनविटपिनां कञ्जकिञ्जल्कपुञ्ज-
च्छायादायादमायामृगवपुरचिरज्योतिषा भाति षण्डे ।
यस्यारोपेण चापे द्रुतमुपजनितो गर्जितं निर्जिगाय
ज्यानिर्घोषोऽघशोषोपजनमिषुमिमं भावये राघवीयम् ॥५०॥
चापे यस्याधिरोपे सति भयतरलव्याजसारङ्गराज-
व्योमप्रस्तीमभीमत्वरखुरशिखरस्तोकलीढावनीकम् ।
जानस्थानान्तरालं घनगुणरणिताध्मातदर्यन्तभीत-
व्याघ्रानाघ्रातरोहित्पिशितमजनि तं रामबाणं भजामः॥५१॥
सांकुर्वत्पुङ्खकङ्कच्छदजवचकितोद्भ्रान्तशाकुन्तपङ्क्ति-
व्यातन्वत्पक्षवातश्लथवनकुसुमैः किंचिदन्वञ्चिताय ।

मायासारङ्गकायाभिमुखनिजमुखप्रस्फुरद्भिः स्फुलिङ्गै-
रुन्नद्धायासि बद्धाञ्जलिरवनिसुतानायकस्याशुगाय ॥ ५२ ॥
येनाविद्धः समिद्धज्वलनकणकिरा मर्मणि क्रूरकर्मा
क्षिप्रं तालप्रमाणं खमुपनिपतितः स्रस्तपर्यस्तकङ्कम्[1] ।
प्राणस्यानुप्रयाणं विदधदिव दिवं प्रस्थितस्याबभासे
दासे मय्याधिमासेदुषि स तु भवतु त्राणदो रामबाणः ५३
दीर्घाक्षं चारुशृङ्गं मुखमजनि करालेक्षणं वक्रदंष्ट्रं
किंचाङ्गीणां चतुर्णां त्वरितमभवतां द्वौ भुजौ द्वौ च पादौ ।
नष्टा लाङ्गूलयष्टिर्नवसिचयमयी कापि कक्ष्या तु दृष्टा
यत्कोटिस्पृष्टमात्रे हृदि कपटमृगे तं भजे रामबाणम् ॥ ५४ ॥
मायां व्यङ्क्तुं स्वकीयामिव दलनमिषान्मायिके ताटकेये
कायं तस्याक्षिपेयं त्रिजगति कपटप्रायमैणं विधूय ।
मग्नाक्षं दीर्घकूर्चस्तबकमुरुनसं तुन्दिलं तालजङ्घं
घोरं रक्षःशरीरं व्यतनुत भगवत्सायकं तं भजामः ॥ ५५ ॥
सारङ्गीयं शरीरं प्रथममथ तनुं राक्षसीं रूक्षशीलां
दूरीकृत्यान्यदूरीकृतवति च वपुर्दिव्यमव्याजभव्यम् ।
मारीचे सिद्धनारीकरतलगलितानल्पकल्पद्रुपुष्प-
श्च्योतन्माध्वीविधूतक्षतजमलिनिमा पातु मां रामबाणः ५६
उन्मीलत्सालजालत्रुटनविगलिताशङ्कतुङ्गप्रमोद-
त्वङ्गच्चेतःप्लवङ्गप्रकरकरयुगच्छिन्नमाल्यप्रसूनम् ।
तत्कालप्रोतशैलक्षितितलयुगपद्दर्शनाश्चर्यधुर्य-
श्लाघाकृत्किन्नरौघावृतगगनतलं रामबाणं भजामः ॥ ५७ ॥

---

१. 'खमुपनिपतितः स्रस्तपर्यस्तकेशम्' इति स्थिते पाठः समीचीनः स्यादिति प्रतिभाति.

सारण्यग्रामपृथ्वीभरदुरवनमोत्तुङ्गसर्वोत्तमाङ्ग-
प्रोद्यद्वैफल्यशल्यज्वरितफणधरग्रामणीभक्तिदृष्टः ।
भूरिश्रद्धानिबद्धस्तवनतभुजगीदृक्प्रसूनार्च्यमानो
भित्त्वा सालान्प्रविष्टः फणिपतिभुवनं पातु रामस्य बाणः ५८
खेलद्धेमाब्जमालं शकलितरणकृद्दुन्दुभिक्रूरशृङ्गं
कक्षप्रक्षिप्तरक्षःपतिविधुतशिरःप्रान्तघातक्षमान्तम् ।
तारावक्षोजभाराहृतघुसृणरसं वालिनो बाहुमध्यं
विध्यन्बाणो विदध्यान्मम शुभमनिशं रामतूणीरधामा ५९
तारातारप्रलापद्विगुणितकरुणाक्रन्दकिष्किन्धमुद्य-
त्त्रासापक्रान्तकीशप्लवननिपतितानोकहानेकशाखम् ।
सुग्रीवान्तःसमग्रीभवदरिपतनानन्दमिन्धानरूपं
चित्ते कृत्तेन्द्रसूनुं रघुपतिविशिखं शीलयामः शुभाय ॥६०॥
ईडे वीरस्य गाढश्रयितघनजटामण्डलस्य श्रमाम्भः-
सिक्तालीकस्य वीचीनिचयवलयिने कुप्यतः सागराय ।
आरक्तापाङ्गलीढश्रुतिनिकटचरन्मुष्टिसंदष्टमूलं
चापातिक्रान्तशल्यज्वलदनलमिषुं शान्तये साध्वसानाम् ६१
संस्तृतज्वालतप्तप्रबलगिरिदरीगर्भनिर्भेदखेद-
क्षुभ्यद्धर्यक्षरूक्षध्वनिचकितगजोन्मुक्तफीत्कारघोरम् ।
अम्भःशोषोपलम्भक्षणचुरुचुरुतोद्बुद्बुदस्त्यानफेनं
पारावाराम्बुपूरं चिकलयिषुरिषुः पातु पौलस्त्यजेतुः ॥६२॥
भ्रश्यन्निर्घातनश्यद्धृति तिमिरभराक्रान्तमुद्भ्रान्तलोकं
वातूलध्वस्तमूलक्षितिरुहमवनीकम्पसम्पन्नशोकम् ।

---

१. अयं श्लोको जानकीपरिणयनाटकेऽपि (६।६७) दृश्यते।

तिर्यञ्चन्द्रार्कचर्याचकितमुनि जगत्कुर्वता येन पूर्वं
लक्ष्मीचक्रे समुद्रः स हरतु दुरितं रामभद्रीयबाणः ॥ ६३ ॥
शुष्यत्पाथोधिकुक्षिभ्रमदमितमहाग्राहवालाग्रवात-
क्षुभ्यत्कल्लोलगर्भप्रभवकलकलव्याप्तविध्यण्डमध्यम् ।
दिक्कोणव्यापिनव्यद्युमणिशतसमुद्भाव्यसाचिव्यभाव्य-
ज्वालामालाकरालं विपदपहतये रामबाणं स्मरामः ॥ ६४ ॥
पाथःक्काथासहाधःपतदुरुमकरत्रस्तपर्यस्तयादो-
निर्वृत्तावर्तचक्रभ्रमणविवलदुत्ताननिष्प्राणमीनम् ।
निष्टापत्रुट्यदब्जप्रकरपटपटध्वानसंरुद्धमब्धिं
यश्चक्रे प्रागिषुं तं खरमथनकराम्भोजभाजं भजामः ॥६५॥
उत्क्रामत्प्राणनक्राननबिलविगलत्प्राङ्गिगीर्णाम्बुमर्त्यं
धूम्यासंसर्गताम्यद्द्रजनिचरकुलत्रासमुक्ताधिवासम् ।
अन्योन्यश्लिष्टनष्टद्विरसनमनलज्वाललीनाभ्रजालं
कुर्वन्नम्भोधिमुर्वीदुहितृपतिशरः पातु नः क्षेमहेतुः ॥ ६६ ॥
संमुह्यत्सह्यकन्यं तरलितमुरलं जृम्भितातङ्कगङ्गं
सद्यःक्रन्दत्कलिन्दात्मजमवशलुठन्नर्मदातुङ्गभद्रम् ।
खेलज्ज्वालावलीढक्षुभितसरभसोद्वेल्लकल्लोलचक्रे
विक्रोशत्यम्बुराशौ रघुपतिविशिखः पातु मां यातुमाथी ६७
अन्योन्यश्लिष्टवीचीभुजलतमभितःकीर्णशैवालकेशं
लोलत्पक्ष्मेक्षणान्तस्रवदमितमधुस्यन्दबाष्पानुबन्धम् ।
चक्रन्दुः सिन्धवो यन्मुखवलदनलज्वालतान्ते स्वकान्ते
सः श्रेयस्ताटकेयप्रमथनविशिखो यच्छतादिच्छतां नः ६८
वैडूर्यस्निग्धमुग्धद्युतिरमरधुनीमुख्यनारीपरीतो
रत्नाब्धौलिरात्मप्रभवमणिगणालंकृतो रत्नचेलः ।

यस्मिन्प्राणान्तदण्डप्रणयिनि समुपागम्य रम्यैर्वचोभि-
भक्त्या तुष्टाव बद्धाञ्जलिपुटमुदधिस्तत्प्रभोरस्त्रमीडे ॥ ६९ ॥
अन्वञ्चज्जह्नुकन्याशिशिरकरतलामृष्टनिष्टप्तभाग-
स्तातप्रेमाप्तधन्वन्तरिकरकलितच्छिन्नगात्रार्द्रपट्टः ।
काङ्क्षन्नम्भोधिरन्तर्घनममृतरुचेरात्मजस्याङ्कपालिं
निन्ये यद्गस्तमुक्तः कथमपि दिवसं तं भजे रामबाणम् ॥७०॥
अङ्कालंकारलङ्कापुरशिखरशिलाचक्रविक्रान्तवीर-
क्रूरक्रोधाट्टहासश्रवकुपितकपिक्ष्वेडिताम्रेडितानि ।
ज्यानिर्घोषेऽतिशय्य प्रवहति विहगान्रंहसा संहसन्तं
तं रक्षश्चक्षुरुष्णंकरणमधिरणं रामबाणं नमामि ॥ ७१ ॥
कृत्तं येनापतत्तद्रणशिरसि शिरः श्मश्रुलं रश्मिकेतोः
सुप्तघ्नश्च न्यपतद्भुवि दलितशिरा यज्ञकोपेन साकम् ।
भग्नं द्रागग्निकेतोरपि धरणिगतं शीर्षमाकार्षि कङ्कै-
र्लङ्कातङ्कैकहेतुः स शरपरिवृढः पातु सीताधिनेतुः ॥ ७२ ॥
सातङ्कामर्त्यसङ्घानभिलषितनिजालोकनं शोकनम्र-
स्वर्बन्दीनिर्भराश्रुस्नपितमषिरजोद्गीर्णपाथःकणार्द्रम् ।
उन्मीलत्केलिकोपाकुलमयतनयामात्रदृष्टप्रणामं
दाशग्रीवं किरीटं रणभुवि विकिरन्रामबाणः पुनातु ॥ ७३ ॥
वेगादाकाशवीथ्यामुपरि परिहरन्[1]नभ्रवृन्दं विभिन्द-
न्नाकर्षन्काककङ्कप्रकरमधिनभश्चक्रमुच्चैर्भ्रमन्तम् ।
दोर्दण्डः कौम्भकर्णः[2] कपिवरदलनप्राप्तदम्भोलिकेलि-
र्येन व्यालूनमूलः क्षितिमभजदयं त्रायतां रामबाणः ॥ ७४ ॥

---

१. 'परिसरन्नभ्रवृन्दं' इति स्थिते भव्यः पाठो भवेदिति भाति. २. 'कौम्भकर्णः कथमपि कपिभिर्विद्रुते दूरमद्रौ' इति पाठभेदो दृश्यते.

निर्घातक्रूरपातध्वनिचकितजगद्भुग्नभूगर्भभग्न-
क्रोडावध्यङ्गपीडाकुलममरकुलोन्मुक्तहर्षाट्टहासम्।
यत्कृत्ताभ्यां पदाभ्यां द्रुतमपतदधः कौम्भकर्णं शरीरं
तस्मादन्यं न मन्ये रघुवृषभशराद्रक्षणे दक्षिणं नः॥ ७५॥
त्रस्तापावृत्तमत्तद्विपचकितललद्दुष्टतुङ्गोष्ट्रपृष्ठ-
भ्रश्यन्नैःसाणिकाशुत्रुटितपदपुनःसंध्यपारीणवैद्याम्।
लङ्कां सुग्रीवविग्रीकृतविवृतनसारन्ध्रभीमो न्यरुन्ध-
द्राङ्मूर्धा कौम्भकर्णो यदपहृतगलः पातु बाणःस नेतुः॥७६॥
निष्पिष्टानल्परक्षःकपिकुलमसकृद्भूतले पातुकस्य
क्षिप्तोदश्चद्विमानस्खलितसुरमुपर्यम्बरे चोत्पतिष्णोः।
वृत्तं यत्कृत्तमूर्ध्नः क्षणमधिसमरं कुम्भकर्णस्य नृत्तं
भूता मामेति भीताः कथमपि ददृशुस्तं भजे रामबाणम्॥ ७७॥
बाणा लूनाः सुराणामपि पिशितभुजो येन कङ्कच्छदाङ्क-
प्रेङ्खत्पुङ्खाभिरामा रणभुवि तरसामाकरा माकराक्षाः।
नीतस्तातस्य पार्श्वं तदनु खरसुतोऽप्यस्त्रशस्त्रप्रवीण-
स्तेन सस्ताटकारेरिह वयमिषुणा केवलं सावलम्बाः॥ ७८॥
[१]कोदण्डादुज्जिहानो नमदमरवधूसंघसंगीतकीर्तिः
प्रीणन्गीर्वाणलोकं यमिकुलसहितं तेजसा जृम्भितेन।
रामस्यामित्रवर्गं मथितुमखिलमाबालमुत्साहपर्या-
णद्धोऽस्माकं शुभानि स्तबकयतु शरो वेगनिर्धूतमेघः॥७९॥
निर्गच्छद्वैरिवर्गच्छलजलदकुलोन्मुक्तनाराचधारा-
विच्छेदाभिज्ञकङ्कच्छदजवपवनप्रेङ्खितक्रूरपुङ्खः।

---

१. अत्र प्रतिपादं नियतिप्रथमाक्षरसंकलनया 'को न संप्रीयते रामबाणस्तवे' इति स्रग्धरणीपादेभ्यो लभ्यते.

बाणो रामस्य शाणोपलनिशितशिखाधालधल्यावदात-
ह्लादिन्याख्यातशातक्रतवदुरितदुर्भिक्षयोगः पुनातु ॥ ८० ॥
मौर्वीटंकारखर्वीकृतयुगविगमोद्भूतजीमूतशब्दै-
श्चापैरुद्भ्रान्तचामीकरमयशिखरैर्मुञ्चतोऽस्त्रप्रपञ्चम् ।
तूणैरक्षीणबाणैरविरहितवहान्सङ्क्षशो वीररामा-
न्संग्रामे दर्शयन्तं तमरिपरिषदे नौमि रामस्य बाणम् ॥ ८१ ॥
व्याकीर्णस्वर्णपट्टद्युतिविशददिशं वैरिधैर्यप्रणाडी-
लुण्टाकध्वानघण्टाघटितसदटनिं मण्डलीकृत्य चापम् ।
सङ्ग्रामे रामचन्द्रे सरति भुवि दिवि च्छिन्नभिन्नापविद्ध-
क्रव्यादव्याहताम्भोवहनिवहमहं भावये बाणराजम् ॥ ८२ ॥
आराद्धुं युद्धभूमिं निशितनिजशिखाकृत्तमत्तेभकुम्भ-
प्रश्च्योतद्रक्तनिश्चप्रचघुसृणरसालेपदत्तावलेपाम् ।
सोत्कण्ठः पुण्डरीकस्रजमसृजदरं खण्डितारिप्रकाण्ड-
श्वेतच्छत्रच्छलाद्यो हृदि सपदि स मे रामबाणोऽस्तु भूत्यै ॥८३॥
साटोपाघातगाढत्रुटितपटुरटत्कङ्कटोद्घाटिताङ्ग-
क्रव्यादोरःकवाटभ्रमणलगदसृक्पङ्कभृत्कङ्कपत्रः ।
आकर्षन्नेकमाकस्मिकमिव तटितः खण्डमुच्चण्डवेगः
क्रीडन्नीडानपीडाव्यपनुदपनुदेदापदं रामबाणः ॥ ८४ ॥
कृत्तक्षिप्ताश्वकुक्षिस्रुतरुधिरमिलद्ध्रिकागृध्नुगृध्री-
सङ्घानाघ्रातजङ्घाकरिककरिकरच्छेदविस्रंसिमांसा ।
चक्रे येनारिसेना विदलितनिपतद्दुष्टवीरास्यदष्ट-
स्कन्धक्रन्दच्छृगालभ्रमणकलुषिता रामबाणं तमीडे ॥ ८५ ॥

---

१. ईडानाः स्तुवन्तो जनास्तेषामार्तिहारी.

कृन्तद्रोमायुदन्तक्रकचकटकटात्कारघोरास्थिकूटं

कङ्कोरुत्रोटिटङ्कत्रुटितपटपटाकुर्वदुच्चण्डमुण्डम्।

चक्रं यत्क्रूरशल्यक्रमणविगलितप्राणमासीदरीणां

तन्यान्मे भूमिकन्यासहचरविशिखस्तापनिर्वापणं सः ॥ ८६ ॥

कस्मैचित्कापि मैत्री निरुपधि दिदिशे [1]दाशमुख्याय येन

क्षेमं यत्संनिधाने समिति पृतनया दाशमुख्या यये न।

तस्य श्रीराघवेन्दोररिचकितशचीदेवनानाशुगन्तं

भक्तान्कुर्वन्तमीडे सुलभसुखनदीदेवनानाशुगं तम् ॥ ८७ ॥

क्षीणौजःकौणपासृक्कणविकिरणतो द्राग्रणक्षोणिकोणं

शोणीकुर्वाणमुद्यद्रणरणकरण[2]द्रावणद्रावणज्ञम्।

प्राणत्राणप्रवीणं प्रणतिचणनृणां प्रक्वणद्वेणुवीणा-

पाणिस्त्रैणवाणीगुणितगुणगणं रामबाणं प्रणौमि ॥ ८८ ॥

[3]कालीहर्यक्षकण्ठध्वनिभरपरुषं कुर्वतामट्टहासं

साटोपन्यस्तपादक्रमनमितभुवां भग्नशूलद्रुमाणाम्।

---

१. दाशमुख्याय धीवरश्रेष्ठाय येन राघवेन्दुना इति प्रथमपादे. दाशमुख्या दशमुखसंबन्धिन्या यये प्राप्तम्. 'या प्रापणे'. कर्मणि लिट्. आत्मनेपदम्. नेति नञ्प्रतिषेधे इति द्वितीयपादे. अरिचकितस्य रावणाद्भीतस्य शचीदेवस्य महेन्द्रस्य नानाविधाः याः शुचः शोकाः तासामन्तं नाशप्रदमिति तृतीयपादे. सुखमेव नदी सुलभं सुखनद्यां देवनं विहारो येषां तान् सुलभसुखनदीदेवनान्; आशुगं बाणं तमिति यच्छब्दप्रतिनिर्देशः. २. रावणद्रावणज्ञं रावणं विद्रावयन्तमित्यर्थः. ३. अदसीयशृङ्गारतिलकभाणे—

'कालीहर्यक्षकण्ठध्वनिभरपरुषं कुर्वतोरट्टहासं

साटोपन्यस्तपादक्रमनमदवनि भ्राम्यतोर्मण्डलेन।

निर्घातक्रूरमुष्टिप्रहतबृहदुरस्तारठात्कारघोरा

युद्धारम्भा हिडिम्बानिलसुतबलयोर्मल्लयोरुल्लसन्ति ॥ १४८ ॥' इति.

निर्घातक्रूरमुष्टिप्रहृतबृहदुरस्ताररठात्कारघोरे
युद्धे निर्दग्धलङ्कं रघुपतिविशिखं नौमि रक्षःकपीनाम् ॥ ८९ ॥
तं वन्दे रामबाणं रजनिचरचमूः स्वां पुरीं यत्प्रभाभिः
सालंकारामवाटीकत मदविधुरा बन्धुरागा विनेत्रा ।
वर्षित्रा येन चाथ ज्वलनमजनि न प्रापिता दौरवस्थ्यं
सा लङ्कारामवाटीकतमदविधुराबन्धुरागा विनेत्रा ॥ ९० ॥
संस्पर्धारब्धयुद्धाभिमुखदशमुखक्रूरपादप्रचार-
न्यञ्चद्भूकुञ्चिताङ्घ्रिरसनवरसंप्रार्थितस्वप्रवृत्तिः ।
चापारोपाय कुप्यन्निव दिशि ददृशे यो विलम्बासहत्वा-
ज्ज्वालाजिह्वालवक्त्रः स दहतु महतीमापदं रामबाणः ॥ ९१ ॥
कल्पान्तोद्भूतवातभ्रमितजलधरोद्घोषगम्भीरगर्जे-
द्रक्षोनाथाट्टहासश्रवणसरभसोत्पुष्यदान्ध्ये फणीन्द्रे ।

---

१. सालंकाराम्, अवाटीकत, मदविधुरा, बन्धुरागा. विनेत्रा, इति प्रथमार्धे; सा, लङ्कारामवाटी, कतमत्, अविधुराबन्धुरागा, विनेत्रा, इति द्वितीयार्धे पदच्छेदः। यत्प्रभाभिः यस्य बाणस्य तेजसा हेतुना विनेत्रा विगतनयना अत एव मदविधुरा युद्धगर्वरहिता बन्धुषु रागो यस्याः सा बन्धुरागा । बन्धूनेवाभिलषन्ती न तु युद्धे शरीरत्यागमिति भावः । रजनिचरचमूः सालंकारां अलंकारैः रम्भास्तम्भतोरणमालिकादिभिः सहिताम् रामबाणपतनात्पूर्वमिति भावः । पुरीं अवाटीकत । युद्धभूमिं परित्यज्य प्राप्तवतीत्यर्थः । 'टीकृ गतौ' । अवपूर्वात्ततो लङ् । आत्मनेपदम् । अथ तदनन्तरम् । ज्वलनं वर्षित्रा । वृषेस्तृजन्तादतस्तृतीया । विनेत्रा शिक्षकेण । दुर्जनानामिति शेषः । येन बाणेन सा प्रसिद्धा लङ्काया आरामवाटी । वीनां पक्षिणां धूः विधुरा । 'ऋक्पूः–' इति समासान्तः । विधुरया पक्षिभरेण बन्धुरा मनोज्ञा अगाः वृक्षाः सा न भवतीति अविधुराबन्धुरागा सती । दग्धत्वादिति भावः । कतमत् कीदृशम् । डतमच्प्रत्ययान्तः किंशब्दः । दुःखरूपा अवस्था यस्याः सा दुरवस्था, तस्या भावः दौरवस्थ्यम् । तच्च बहुविधं पक्षिदाहवृक्षदाहलतादाहादिदुःखानां बहुत्वात् तं रामबाणं वन्दे.

येनार्चिर्वृन्दसंदर्शितविविधजगच्चक्षुषा दिक्षु साक्षा-
दक्षान्त्येवोदलासि क्षिपतु स विपदं क्षिप्रमैक्ष्वाकबाणः ॥९२॥
शार्दूलक्रोष्टुकोलश्वखरमकरहर्यक्षकाकोलकङ्क-
श्येनास्यानाशरेशभ्रमदलघुधनुश्चक्रमुक्तान्पृषत्कान् ।
तारोल्काधूमकेतुग्रहदहनतडिच्चन्द्रचण्डांशुवृत्त्या
छिन्दानं दाशरथ्याशुगमधिसमरं चिन्तये शोकशान्त्यै ॥९३॥
लीलाविक्षिप्तशूलाशनिमुसलगदामुद्गरप्रग्रहोग्रं
यस्मिन्नाश्चर्यचर्ये कवलयति बलादात्मनोदस्तमस्त्रम् ।
पौलस्त्यः श्वासवेगग्लपितरदपटश्रीर्निशश्वास शश्व-
त्तस्मै विस्मेरविद्याधरनयनकृषे नौमि रामाशुगाय ॥ ९४ ॥
क्रुध्यत्पौलस्त्यहस्तभ्रमितधनुरपश्लिष्टघोरास्त्रसृष्टा-
न्क्ष्वेलज्वालाजटालान्पिहितदशफणामण्डलान्कुण्डलीशान् ।
हत्वा संवर्तमेघस्फुरदुरुगरुदास्फालनिर्धूतमूर्ध्नो
विक्रामन्व्योम्नि चक्रायुधरथवपुषा पातु रामस्य बाणः ॥९५॥
हुंकारत्रस्तविश्वत्रयममरपतिप्रार्थितभ्रूनिदेशं
प्रेम्णा संचारिताक्षं मुहुरपि च परस्त्रैणतुङ्गस्तनेषु ।
मध्वासारार्द्रकूर्चं मदनकलमयापत्यपीताधरोष्ठं
मूर्धानं निर्धुनानो युधि दशशिरसः पातु मां रामबाणः ॥९६॥
सद्यःकृत्तापविद्धत्रिदशपथसमाकीर्णपौलस्त्यमूर्ध-
द्राघीयःश्मश्रुपाशग्रथितपदवलद्गृध्रसंपातरौद्रे ।
युद्धारम्भे सुशिक्षावशदुरवगमादानसंधानमोक्ष-
स्त्वाद्दक्षो रामबाणो वितरतु नितरां भव्यमव्याहतं नः ॥९७॥
कृत्तभ्रष्टदृप्यद्दशवदनशिरःपिण्डतालीफलाली-
मुद्यत्काकोलकोलाहलमुहुरनुहुंकारिगोमायुभीमाम् ।

कुर्वन्सङ्ग्रामभूर्मिं कुतुकघनमनश्चारणश्रेणमुक्त-
प्रभ्रश्यत्पारिजातप्रसवसुरभिलः पातु रामस्य बाणः ॥ ९८ ॥

[1]सङ्ग्रामे रूपमानादमरभयवहाद्विन्ध्यमेरूपमाना
निर्यन्नीराक्षसीसाकृतिरदनमुखी वाहिनी राक्षसी सा ।
दृष्ट्वा तत्रास कृत्तं दशवदनशिरो येन तत्रासकृत्तं
बाणं वन्देऽवमान्यं भगवत उदयद्वैभवं देवमान्यम् ॥ ९९ ॥

हाहाकुर्वाणसर्वाशरनिकरमविस्रम्भिणो जम्भजेतु-
र्भृत्यैरभ्येत्य दृष्टं मुदितकपिकुलास्फालितोद्धूतवालम् ।
आहत्य श्येनकङ्कावलिदलितभुजाभ्यन्तरं स्यन्दनान्ता-
ल्लङ्केशं भ्रंशयन्तं रघुपतिविशिखं नौमि रोगोपशान्त्यै ॥ १०० ॥

[2]यत्पत्रं तत्सवित्रीभवति हनुमतो नीलसुग्रीवसर्गा-
वायत्तौ यत्फले चानिशमिनशशिनौ गच्छतो यच्छरीरे ।
अन्यत्किं यद्गरिम्णि त्रिपुरहरधनुर्दुग्धसिन्धोश्च मन्थः
पौलस्त्यप्राणहारी युधि भवतु स मे रामबाणः शरण्यः ॥ १०१ ॥

---

१. रूपमानात् रूपप्रमाणात् । विन्ध्यमेरूपमाना विन्ध्यमेरुतुल्या । उत्तुङ्गशरीरेत्यर्थः । रक्षोनिष्ठमुत्तुङ्गशरीरत्वं तद्वाहिन्यामारोपितम् । निर्यन्नीरे शोकेन विगलद्बाष्पे अक्षिणी येषां तानि निर्यन्नीराक्षाणि । सीसाकृतयः श्वेततया सीसतुल्यरूपा रदना येषां तानि सीसाकृतिरदनानि । एवंविधानि मुखानि यस्याः सा तथोक्ता वाहिनी । राक्षसी रक्षःसंबन्धिनी । सेति प्रसिद्धौ । तत्रास त्रस्ता बभूव । कृत्तं छिन्नम् । तत्र तस्मिन्सङ्ग्रामे । असकृत् बहुकृत्वः तं बाणं वन्दे नौमि । अवमादधमादन्यं उत्तममित्यर्थः । उदयद्वैभवं उद्यत्प्रभावम् । देवानां मान्यं पूज्यं देवमान्यम् । इति क्रमेण पदच्छेदः पदार्थश्चावगन्तव्यः. २. 'यस्य पत्रेषु पवनः फले पावकभास्करौ । शरीरमाकाशमयं गौरवे मेरुमन्दारौ ॥' इति रामायणे.

आदौ मारीचमात्रप्रचलितचरणन्यासनिर्वृत्तरेखं
पश्चात्क्रामत्खराश्वद्विरदरथभटाक्रान्तिवैपुल्यभाजम् ।
निस्तीर्णे कुम्भकर्णप्रभृतिभिरगमद्बन्धुभिः स्पन्दितैः प्रा-
ग्यत्कृत्तः पङ्क्तिवक्त्रो यमनगरपथं रामबाणं तमीडे ॥ १०२ ॥

कल्याणं रामबाणः कलयतु भुवनातङ्कनिस्तन्द्रलङ्का-
नाथस्वच्छन्दबन्दीकृतरुददमरस्त्रैणनिर्मोक्षदक्षः ।
निर्विघ्नारम्भरम्भाकुचकलशपरीरम्भसौख्योपलम्भ-
स्निह्यज्जम्भारिसंभावितविनतजनत्राणचातुर्यधुर्यः ॥ १०३ ॥

[1]यैश्चण्डीजानिशैलग्रहणकृतधियः खण्डितेन्द्रानिलाभे-
र्लङ्कानाथस्य कण्ठानहह कदलिकाकाण्डकर्तं चकर्त ।
हर्षेणाशेषगीतं त्रिजगति नितरां दृश्यते यस्य तेजः
सः श्रेयस्ताटकारेः करतलकलितः सायकः साधयेन्नः ॥ १०४ ॥

[2]भास्वद्भानुप्रभावाभिभवपटुरुरुस्वप्रभाभिर्विधून्व-
न्सौवर्गोपप्लवौघोद्भवमृजुसुमनोभावसुप्रापरूपः ।
पापव्यालोपमायुर्विभवमपि मधुस्वादुवाग्गुम्फमावि-
ष्कुर्वन्प्रह्वेषु बाणो भवतु शुभवहोऽसौ सुबाहुद्विषो वः ॥ १०५ ॥

स्वच्छन्दं यश्चकार प्रबलनिशिचर[3]व्यूहमारी चलाव-
स्थानां लङ्कासमृद्धिं प्रतिभटपरिभाव्यूहमारीचलावः ।

---

1. निरोष्ठ्यवर्णश्लोकः. 2. सर्वौष्ठ्यवर्णश्लोकः. 3. निशिचराणां व्यूहं समूहं मारयितुं शीलमस्यास्तीति निशिचरव्यूहमारी । चलं अवस्थानं यस्यास्तां लङ्कासमृद्धिम् । प्रतिभटान् शत्रून् परिभवितुं शीलमस्यास्तीति प्रतिभटपरिभावी । तादृश ऊहो बुद्धिविशेषो यस्य सः । तथोक्तं मारीचं लुनातीति प्रतिभटपरिभाव्यूहमारीचलावः । प्राप्तं सीतारमणकरसरोजं येन सः तथोक्तम् । भजे नमस्कुर्वे । त्रासितेन तर्जितेन । जम्भजेत्रा इन्द्रेण । सितेन बद्धेन । 'षिञ् बन्धने' क्तः । इति पदच्छेदः पदार्थश्चावगन्तव्यः.

बाणं तं प्राप्तसीतारमणकरसरोजं भजे त्रासितेन
ख्यातस्तोत्रे दशास्येऽपि च कृतकदनं जम्भजेत्रा सितेन ॥१०६॥
साभावज्ञानसत्रापहतिनिरतभिल्लोकरक्षाविलासा
सालाविक्षारकल्लोलजलधितनुमग्रामसक्ता सदासा ।
सादासक्ता समग्रा दिशतु शुभमिषुस्तामसघ्नानिरासा
सारानिघ्ना समस्ताशरभटनिकरत्रासनज्ञावभासा ॥ १०७ ॥

---

१. सभासंबन्धिनः साभाः सभायोग्याः । महान्त इत्यर्थः । तेषामवज्ञानं अवमानम् । सत्रस्य यज्ञस्य अपहतिः विघातिः । साभावज्ञाने सत्रापहतौ च निरतास्तत्परा मारीचादयः तान्भिनत्तीति साभावज्ञानसत्रापहतिनिरतभित् । लोकरक्षैव विलासो यस्याः सा तथोक्ता । 'इषुर्द्वयोः' इत्यमरोक्तेरिषुविशेषणस्यापि स्त्रीलिङ्गता । सालाः सप्तसालाः, अविः शैलः, क्षारकल्लोलजलधिः लवणोर्मिसमुद्रः, तेषां तनुषु मज्जतीति सालाविक्षारकल्लोलजलधितनुमक् । रामसक्ता रामसंबन्धिनीत्यर्थः । सदा आसो गतिर्यस्याः सा सदासा । असतेर्गत्यर्थादास इति भावे घञ् । पत्रांशे वायुरूपेत्यर्थः । सादो विशरणम् । नाश इत्यर्थः । तेनासक्ता असंबद्धानित्या । आकाशरूपेत्यर्थः । समुज्ज्वलमग्रं यस्याः सा समग्रा । अग्निसूर्यात्मकाग्रत्वादिति भावः । 'यस्य पत्रेषु पवनः फले पावकभास्करौ । शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥' इति रामायणे । तामसघ्नानिरासा । तामसः तमःप्रधानत्वाद्रावण उच्यते । तं हन्तीति तामसघ्नी । 'अमनुष्यकर्तृके च' इति हन्तेष्टः । न विद्यते रामस्य सकाशान्निरासो यस्याः सा अनिरासा । शत्रून् हत्वा पुनस्तूणीरप्रवेशादिति भावः । तामसघ्नी चासौ अनिरासा चेति कर्मधारयः । पूर्वपदस्य पुंवद्भावः । तामसघ्नानिरासा । सा प्रसिद्धा । आरानिघ्ना अरीणां समूहः आरं तस्यानिघ्ना अनधीना । 'अधीनो निघ्न आयत्तः' इत्यमरः । शत्रुभिर्वशीकर्तुमप्यशक्ता । 'एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा' इति रामायणोक्तमिति भावः । समस्ताश्च ते आशरभटा राक्षसभटाश्च तेषां निकरस्य यत्त्रासनं तर्जनं तस्य ज्ञः अवभासः ज्वाला यस्याः सा । तज्ज्वालादर्शनमात्रेण राक्षसास्त्रसन्तीति भावः । पद्मबन्धोऽयं श्लोकः.

पायात्स्वीयाभिघातक्षतदशमुखदोर्मध्यमन्दोष्णनिर्य-
द्रक्तात्यन्तोपयोगश्रमभरित इव स्वामिहस्ते निषण्णः।
प्रक्रान्तस्तोत्रशक्राम्बुजभवगिरिशप्रष्ठसौवर्गवर्ग-
स्वैरस्वाराज्यभोगप्रणयनसुभगं भावुको रामबाणः॥ १०८॥

इति श्रीरामभद्रदीक्षितविरचितो रामबाणस्तवः संपूर्णः।

कविवरनरहरिविरचितं[2]

शृङ्गारशतकम्[3]।

शब्दब्रह्ममयी चकास्ति मुरली यत्राद्भुता मोहिनी
यत्रास्ते शुकनारदादिनिहितं प्रेमैव पीताम्बरम्।
यत्राद्वैतसमाधिमग्नमनसं निद्रामयी श्यामता
गोपीलोचनचुम्बितं नरहरेः क्षेमाय धामास्तु तत्॥ १॥

ये केचित्सुधियः सदुक्तिनिधयः संतुष्टवाग्देवता-
स्तेषां काव्यरसामृतानि वदने नित्यं वसन्त्येव हि।

---

१. इमौ रामचापस्तव-रामबाणस्तवौ सटिप्पणकौ तञ्जौरनगरवासिभिः टी. एस्. कुप्पूस्वामीशास्त्रिभिः प्रेषितौ, रामबाणस्तवस्य प्रथमावधि त्रिंशतिश्लोकपर्यन्तं च त्रिचिनापल्लिवासिभिः ज. से. नटेशशास्त्रिभिः प्रेषितम्, इति तेषामुपकारगौरवं बिभृमः. २. अयं हि कविवरनरहरिः कदा कतमन्महीमण्डलं मण्डयामासेति न निश्चितम्. परंतु स्वकीयेऽस्मिन्नेवशृङ्गारशतके 'श्रीकालिदास कवितासुकुमारमूर्ते **बाणस्य** वाक्यमिव मे वचनं गृहाण। **श्रीहर्ष**काव्यकुटिलं त्यज मानबन्धं वाणी कवेर्नरहरेरिव संप्रसीद॥ ८९॥' इति श्लोके बाणश्रीहर्षवर्णनेन ताभ्यामर्वाचीनः प्रतीयते. ३. अस्यादर्शपुस्तकं तु महामहोपाध्यायस्वर्गवासिपण्डितवरदुर्गाप्रसादशर्मभिरेव संवत् १९४२ मध्ये काशीनाथशर्मणा लेखयित्वा स्वकीयपुस्तकसंग्रहे स्थापितमासीदिति बोध्यम्.

तेऽपि श्रोत्रपुटेन वाङ्मयरसं पातुं सतृष्णाः सदा
तस्मादेष रसाधिको नरहरेः काव्यश्रमः सार्थकः ॥ २ ॥
कालिन्दीजलकेलिकौतुकवती नीलाञ्जनश्यामला
चञ्चत्केकिकलापकोमलतनुर्गौराङ्गि वेणी तव ।
वाचाटैः कविभिस्त(स्त्व)दीयसुषमा बाले कथं वर्ण्यतां
वाग्मिश्रेणिशिरोमणिर्नरहरिर्यद्वर्णने मुह्यति ॥ ३ ॥
बाले वीत(चीन)पटाञ्चलेन पिहिता भीमा प्रलम्बा भृशं
श्यामाङ्गी मणिमण्डिता फणवती वेणी भुजंगी तव ।
दष्टोऽयं तरुणस्तया नरहरिस्त्वं मञ्जुहासामृतै-
रेनं जीवय सत्वरं शिवशिव प्राणानसौ त्यक्ष्यति ॥ ४ ॥
मुक्तामण्डितकर्णशुक्तिरुचिरे बिम्बोष्ठरत्नाकरे
पर्यन्तस्थितनीलकुन्तलवने लावण्यकल्लोलिनि ।
चार्वङ्ग्या मधुरस्मितामृतनिधौ शोभासमुद्रे मुखे
वत्तु(चक्षु)र्मीनमनोहरे नरहरेश्चेतोनिमग्नं सखि ॥ ५ ॥
दंपत्योर्ननु मौनमेव सुदृढं नामग्रहो न द्वयो-
र्व्रीडा हन्त विलोकने नरहरे तत्रापि तिर्यग्गतिः ।
सांमुख्ये मुखमावृणोति वनिता भ्रूभङ्गिनी सर्वदा
प्रत्यक्षो रण एव केलिसमये वैरं नु तत्प्रेम नु ॥ ६ ॥
स्मेरास्ये कलया कयापि तरुणे लीलारसप्रार्थके
नम्रास्या करवारिजेन वलयं व्यावर्तयत्यङ्गना ।
मत्कण्ठे मृदुसुन्दरे सवलयं बाहुं निधेहीत्यमुं
भावं तस्य महाकविर्नरहरिर्जानाति नान्यो जनः ॥ ७ ॥
रक्तान्येव रदक्षतानि वदने गात्रेपि रक्ता पटी
रक्तान्येव नखक्षतानि हृदये रक्ताः कटाक्षोर्मयः ।

रक्तोऽयं सविशेषमेव दयितो नित्यानुरक्ता वधू-
यूँनो रागरसात्मकं नरहरे रागाद्वयं दृश्यते ॥ ८ ॥
मानो मुक्तिमुपागतः प्रथमतः पश्चान्मिलच्चेतसो-
र्मौनं मुक्तिमुपागतं नरहरे मुक्तिं गता कञ्चुकी।
नीवी मुक्तिमुपागता रतिरसे मुक्तिं गताः कुन्तला
मुक्तिक्षेत्रमिदं महत्परिचितं मुक्तेःसुखं रागिणा ॥ ९ ॥
आलापे मधुरस्मितानि तनुते गृह्णाति कण्ठस्थलीं
तल्पं कल्पयति स्वयं नरहरे सुस्निग्धमालोकते।
आश्लेषे मृदुसीत्कृतानि कनुते(?) चाचूनि रम्ये रते
क्रीतोऽहं कतिधा न किं तदपि मां क्रीणाति लीलाशतैः ॥१०॥
अग्रे नृत्यति हावभावचतुरं नेत्रद्वयं चञ्चलं
पार्श्वे कङ्कणकिङ्किणीप्रभृतयो वादित्रमातन्वते।
गायन्ति भ्रमराः सपुष्पकबरीसौरभ्यलुब्धा इमे
रामे शंसति कौतुकं नरहरेस्तौर्यत्रिकं ते तनुः ॥ ११ ॥
कान्तिः पावकसंनिभापि सुखदस्पर्शा यथा चन्द्रिका
वक्त्रा(क्त्रे) वाक्यपरम्परा नरहरे पीयूषधारानिधिः।
अत्यन्तं कठिनौ तथापि हृदयानन्दाय वक्षोभवौ
दृक्पाता निशिताः शरा इव परं पुष्पाञ्जलिश्रेणयः ॥ १२ ॥
दूरीकृत्य दुकूलमन्त(म्ब)रवरं गाढान्धकारे गृहे
संश्लिष्टैव दुकूलकोमलतनुः सर्वात्मना सुन्दरी।
गात्रं नाम दुकूलमेव सुदृशस्तेनामुना हेतुना
संभ्रान्तस्य दुकूलगो नरहरेर्नास्तं गतः संशयः ॥ १३ ॥
केचित्क्रूरकटाक्षबाणनिहताः संपातिता भूतले
केचिद्भाषणमाधुरीहृतधियस्तिष्ठन्ति मोहं गताः।

ये केचित्प्रपलायितुं कृतधियो जालेन ते यन्त्रिता
बालेयं स्मरदेवता नरहरे आखेटकं खेलति ॥ १४ ॥

अक्षान्मुञ्चति वल्लभे वलयति स्निग्धान्कटाक्षानियं
दायं स्थापयितुं नतस्य वदनं संस्तूय संचुम्बति ।
सारीं मारयति प्रिये रसभृता भावेन सीत्कारिणी
नारी सारसलोचना नरहरे सारीफलैः खेलति ॥ १५ ॥

चित्रे कौशलमागता कृतवती पत्रे प्रियस्याकृतिं
प्राणेशस्य मुखं निपीय सुखदं भूयोऽपि संचुम्बति ।
उद्भिन्ने मकरध्वजे मुहुरियं कण्ठग्रहायाकुला
संतापेन समन्विता नरहरे संमूर्छिता दृश्यताम् ॥ १६ ॥

विश्लेषज्वरपीडितान्नरहरे संतापयत्युच्चकै-
र्दुःखं यान्ति यथा यथा विरहिणो मारस्तथा मोदते ।
वामाङ्गीकृतशैलराजतनयं पश्यन्भवं भस्मसा-
ज्जातोऽयं स्वयमेव भूतपतिना नायं कृतो भस्मसात् ॥ १७ ॥

न्यस्ताः कङ्कतिकापथि प्रणयिना भूयोऽपि कृष्टाश्च ते
निम्नत्वं न हि यान्त्यमी नरहरे हर्षं गताः कुन्तलाः ।
वेणी नाम कथं घटेत रमणी बन्धाय जातोद्यम-
स्तत्प्रेम्णा शिथिलीकृते भुजयुगे बन्धः कथं सिध्यतु ॥ १८ ॥

नेयं पश्यति मां तथापि सदयं संपश्यति भ्रूयुगं
मौने तिष्ठति मानिनी तदधरः संभाषते मां प्रति ।
गाढाश्लेषविधिं करोतु न वधूर्वक्षस्तु रोमाञ्चितं
हासं नैव तनोतु हे नरहरे नीवी ह्रसत्युच्चकैः ॥ १९ ॥

वामाङ्गीवदने विलोचनमृगद्वन्द्वं मया वीक्षितं
तेनैतन्मुखचन्द्र एव सुमते सत्यो मृगाङ्कः किल ।

चन्द्रे नास्ति मृगस्ततो नरहरिस्तर्कान्वितं भाषते
चन्द्रे चन्द्रपदप्रसङ्गवशतो जाता मृगाङ्कप्रथा ॥ २० ॥
वामांसे लुलितः किरन्परिमलं बन्धश्लथः कुन्तलो
निद्रापाटलघूर्णिते स्मरसुखध्यानालसे लोचने ।
बिम्बोष्ठो नवलाञ्छनः सरभसं रोमाञ्चितावङ्कितौ
वक्षोजौ नखलेखया नरहरेरानन्दमातन्वते ॥ २१ ॥
भास्वत्कुन्तलभारसौरभमिलद्भृङ्गालिझङ्कारकै-
र्लीलान्दोलितबाहुकङ्कणरणत्कारप्रकारैरपि ।
उद्दामस्मरकेलिकौतुकचलन्मञ्जीरमञ्जुस्वनैः
सीत्कारैर्मृदुसुन्दरं नरहरे बालारतं राजते ॥ २२ ॥
कोणे क्वापि दिशोर्भृशं नरहरे तारुण्यलक्ष्मीभृतो
वक्षस्यम्बुधरस्य संभ्रमवतीमुद्वीक्ष्य विद्युल्लताम् ।
तत्कालस्मरलोलकाञ्चनतनुर्धन्योरसि प्रेयसी
गङ्गावारितरङ्गिता हिमरुचो लेखेव सा खेलती ॥ २३ ॥
गम्भीरोऽपि समुत्सुको गुरुजनः शोभां नवामीक्षितुं
यात्यायाति मुहुर्मुहुर्नरहरे स्मेरः सखीनां गणः ।
वेषः सर्वरहस्यभावपिशुनो जाताः प्रकाशा दिशः
सिद्धिं यातु कथं मनोहरतनोः केलीगृहान्निर्गमः ॥ २४ ॥
चातुर्येण चकोरचञ्चलदृशा नूनं दृशां विभ्रमैः
सान्द्रस्नेहरसालसैर्नरहरे रागी वशं प्रापितः ।
शय्याभूषणभोजनेषु विरसः संयोगचिन्तातुरः
सर्वा विस्मृत एव देहरचनां शून्यं मनो वर्तते ॥ २५ ॥
आदर्शे वदनं प्रियस्य वदनं संयोज्य संवीक्षितं
सद्यः संमिलितं स्मितैर्नरहरे हर्षादुभाभ्यामपि ।

प्राणेशस्तु गतो विदेशमधुना मत्पातकैर्दारुणै-
रादर्शस्य किमु प्रयोजनमिति द्वेषेण दूरीकृतः ॥ २६ ॥

त्वं मां मुञ्च दयां विधेहि विरहेत्यालप्य वामभ्रुवा
विश्लेषाय समर्पिता नरहरे स्थूलाश्रुमुक्तावली ।
मूर्खः प्राणपतिर्विदेशरसिको धाम स्मरत्येव न
प्राणानेव जिघृक्षुरेष स कथं दानादिना शाम्यति ॥ २७ ॥

ज्वालाभिर्ज्वलितं जगत्त्रयमिदं मध्यं दिने मूर्छिता
यान्त्यायान्ति न मानुषा नरहरे चण्डो रविर्दीप्यते ।
कासारे किमु चक्रवाकमिथुनं विश्लिष्टमालोक्यते
कौमुद्यामिति संस्थिता विरहिणी व्यामोहमाविन्दति ॥ २८ ॥

संलापावसरे स्फुटं नरहरे दृष्टं शिरश्चालनं
दंपत्योर्वचने कदाचन मुदा हुंकारमाख्याति च ।
तेनायं पिशुनस्तृतीयमुचितं नैव द्वयोरावयो-
र्दूरीकृत्य सखीजनं वनितया दीपोऽपि निर्वापितः ॥ २९ ॥

पूर्वं तु स्नपितं विलोकनसुधाधाराशतैः शीतलैः
पश्चाच्चन्दनचर्चितं नरहरे मुक्ताक्षतैरर्चितम् ।
पुष्पैः पूजितमेव शंभुयुगलं किंतु स्फुरत्पाणिजै-
र्दन्ताश्चन्द्रकलाः शिवप्रियतमास्तत्पूजनं पूजनम् ॥ ३० ॥

अस्या नीलसरोजरम्यनयने नीलं यथैवाञ्जनं
जात्या चन्दनशीतले स्तनतटे श्रीखण्डलेपो यथा ।
गात्रे काञ्चनपत्रसुन्दरतरे भूषा यथा काञ्चनी
बिम्बोष्ठेऽपि तथा न किं नरहरे ताम्बूलरागप्रभा ॥ ३१ ॥

कुर्वन्नैव महोत्सवं नरहरे कामाधिकैः संभ्रमैः
कामिन्यै मिलनस्य पृच्छति सुखं प्राणेश्वरः कौतुकी ।

वक्तुं नार्हति लज्जया परवशा संमीलयन्ती दृशौ
कर्णे तस्य तु किङ्किणीकलरवस्तस्याः सुखं शंसति ॥ ३२ ॥
नाथं नन्दयितुं सखे नरहरे माणिक्यमञ्चे स्थिता
वीणां वादयति स्म विस्मयमयीं जेगीयमानाङ्गना।
गाने स्नेहसमन्वयः समधिको वीणाक्कणे नास्त्यसौ
तुल्यत्वे सति तारतम्यमनयोः सुज्ञेन विज्ञायते ॥ ३३ ॥
लावण्यैकनिधे विनोदजलधे मीनाक्षि मन्दस्मिते
नानाविभ्रमनायके नरहरिर्दासानुदासस्तव।
आज्ञाकारिणि किंकरे परिसरे प्राणान्तपर्यन्तिनी
दुष्प्रेक्षा दृढमानबन्धरचना रामे किमर्थं कृता ॥ ३४ ॥
उच्चैर्मन्दिरमुज्ज्वलं समुदितः पूर्णः पुरश्चन्द्रमाः
प्रेमार्द्रस्तरुणः सखे नरहरे रूपाधिका नायिका।
पर्यङ्के स्फुटफेनदुग्धधवले मञ्जुस्मितालंकृता
लीलाः साधु निपीय हर्षजलधौ मग्नः सखीनां गणः ॥ ३५ ॥
पूर्वं चारु निरीक्ष्य पाणिकमलेनामृश्य संबोधितः
पश्चात्खेलनलीलया मृदुपदैः सस्नेहमध्यापितः।
क्रीडापञ्जरयन्त्रितो नरहरिर्नक्तं यथा लालितः
क्रीडापञ्जरयन्त्रितो वनितया कीरस्तथा लालितः ॥ ३६ ॥
चन्द्रे लोचनगोचरे सुखनिधे सा निश्चिनोत्यागमं
कञ्चुक्या हृदि संवृतप्रणयिनं निःसंशयं श्लिष्यति।
कीरे कुर्वति संकथां प्रियतमं संभाषते संभ्रमैः
पद्मं चुम्बति चेन्मुखं नरहरेश्चुम्बत्यसौ तन्मयी ॥ ३७ ॥
तेना.....न्वय...
..............स्य कवेरिवोक्तिरबला किं ते रसं दास्यति।

संप्राप्तानुनया विलासरसिका शृङ्गारहाराञ्चिता
साहित्येन समन्वि[ता] नरहरेर्वाणीव सा सेव्यताम् ॥ ३८ ॥
जानाम्येव यथा सुखं सुखनिधेः सांनिध्यतो लभ्यते
तादृङ् नास्ति सुखं सखे नरहरे लोकेशलोकेऽपि न ।
किंतु प्राञ्जलिरेष नम्रनयनो विज्ञापनामाचर-
न्कान्तश्चाटुचमत्कृतानि तनुते मानस्तदर्थो मम ॥ ३९ ॥

अथ स्रग्धरा—

केयं काश्मीरगौरी सकुसुमयमुनावर्तकान्तालकान्त-
ग्रन्थिः पूर्णेन्दुवक्त्रा नवमृगनयना पक्वबिम्बाधरश्रीः ।
मन्दस्मेरा सुपीनस्तनभरविनमन्मुष्टिमेयोदरश्रीः
श्रोणिप्राग्भारगुर्वी नरहरिहृदयानन्दिनी मन्दमेति ॥ ४० ॥
भाले कस्तूरिकाभो वदनसरसिजे नीलचैलाव(नाञ्च)लाभः
कण्ठे काचव्रजाभः कुचकलशयुगे कञ्चुकीसंगमाभः ।
श्रोणीशैलेऽम्बुदाभो नरहरिमनसि प्रेमपाशप्रकाशो
लक्ष्मीं धत्ते नवीनां दिशि दिशि लुलितः कामिनीकेशपाशः ४१
रक्ताम्भोजं हसद्भिः करचरणतलैर्लोचनश्यामपद्मा
हेमाम्भोजाभिरामं मुखमनुदधती बालरोलम्बलक्ष्मीम् ।
नीरक्रीडानुरक्तस्मरनिहितघटद्वन्द्ववक्षोभवाङ्का
पुण्यैरालोकितेयं नरहरिहृदयानन्दिनी रूपवापी ॥ ४२ ॥
चन्द्रश्रीतस्करं तन्मुखमथ नयने तस्करे मीनकान्तेः
कुन्दश्रीतस्करेयं रदरुचिरधरस्तस्करो बिम्बभासः ।
बिल्वश्रीतस्करौ द्वौ वपुरपि निखिलं तस्करं हेमलक्ष्म्या
वस्त्रैराच्छादितोऽयं कलय नरहरे तस्कराणां समूहः ॥ ४३ ॥

अथ मन्दाक्रान्ता—

तामुत्तुङ्गस्तनभरनमन्मध्यभागामरालै-
रासिञ्चन्तीं नयनवलनैः कामिकामाङ्कुरालीम् ।
पूर्णप्रेम्णा रहसि मिलितामुच्चरोमाञ्चरम्यां
कामप्यतः(न्तः) कविनरहरे कामिन(नीं) कामयामि ॥४४॥
नासाभित्तिश्रवणविवरैर्वारितं दीर्घभावा-
न्नेत्रद्वन्द्वं चतुरचपलं कस्य नाकर्षणाय ।
····स्ताम्रं दशनवसनं कं न कुर्याद्वशं वा
हासोल्लासः[····]नरहरे कस्य नो विस्मयाय ॥ ४५ ॥
नम्रं कृत्वा मुखहिमरुचिं पद्मपत्रेक्षणायाः
संपश्यन्त्याः स्फुरितमधुरं नीविबन्धं स्मितेन ।
लीलारङ्गं कविनरहरौ याचमाने नितान्त-
स्तूष्णीं भावः कथयति सखे लालसं खेलनेषु ॥ ४६ ॥

अथार्याः—

चौरसुजनप्रसङ्गे बन्धश्चौरस्य नरहरे नियतः ।
मदनमहीपतिराज्ये चौरैः सुजना निबध्यन्ते ॥ ४७ ॥
तृष्णातरलितचक्षुः पश्यति सरसीं यथा पथिकः ।
एवं यदि सरसी स्यान्नरहरिरुपमां ब्रवीतु दम्पत्योः ॥ ४८ ॥
रमणगृहं प्रति रमणं नयनं नयति स्म नम्रनयनायाः ।
नयनेन नयनमस्या नयनपदं नरहरे भजति ॥ ४९ ॥
आ ईषन्ननुवाणीमाननमङ्गीचकार परिरम्भे ।
तेनैवाननमस्या आननमिति नरहरिर्वदति ॥ ५० ॥
परिपूर्णचन्द्रलक्ष्म्या यदास्यते मुख्यमास्यं तत् ।
तव तन्वि तादृगास्यं नरहरिरन्यत्र लक्षणां वदति ॥ ५१ ॥

नरहरिहृदय इवास्या विनिमज्जन्त्या रसाधिके सरसि ।
दर्शितरङ्गतरङ्गः प्रससार निरन्तरः स्नेहः ॥ ५२ ॥
त्वं हावभावसहिता नरहरिकवितेव मञ्जुलं वदसि ।
श्लेषे न कुरु विलम्बं श्लेषो हि सुखार्णवः सुमुखि ॥ ५३ ॥
चन्दनघनमलयद्रुयसौरभलाभाय भुजगवनितेयम् ।
मृदु चलति नाभिकुहरान्नरहरिराख्याति रोमराजिरिति ॥ ५४ ॥
.... ।
सुखमिति वक्तुं युक्ते मुखमिति स लिपेर्विपर्यासः ॥ ५५ ॥
नरहरिकरेण गलिते नीवीबन्धे सुवर्णवर्णायाः ।
हरभस्मितोऽपि मदनो जन्म नवीनं पुनः प्राप ॥ ५६ ॥
क्षीणतया न हि खिद्यति नरहरिरभ्यागतः स्वगृहे ।
परिचेष्यते कथं मामिति वनिता दुःखिता भवति ॥ ५७ ॥
पञ्जरयन्त्रितचञ्चलचकोरचर्याञ्चितं चक्षुः ।
भवनगवाक्षगताया नरहरिरवलोक्य विस्मयं विशति ॥ ५८ ॥

अथ प्रहर्षिणी—

बिम्बोष्ठे करच[र]णे सुरक्तवर्णा रोमालीचिकुरकटाक्षकृष्णकान्तिः ।
अत्यच्छा स्मितविषये विमोहनीयं निर्णीता नरहरिणा मुकुन्दमाया ५९
बध्नन्ती करकमलेन केशपाशं पश्यन्ती मणिमुकुरे मुखारविन्दम् ।
मीनाक्षी कुटिलकटाक्षखड्गधारानिक्षेपान्नरहरिमञ्जसा जघान ॥ ६० ॥
चार्वङ्ग्या नरहरिराहतो विहारे मञ्जीरक्वणितवता पदाम्बुजेन ।
संसिक्तः स तु सुधयैव मोदमानः प्रागल्भ्यं द्विगुणमवाप खेलनेषु ६१
धम्मिल्लस्थलविगलत्प्रसूनजाला कस्तूरीतिलकलसद्विशालभाला ।
एकान्ते नरहरिसंगमे रसाला बाला [सा] मदनकलाविलासशाला ६२

अथ मालती—

निरवधिरतिरङ्गप्रेमरोमाञ्चिताङ्गी
कतिपयरदरेखारम्यबिम्बाधरश्रीः।
स्फुरति हरिणनेत्रा हारिहावा हसन्ती
नरहरिसुखमूर्तिस्तस्करा चित्तवृत्तेः ॥ ६३ ॥

नरहरिकविराजव्याजतः शारदेयं
कथयति बत भावं कामिनी कुन्तलानाम्।
तरुणशकुनिहिंसाकर्महेतोः किलेयं
[स]विषशरकिरातव्याततता वागुरन्ति ॥ ६४ ॥

किमपि नयनशोभा नाम पानीयमस्या
लसति नयनयुग्मे कृष्णसारेक्षणायाः।
नरहरिकविरेवं वक्ति कृत्वा विचारं
किमु सरिति न तावत्सागरे सप्तमेऽपि ॥ ६५ ॥

कलय कनकवल्लीतुल्यभासोऽङ्गनायाः
कुटिलतरकटाक्षप्रेरणाशृङ्खलाभिः।
जिगमिषुरपि यत्र क्वापि कामं विलासी
नरहरिकविराजो नागराजो निरुद्धः ॥ ६६ ॥

अमलकमलशोभाखण्डने पण्डितेयं
तुहिनकिरणलक्ष्मीजित्वरी तुण्डकान्तिः।
नरहरिकविराजः कामलोलः कदाहं
मधुरमधरमस्याः केलिकाले पिबेयम् ॥ ६७ ॥

दशति मृदु धुनीते कुन्तलं मञ्जुवाणी
भयति मधुरमोष्ठं रम्यरोमाञ्चितेन।

रचयति रचनाभिर्भावसंभाविताभि-
　　र्नरहरिपरिरम्भे संभ्रमं सारसाक्षी ॥ ६८ ॥
झगिति न कितवानां संभवैः संभ्रमाणां
　　नरहरिकविचेतश्चेतसा चन्द्रमुख्याः ।
नयननलिनपाली संप्रनालीसमेतं
　　सलिलमिव सरस्योः सामरस्यं समेति ॥ ६९ ॥
सविनयमनुवारं वच्मि कृत्वा विचारं
　　नरहरिपरिहारं मा कृथा दुःखभारम् ।
हृदि कुरु नवहारं मुञ्च कोपप्रकारं
　　कुरु पुलिनविहारं सुभ्रु संभोगसारम् ॥ ७० ॥

अथ पृथ्वी—

सहैव हरिनामभिर्ननु न पाठितामप्यसौ
　　प्रियावचनमाधुरीं किल पपाठ कीरः सुधीः ।
न सन्ति कति पक्षिणो नरहरे शुकः केवलं
　　लभेत कथमन्यथा वचनमाधुरीमीदृशीम् ॥ ७१ ॥
यदा नरहरिस्तया ललितहासमङ्गीकृतो
　　विलासरसरञ्जितैः स्मरतरङ्गितैरक्षिभिः ।
दृगन्तकुसुमोत्करैः सकुतुकं सखीभिः कृतं
　　तदैव करतालिकागणझणत्कृतैर्मङ्गलम् ॥ ७२ ॥

अथ वसन्ततिलकम्—

वेणीधृतां नरहरिः कविनायकोऽपि
　　श्यामच्छविं न किल वर्णयितुं समर्थः ।
यद्गौरवेण कनकद्रवगौरगात्री
　　श्यामापदं शिरसि चन्द्रमुखी बिभर्ति ॥ ७३ ॥

कर्णान्तदीर्घनयना नयनाभिधाने
द्वे दीर्घिके नरहरे रसपूरपूर्णे ।
लज्जाभिधां ललितनावमिहाधिरूढो
रत्या समं विहरते मदनो विनोदी ॥ ७४ ॥
एकार्णवे भवति नाम वरावरस्य
श्रीकेशवौ रहसि केलिरसं भजेते ।
एकार्णवे हि तमसोऽपि घने निशीथे
लीलारसं नरहरे तरुणौ भजेते ॥ ७५ ॥
आलक्ष्य दर्पणतले दयितेन दत्तं
बिम्बाधरान्तरदनक्षतचारुभावम् ।
चन्द्रानना नरहरे प्रणयप्रमोदा-
दिन्द्रासनस्थितिसुखानि तिरस्करोति ॥ ७६ ॥
मन्दोदरी मदनताण्डवपण्डितेन
तुण्डेन कुण्डलवता रदखण्डितेन ।
रागारुणा नरहरे रतिरङ्गरम्यं
रामा रसेन रमणं रमयांचकार ॥ ७७ ॥
लीलां विधाय रतिराजरसाभिरामां
लीलान्तरं नरहरौ ननु याचमाने ।
भ्रूभङ्गरङ्गरुचिरं वनितावितीर्णं
ताटङ्कताण्डवसुखं कथयामि कस्मै ॥ ७८ ॥
प्रक्षीणमध्यविशदस्तनतुङ्गभावा
कन्दर्पदर्पदरमन्थरलोचनश्रीः ।
हेमाचलस्थलविशालनितम्बबिम्बा
बिम्बाधरा नरहरेर्हृदयं धिनोति ॥ ७९ ॥

अत्यन्तचीनवसनेन पिधाय कायं
निद्रां गता समणिभूषणभूषिताङ्गी ।
प्रत्यक्षतोऽपि परमां रुचिमावहन्ती
चन्द्रानना नरहरेर्नयने जहार ॥ ८० ॥

मञ्जीरमुग्धमरुणं चरणारविन्दं
मन्दं निधाय वदनं परिवर्तयन्ती ।
आलोकितुं नरहरिं भ्रमराभिरामै-
र्नेत्रैरियं निभृतमातुरतां व्यनक्ति ॥ ८१ ॥

स्निग्धेन लोचनयुगेन यथा रतान्ते
दृष्टस्तया नरहरिः स्मरकेलिदक्षः ।
एणीदृशा किल तथैव कटाक्षितोऽसौ
पुष्पाञ्चितो विलुलितो घनकेशपाशः ॥ ८२ ॥

कण्ठे निधेहि नवचम्पकदामरम्यं
तुङ्गौ स्तनौ मम विलेपय चन्दनेन ।
एवं वचो नरहरिं प्रति तेऽनुरूपं
रूक्षस्य हन्त वचसः सखि नावकाशः ॥ ८३ ॥

सौन्दर्यकुण्डमबले तव नाभिकुण्डं
रोमावलीपरिसरे मृदुशाद्वलश्रीः ।
पातुं गतं नरहरेर्नयनद्वयं चे-
न्नैवागतं सुतनु तर्हि निमग्नमेव ॥ ८४ ॥

पातुं क्षमो नहि पुरो विहितापराधः
केशप्रसाधनविधानपरो बभूव ।
व्यावृत्य सापि झटिति स्मरबाणनुन्ना
जग्राह तं नरहरेः करपङ्कजेण ॥ ८५ ॥

स्वैरं निपीय वदनं मदनाभिरामं
लीलारसेन चिबुकं स्पृशति प्रवीणे ।
स्वीयं वपुर्नरहरे सकलं समर्प्य
नानृण्यमाप सुमुखी सुखदस्य तस्य ॥ ८६ ॥
यूना प्रणम्य चरणौ शिरसा गृहीतौ
संचुम्बितौ नयनयोरपि योजितौ च ।
जाता प्रसादसुमुखी चरणान्तरेण
जग्राह यन्नरहरेः सघनः प्रसादः ॥ ८७ ॥
निद्रां गतापि नयनप्रियमेव कृष्णं
निम्नादरान्नरहरे हृदि लालयन्ती ।
स्वप्नेऽपि जागरकथामनुभूय राधा
न स्वप्नजागरविभेदमुरीचकार ॥ ८८ ॥
प्राणाधिके झटिति संमुखमागते सा
चैलाञ्चलेन हि बभूव कृतावधाना ।
लज्जाञ्चलेन विदधे वदनं तथेयं
रागी यथा नरहरे पिहितं विवेद ॥ ८९ ॥
श्री**कालिदास**कवितासुकुमारमूर्ते
बाणस्य वाक्यमिव मे वचनं गृहाण ।
श्रीहर्षकाव्यकुटिलं त्यज मानबन्धं
वाणी कवे**र्नरहरे**रिव संप्रसीद ॥ ९० ॥
धम्मिल्लबन्धमवलोक्य सुगन्धसिन्धुं
विद्यावतो नरहरेरुदितो वितर्कः ।
साकं विचित्रसुमनोभिरुदारकेश्या
बद्धानि किं नु सुमनांसि रतिप्रियाणाम् ॥ ९१ ॥

धम्मिल्लबन्धमवलोक्य विलासवत्याः
　किं राहुरेष इति संवलितः क्षणेन ।
चन्द्राननावदनचन्द्रघनप्रसादै-
　र्दूरीकृतो नरहरेर्मनसो वितर्कः ॥ ९२ ॥
चन्द्राननावदनचन्द्रविलोकनेन
　चन्द्रोऽयमेव जगतीति हृदि प्रवृत्तः ।
लीलाचलन्नयनखञ्जनदर्शनेन
　दूरीकृतो नरहरेर्मनसो वितर्कः ॥ ९३ ॥
बालाविलोचनमृगद्वयदर्शनेन
　जातोऽपि कोमलमृगद्वयपक्षपाती ।
कन्दर्पकेलिचतुरेण निरीक्षणेन
　दूरीकृतो नरहरेर्मनसो वितर्कः ॥ ९४ ॥
मन्दस्मितामृतमहारसपूरपूर्णे
　वामाधरे नरहरेरुदितो वितर्कः ।
अस्याः सरोरुहदृशः किमु भालवर्ती
　सिन्दूरपूरतिलकः प्रतिबिम्बितोऽयम् ॥ ९५ ॥
शोणेऽधरे नरहरेः कवितारसेन
　स्यात्पद्मराग इति संवलितो वितर्कः ।
पीते तदैव किल तत्र सुधारसाले
　दूरीकृतो मधुरतागुणसेवनेन ॥ ९६ ॥
वक्षोभवे नरहरेर्मनसो वितर्को
　जातोऽपि हेमकलशद्वयपक्षपाती ।
दूरीकृतो झटिति लोलविलोचनाया-
　श्चन्द्रार्धसुन्दरनखक्षतलक्षणेन ॥ ९७ ॥

नास्त्येव नूनमुदरं किमु किंचिदस्ती-
त्येवंविधस्तरलितोभयपक्षपातः।
रोमावलीं कलयता करपल्लवेन
दूरीकृतो नरहरेरुदितो वितर्कः॥ ९८॥
स्वैरं निपीय रुचिरां तनुरोमराजीं
चित्ते भृशं नरहरेरुदितो वितर्कः।
अत्यन्तभास्वरतया वपुषोऽङ्गनाया
वेणी विनीलविषयः प्रतिबिम्बितोऽयम्॥ ९९॥
किं वा मृदूनि कुसुमानि किमु प्रिया स्या-
देवंविधः कुसुमतल्पगतस्य यूनः।
उत्तुङ्गपीनकठिनस्तनमर्दनेन
दूरीकृतो नरहरेर्मनसो वितर्कः॥ १००॥
हस्तावलोकनविधौ स्फुरितोऽपि दैवा-
दुत्फुल्लकोकनदयुग्मकृतावधानः।
रत्नाङ्गुलीयनखराजिनिरीक्षणेन
दूरीकृतो नरहरेर्मनसो वितर्कः॥ १०१॥
जङ्घाद्वये जघनसुन्दरदर्शनाया
रम्भाद्वयं किमु भवेदिति संप्रवृत्तः।
स्पर्शेन कामसुखदेन विनोदभाजा
दूरीकृतो नरहरेर्मनसो वितर्कः॥ १०२॥
संचारचारुचरणद्वयसंनिधाने
हंसद्वयं किमु भवेदिति संप्रवृत्तः।
हंसस्वनप्रजयिहंसकसि(शि)ञ्जितेन
दूरीकृतो नरहरेरुदितो वितर्कः॥ १०३॥

ताटङ्करत्नरचनामवलोक्य रम्या-
मेवंविधो नरहरेरुदितो वितर्कः ।
कन्दर्पशास्त्रपठितानि वसन्ति मन्ये
रत्नानि विभ्रमविलासरसात्मकानि ॥ १०४ ॥
लोका वदन्ति सखि रत्नललन्तिकेयं
तुङ्गस्तनान्तरगता हृदि राजतीति ।
ताम्बूलचर्वणरसप्रतिबिम्बरूपं
तर्काधिकं नरहरेर्मतमन्यदेव ॥ १०५ ॥
किं मानवीयमथवा स्मरदेवतेय-
मेवंविधो मनसि ते लसितो वितर्कः ।
तत्खण्डनं नरहरे न तवास्ति युक्तं
सत्यं हि सा सुवदना स्मरदेवतैव ॥ १०६ ॥
शाटीं लसत्कुसुमचित्रवतीं वसाना-
मालोकितुर्नरहरेरुदितो वितर्कः ।
रङ्गस्थलीं गमयितुं कुसुमायुधेन
क्षिप्तैर्विचित्रकुसुमैरिव संवृताङ्गी ॥ १०७ ॥
अध्यापितः करतले कलितः किलायं
कीरस्त्वया कुवलयाक्षि कुतूहलेन ।
अध्यापनेन जनिता स्वरमाधुरीदं
तत्वं परं नरहरिः सखि वेद नान्यः ॥ १०८ ॥
पाणौ स्थितो नरहरे मुकुरोऽङ्गनायाः
कर्तुं छलेन वदनं ननु सद्वितीयम् ।
तेनैव हन्त मुखकान्तिपराजितेन
विस्पष्टमेव कथितं मुखमद्वितीयम् ॥ १०९ ॥

भाले विधाय तिलकं तव कुङ्कुमेन
कण्ठे निधाय दयिते नवरत्न(मालाम्) ।
नीराजनां नरहरिर्वितनोति नेत्रै-
र्यापि किं न कुरुषे सुमुखि प्रसादम् ॥ ११० ॥

कण्ठे लगन्तमधरामृतपानलोलं
लीलाकुलं नरहरिं प्रति संभ्रमेण ।
दूरे भवेति वचनं यदुवाच वामा
मन्ये तदेव निकटे भवलक्ष्यतुल्यम् ॥ १११ ॥

अथ प्रान्ते शिखरिणी—

तया मुक्तः श्वासस्तदभिमुखमाधाय वदनं
तदन्यासंपर्कं स्वकृतमपि सस्मार दयितः ।
ह्रिया नम्रे तस्मिन्कृतवति नतिं मानसमयीं
प्रसादं कुर्वाणा सखि नरहरे साम विदधे ॥ ११२ ॥

अलिश्यामं व्योम स्फुटमृगमदः प्रच्छदपट-
परिस्तीर्णास्तारा: सखि नरहरे ताः सुमनसः ।
अनल्पोऽयं तल्पः सरसरमणी किंच रजनी
कलानाथो नाथः कलय समयोऽयं रसमयः ॥ ११३ ॥

चमत्कारं कुर्वन्प्रतिपदमलंकारसहितः
पदन्यासो यस्याः प्रकृतिमधुरो भावरुचिरः ।
निदानं तादृश्या गतिगमकवित्रां(?) बलभृतः
समुद्रः पद्मायाः सरसकविताया नरहरिः ॥ ११४ ॥

शृङ्गारशतकशतकं यदपि निरुक्तं पुरातनैः कविभिः ।
तदपि तुलां नारोहति नरहरिशृङ्गारशतकस्य ॥ ११५ ॥

इति [श्रीकविवर]नरहरि[विरचितं] शृङ्गारशतकम् ।

उत्प्रेक्षावल्लभकविविरचितं

भिक्षाटनकाव्यम् ।

प्रथमा पद्धतिः ।

कल्याणमावहतु वः शिवयोस्तदेकं
  गात्रं यदीयमसितच्छविकण्ठमूलम् ।
वामेतरेऽपि कुरुते सितभासि भागे
  प्रारब्धशैलतनयापरिणामशङ्काम् ॥ १ ॥

कार्श्यं क्षिणोतु भवतां परमेश्वरस्य
  भिक्षाटनं तदनुसंहितदेहिशब्दम् ।
यन्मानिनामपि विधेर्विपरीतभावे
  याच्ञोक्तिदैन्यसहमेव मनश्चकार ॥ २ ॥

सद्यस्तुषारगिरिजौषधिसेवयेव
  यः स्वोपभुक्तगरलं शमयांचकार ।
अन्यैरशक्यशमनाज्जननामयाद्वः
  प्रायादपायनिलयादयमादिवैद्यः ॥ ३ ॥

नित्यं करोतु भगवान्स करीन्द्रवक्त्रः
  प्रारभ्यमाणशुभकर्मविघातलोपम् ।

---

१. अस्य च कवेः 'उत्प्रेक्षावल्लभः' इति नाम कव्यन्तरदत्तमेव प्रतीयते. वास्तविकं नाम तु प्रथमपद्धतिसमाप्तिपद्यदर्शितं 'शिवभक्तदासः' इति भवेत्. यथा नवमगुच्छकमुद्रितषष्ठकाव्यसुन्दरीशतककर्तुः श्रीगोकुलस्य 'भारत्यैव क्रियते स्तोत्रैः संतुष्टया द्विजद्वारा । श्रीगोकुलस्य सुकवेरुत्प्रेक्षावल्लभेत्यभिधा ॥' इति श्लोकदर्शितमुत्प्रेक्षावल्लभनाम. अस्य देशकालौ न ज्ञायेते.

दोषानुषङ्गरहितः स शिवोऽपि यस्य
भृङ्गेषु गण्डतलचुम्बिषु साभ्यसूयः ॥ ४ ॥
वाल्मीकिरस्तु विजयी प्रथमः कवीनां
तस्यानुसारसरलः स च कालिदासः ।
अन्ये भवन्तु जयिनः कवयोऽथ मा वा
एषां कृतः कृतिषु नैव मयावगाहः ॥ ५ ॥
सन्त्येव सूक्तिरसिका बहवो मनुष्याः
स्वर्गौकसो नवसुधारसनिर्वृताश्च ।
तौ दुर्लभौ कविवचःस्खलितस्य सोढा
मर्त्येषु सागरगरस्य च यः सुरेषु ॥ ६ ॥
भूयानसत्कविजनो जगतीति खेदा-
न्मौनग्रहः सुकविभिर्न कदापि कार्यः ।
काकैरसह्यनिनिदैर्निचितेऽपि लोके
किं कोकिला विदधते नहि कूजितानि ॥ ७ ॥
दुर्दान्तदुर्जनचिते भुवने नराणां
प्रायो वरं विकलतैव कलोपपत्तेः ।
राहुग्रहेण न कदापि कलाविहीनः
पूर्णस्तु हन्त परिभूयत एव चन्द्रः ॥ ८ ॥
एकेन सूक्तिमणिना हृदयंगमेन
प्राज्ञस्य सत्कविपदं कुकविः प्रयाति ।
वक्षोगतेन मणिनेव परस्य पुंसो
रत्नाकरत्वगणना लवणार्णवस्य ॥ ९ ॥
नापेक्षते महदपि प्रथमानदोषं
निर्दोषमल्पमपि नन्दति वस्तु लोकः ।

मूर्ध्ना बिभर्ति कृशमप्यनिशं सुधांशुं
　　शंभुः कलङ्करहितं न तु पूर्णबिम्बम् ॥ १० ॥
सर्वे खलास्तिलकयन्तु चिराय पृथ्वीं
　　यत्संभवो बहुमतेः सुजनेषु हेतुः ।
घोरेषु घर्मदिवसेष्वतिलङ्घितेषु
　　छायाद्रुमान्मृगयते नहि कोऽपि मर्त्यः ॥ ११ ॥
सन्तः क्षतानि जनयन्तु यथेष्टमस्या-
　　माभाति तैरधिकमेव सरस्वती मे ।
दत्तं क्षतं प्रियतमैरुपभोगकाले
　　किं मण्डनाय न भवेद्वरसुन्दरीणाम् ॥ १२ ॥
सन्त्येव केऽप्यमितवाङ्मयदुर्विदग्धा-
　　स्तेषां पुरः सुकविभिः स्वगिरः प्रकाश्याः ।
तेजस्यपि प्रवितते सति तिग्मरश्मे-
　　र्मुञ्चन्ति केचिदुपला निजमल्पतेजः ॥ १३ ॥
भूत्वा चिरेण गलिताः कति नाम सन्तः
　　पृथ्वीश्वराश्च कति नाम तथेतरेऽपि ।
अद्यापि कीर्तिवपुषः कवयः पृथिव्यां
　　जीवन्ति तेष्वभिहितस्तुतयोऽथवा तैः ॥ १४ ॥
मा मा परत्र विषये विषमेक्षणे मे
　　तस्मिन्सदा पततु हीनगुणापि वाणी ।
यो मूर्ध्नि मुग्धहृदयो जनगर्हणीयां
　　धत्ते सुधांशुकलयैव सहास्थिमालाम् ॥ १५ ॥
आकर्णयन्तु मम सूक्तिविदः प्रबन्धं
　　तैर्नन्द्यतां पुनरयं खलु निन्द्यतां वा ।

तत्कर्णगोचरतयैव भवेद्दरीया-
नस्माकमस्तु सफलो रचनाप्रयासः ॥ १६ ॥

वृत्तं वसन्ततिलकं विषयः शिवस्य
भिक्षाटनं कविरसौ शिवभक्तदासः[1]।
शृङ्गार एव हि रसस्तदिह प्रबन्धे
श्रद्धा न कस्य यदि सूक्तिविनोदशीलः ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये काव्यमुखपद्धतिः प्रथमा।

द्वितीया पद्धतिः।

भिक्षाटनेन पुरुहूतपुराङ्गनाना-
माकस्मिकोत्सवविधायिनि भूतनाथे।
तासामनङ्गशरजर्जरमानसानां
नानाविधानि चरितानि वयं वदामः ॥ १ ॥

रथ्यागतस्य गिरिशस्य विलोकनाय
निर्गन्तुकाममनसो वनिता गृहेभ्यः।
नैजाभिरूप्यगुणदर्शितपौनरुक्त्य-
माचार इत्यभिमतं परिकर्म चक्रुः ॥ २ ॥

चन्द्रस्य संचितकलस्य शरत्प्रसादो
गन्धद्विपस्य च पुनर्मदिरोपयोगः।
प्रागेव यौवनपरिष्करणे शरीरे
भूयोऽपि भूषणविधिः प्रमदाजनस्य ॥ ३ ॥

लाक्षांशयातुमवलम्बितमात्रमेव
सख्याः करेण तरुणाम्बुजकोमलेन।

---

1. 'शिवदासदासः' इति पाठान्तरम्।

ईशान्तिकव्रजनविघ्नभुवा रुषेव
　　कस्याश्चिदग्रपदमाशु बभूव रक्तम् ॥ ४ ॥
कस्याश्चिदग्रपदमाशु सखी विधाय
　　लाक्षाक्तमेकमपरग्रहणे प्रसक्ते ।
आरञ्जितेतरविवेकमपारयन्ती
　　कर्तुं मुहूर्तमनयोः स्तिमितावतस्थे ॥ ५ ॥
कस्याश्चिदञ्चितदृशश्चरणारविन्दे
　　नैपथ्यकर्मनिपुणेन सखीजनेन ।
आमुक्तमेव मणिनूपुरमुन्मदस्य
　　मुक्तःक्षणेन निगलो मदनद्विपस्य ॥ ६ ॥
काचिद्गतित्वरणलुप्तमतिश्चकार
　　चूडामणिं चरण एव चकोरदृष्टिः ।
यः स्थापयत्यसम एव पदे स्वमूर्धा
　　संभाव्यमस्य किमहो न जनस्य हास्यम् ॥ ७ ॥
उद्दामकामकरचापविकल्पमौर्वीं
　　पुंवर्गचित्तमृगवञ्चनमार्गरज्जुम् ।
काञ्चीं मदीयवलयान्न बहिः पुमर्थ
　　इत्यूचुषीं कलरवेण बबन्ध काचित् ॥ ८ ॥
तां दिव्यसिन्धुपुलिनाकृतिभाजि काचि-
　　त्काञ्चीं नितम्बफलके कलयांचकार ।
उत्तीर्णभीमजननाम्बुधयोऽपि मुक्ता
　　आमाश्रिता जघनसंगमकौतुकेन ॥ ९ ॥
मुक्तेरपि प्रियतमाजघनोपभोगः
　　श्रेयान्न चान्यमिह वस्तुनि नः प्रमाणम् ।

यत्पश्यतायतदृशो रशनाकलापे
मुक्ता अपि स्वयमहो पुनरेव बद्धाः ॥ १० ॥
पीनस्तनद्वितयधारणकर्शितस्य
मध्यस्य मण्डनविधिं न चकार काचित् ।
निःशङ्कमन्यभरनिर्वहणेन जाता-
त्कार्श्यात्परं न खलु मण्डनमस्ति किंचित् ॥ ११ ॥
हारेण च स्तनयुगं परिभूष्य पीन-
मत्यायतं च जघनं रशनागुणेन ।
मध्यस्तु हन्त न कयापि विभूषितोऽभू-
द्रिक्तः सनाभिरपि नैव हि माननीयः ॥ १२ ॥
पङ्कोद्भवत्वपरिवादभयान्मृगाक्ष्या
जातं सरोजयुगलं कुचवेषधारि ।
शक्यं न धातृविहितं परिहर्तुमस्य
भूयोऽपि येन घनचन्दनपङ्कयोगः ॥ १३ ॥
न्यस्तानि शङ्खवलयानि करे कयाचि-
त्तानीन्दुखण्डघटितानि ममैष तर्कः ।
अस्या निसर्गमृदुपाणिसरोजमेषा-
मामोचने झटिति यन्मुकुलीबभूव ॥ १४ ॥
एकावलीकलितमौक्तिककैतवेन
कस्याश्चिदुन्नतपयोधरयुग्मसेवाम् ।
चक्रुर्मनांसि यमिनामतिनिर्मलानि
कंदर्पमुक्तशरपातकृतान्तराणि ॥ १५ ॥
हाराञ्चितं कुचतटं जघनं च काञ्च्या
कृत्वा कयापि न विभूषित एव मध्यः ।

स्फीते परं बहुमतिर्भुवने जनाना
　　मप्यन्तरङ्ग पदवीजुषि नैव रिक्ते ॥ १६ ॥
दास्यामि हारहरिचन्दनकुङ्कुमानि
　　दाक्ष्यं यदा हरवशीकरणं तदा ते ।
इत्यात्मनः स्तनमुपांशु निगद्य काचि-
　　त्सर्वेतराङ्गपरिकर्मविधिं चकार ॥ १७ ॥
अन्याः सखी सपदि कालमषीप्रयोगा-
　　न्नेत्रोत्पलं द्विगुणमोहनमेव चक्रे ।
यद्वीक्ष्य कामुकजनो गलमीश्वरस्य
　　निःशेषलुप्तगरलं गणयांचकार ॥ १८ ॥
नून विदग्धजनकृत्यमतर्क्यपाकं
　　लाक्षारसः प्रणयिना वनिताजनेन ।
कस्याश्चिदोष्ठपुट एव कृतः समस्तं
　　यूनां मनः सपदि लम्भितरागमासीत् ॥ १९ ॥
काचित्स्वकीयदशनानि विशोधयन्ती
　　बिम्बाधरोष्ठरुचिसंगमपाटलानि ।
आदर्श एव परिवारजनोपनीते
　　दृष्ट्वा न जात्वपि पुनर्विरराम रामा ॥ २० ॥
प्रागेव मोहनमथाञ्जनयोजनेन
　　चक्रे तथामृगदृशो नयनं सखीभिः ।
पश्यन्यथा युवजनो गलमीश्वरस्य
　　निःशेषलुप्तगरलं गणयेदशेषः ॥ २१ ॥
साम्ये मिथः स्थितवतोर्भुवने जनानां
　　वैषम्यबुद्धिरुभयोः समदर्शनेन ।

इत्याकलय्य किल कापि विलोचनान्ते
कर्णद्वये ललितमुत्पलमाततान ॥ २२ ॥
तामार्द्रचन्दनरसेन सखी ललाटे
लेखां मदालसदृशो विदधे विदग्धा ।
यां वीक्ष्य शंभुरपि मुग्धजटाशशाङ्क-
शङ्काकुलीकृतमनाः स्वकरं चकार ॥ २३ ॥
मा जातु राहुपरिभूतिरतर्क्ययोगा-
न्मा भूत्क्षयः किमपि मा च कलङ्कयोगः ।
कस्याश्चिदेवमभिधाय मुखेन्दुबिम्बे
रक्षामयं तिलकमाप्तजनश्चकार ॥ २४ ॥
कस्याश्चन प्रचुरकेशभरे जलार्द्रे
जाड्यास्पदं तरुणवर्गमनो बभूव ।
कालेयधूपजुषि धूपितमात्तपुष्पे
पुष्पास्त्रविद्धमथ बन्धिनि बद्धमेव ॥ २५ ॥
प्रस्थानविघ्नकरदुर्वहभारभीत्या
काचित्प्रसूनसुकुमारशरीरयष्टिः ।
धूपाद्दृते शिरसि नैव बभार पुष्प-
मङ्गेषु चन्दनरसादपि भूषणानि ॥ २६ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये मण्डनपद्धतिर्द्वितीया ।

तृतीया पद्धतिः ।

नारीषु निर्गमनमण्डनतत्परासु
सख्यो बभाषिरे निपुणार्थमनोहराणि ।

ईशावलोकनमुहूर्तनिरोधभीत्या
प्रारब्धमण्डननिषेधफलान्यवोचन् ॥ १ ॥
आकूतसीधुभरितं पदवाक्यपुष्प-
माविस्मराण्यपि विलासिविचेष्टितानि ।
स्थाने च लज्जितपथास्ति युवप्रमाथे
किं भूषणेन सुदृशां तनुभूषणेन ॥ २ ॥
अर्काभिमुख्यसलिलस्थितिसाधनानि
रक्ताम्बुजस्य फलितान्यधुना तपांसि ।
यद्भीरु तस्य परिभूतिकरं पदं ते
लाक्षारसान्तरितरागमिदं करोषि ॥ ३ ॥
गन्तुं परैरविदितं यदि शंभुपार्श्वं
वाञ्छा किमालि रणता तव नूपुरेण ।
कर्तुं रहस्यचरितान्यभिलाषवद्भिः
प्रारम्भ एव पिशुनः परिवर्जनीयः ॥ ४ ॥
मा विश्वसीः सखि खलां मणिमेखलां तां
क्षौमस्य यद्यभिमतं परिरक्षणं ते ।
या लम्भितापि दृढबन्धमिह प्रयत्ना-
ज्जायेत बन्धविमुखी पुरतः पुरारेः ॥ ५ ॥
यानि च्यवन्ति विरहे विदलन्ति यानि
योगे हरेण वलयैः सखि किं फलं ते ।
नैवास्ति यैर्विपदि संपदि वोपयोग-
स्तैः संगमं न खलु वाञ्छति कोऽपि मर्त्यः ६ ॥

---

1. "भ्रश्यन्ति यानि विरहे विदलन्ति यानि" इति पाठान्तरम् ॥

विस्तारिणि स्तनतटे हरिचन्दनं ते
लज्जावहं किमिति लिम्पसि कातराक्षि ।
संभोगसंक्रमितकान्त····रा·········
दन्तःप्रवृद्धफलकौषधिलेपकल्पम् ॥ ७ ॥

मध्यो मृगाक्षि विधिनैव कृशोऽर्पितोऽयं
तस्योपरि स्तनभरो हतयौवनेन ।
भूयोऽपि हारमभिवाञ्छसि तत्र वोढु-
मेकस्य भङ्गकरणे बहवः प्रवृत्ताः ॥ ८ ॥

बध्नासि दग्धमणिनूपुरमङ्घ्रियुग्मे
कस्मै फलाय यदि निर्गमनेऽभिलाषः ।
एणीदृशां द्रुतगतिप्रतिबन्धभावे
नास्ति ध्रुवं निगलनूपुरयोर्विशेषः ॥ ९ ॥

भस्मैव लिम्प कुचयोः सखि रक्षणार्थं
मध्यावलोपनतया यदिमौ सुदुःस्थौ ।
हारेण किं किमथवा नवकुङ्कुमेन
लब्धात्मनः खलु पुनः परिकर्मवाञ्छा ॥ १० ॥

मा चन्दनेन कुचयोः कुरु पत्रभङ्गं
लब्ध्वा दृशोरनुमतिं स तु कल्प्यतां वा ।
यादृच्छिकप्रणयिना विरहे हरेण
नेत्रद्वयात्तव पतिष्यति बाष्पपूरः ॥ ११ ॥

---

१. अत्युन्नते स्तनतटे हरिचन्दनं ते लज्जाकरं किमिति लिम्पसि कातराक्षि । आलेपनं दयितवक्षस एव लब्धं श्लाघ्यं भवत्यपरमौषधलेप एव ॥ इति पाठान्तरम् ।

पर्याप्तयौवनकृतोन्नतिशालितौ ते
मा त्वं तिरस्कुरु कुचौ सखि कञ्चुकेन
स्तोकोद्गमं मनसिजश्चिरमाशशंसे
जेतुं ययोः पशुपतिं निजपूर्वशत्रुम् ॥ १२ ॥

आजन्मपाटलरुचावधरे तदीये
रागोऽपरः पुनरयं सखि दूषणाय ।
जातोस्य रत्नशकलस्य कृतोऽपि दक्षै-
रर्घक्षयाय नवकृत्रिमरागयोगः ॥ १३ ॥

मा कज्जलेन मलिनीकुरु लोचनान्ते
यैद्यस्मदुक्तिमवमन्य तथा कियन्त ।
चन्द्रश्चिराय वदनेन तवाभिवाञ्छ-
न्साम्यं लभेत सखि हन्त मलीमसोऽपि ॥ १४ ॥

स्निग्धापि न प्रणयि चेत्तव नेत्रमन्य-
म(द)न्यस्य मा भवतु संस्करणप्रयासः ।
आकल्पितादपि तयोः सखि केवलस्य
जानातु कान्तिमखिलामखिलोऽपि लोकः ॥ १५ ॥

पर्याप्तदीर्घनयनोत्पलभूरितं (षिते)ते
कर्णे कुतः सखि नवोत्पलमादधासि ।
यद्यन्यथा(दा) भरणमिच्छसि कर्णयोस्ते
पथ्योक्तयः श्रवणभूषणतां लभन्ताम् ॥ १६ ॥

आदर्शमाशु सखि मुञ्च कृतापराधं
कस्त्वां विनात्र मलिनाशयमाश्रियेत ।

---

1. अस्फुटोऽयं द्वितीयः पादः.

छायां प्रदृश्य सदृशीं तव वक्त्ररूपे
निर्द्वन्द्ववादमधुना शिथिलीचकार ॥ १७ ॥
केयूरनूपुरशिखामणिपारिहार्य-
हारादिभिः किमबले शृणु संग्रहोक्तिम् ।
भूषा त्रपा मृगदृशः शुचि संप्रदायि
पुंसः श्रुतं यदवरं परमङ्गभारः ॥ १८ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये मण्डनप्रतिषेधपद्धतिस्तृतीया ।

चतुर्थी पद्धतिः ।

प्रेमोत्तरैः प्रियसखीवचनैरलङ्घ्यै-
रुत्तीर्य मण्डनविधानधुरं कथंचित् ।
वीथीसमागतवृषाङ्कविलोकनाय
निर्जग्मुरायतदृशो निजमन्दिरेभ्यः ॥ १ ॥
काचित्पदाग्रगलितेन गृहात्प्रयान्ती
लाक्षारसेन पदवीमरुणीचकार ।
सा च क्षणेन सरणीश्चरणाग्रमस्याः
कस्योपकर्तुमुपकर्तरि नैव वाञ्छा ॥ २ ॥
कस्याश्चिदात्तरभसे गमने प्रवृत्ते
काञ्ची पपात पदयोः करुणं क्वणन्ती ।
मध्यव्यपायगणनव्यथयेव कर्तुं
विच्छित्तिमाशु गमनोद्यमसाहसस्य ॥ ३ ॥
किंचिद्विलम्बितभरेण पयोधरस्य
तूर्णं गतास्वपि सखीषु हरोपकण्ठम् ।

ताद्दग्विधस्तनविजृम्भणमूलमेषा
  सर्वार्थनीयमपि मध्यवयो निनिन्द ॥ ४ ॥
कृच्छ्रेण कापि गुरुणैव जनेन रोध-
  मुल्लङ्घ्य शंकरसमीपमभिप्रतस्थे ।
हा हन्त शीघ्रगमनप्रतिरोधहेतु-
  स्तस्याः पुनः स्तनभरोऽपि गुरुर्बभूव ॥ ५ ॥
दृष्टे शिवेऽपि वलयानि न मे दलेयु-
  रित्यग्रतः परिजनस्य कृतां प्रतिज्ञाम् ।
त्रातुं विसृज्य वलयान्यपरा प्रतस्थे
  नास्त्येव तस्करभयं धनवर्जितस्य ॥ ६ ॥
काचिन्निवारितबहिर्गमना जनन्या
  द्रष्टुं हरं भवनजालकमाससाद ।
तस्या विलोपनमदृश्यत दाशयन्त्र-
  यत्नोपरुद्धशफरोपमितं क्षणेन ॥ ७ ॥
कृत्वा मषीमलिनमीक्षणमेकमेका
  वैकल्यभूषणमथान्यदियात रथ्याम् ।
किं नैव जैत्रमनयोर्मदनास्त्रमेकं
  दिग्धं विषेण यदि रूढकलङ्कमन्यत् ॥ ८ ॥
ईशावलोकनकुतूहलमश्रुलेशै-
  र्वाचं विनैव जननीं प्रति काचिदूचे ।
तस्यास्तथैव विदधे गमनाभ्यनुज्ञां
  मातापि पाणिवलयोपनयच्छलेन ॥ ९ ॥

---

१. तथापि (इति पाठान्तरम्) ।

धात्रीमुहूर्तविनिवारितनिर्गमाया
बाष्पस्मितद्वितयलब्धविरुद्धयोगम् ।
कस्याश्चिदाननमशान्तहिमाम्बुजालं
प्रत्यूषपङ्कजमिव क्षणमाबभासे ॥ १० ॥

भूषाविधावपि निवृत्तमनाः स्वकीये
शंभोः समीपगमनत्वरयैव काचित् ।
भूषोद्यतां प्रियसखीं प्रतिपाल्य तस्थौ
स्निह्यन्ति नात्मनि सखीष्विव हन्त नार्यः ॥ ११ ॥

प्रारब्धमात्रकलजल्पितशिक्षणेन
वामप्रकोष्ठवलयावलिसंश्रितेन ।
काचित्ससंभ्रममुमापतिवीक्षणाय
क्रीडाशुकेन सह राजपथं प्रतस्थे ॥ १२ ॥

प्रस्थानसंभ्रमवशाद्गलितालकाया
लग्नांघ्रियावकरसे पथि शोणरूपः ।
धम्मिल्लपुष्पनिवहो हृदयप्रविष्ट-
रक्ताक्तमारविशिखश्रियमाततान ॥ १३ ॥

अस्थानगामिभिरलंकरणैरुपेता
भूयः परिस्खलननिह्नुतिरप्रसन्ना ।
वाणीव कापि कुकवेर्मधुपानमत्ता
गेहान्निपातबहुलैव विनिर्जगाम ॥ १४ ॥

वेगप्रयाणसमये चलितालकेभ्यः
पुष्पैरधो निपतितैरपरा विरेजे ।
ईशोपकण्ठगमनप्रणयस्य पूजां
कर्तुं निजाङ्घ्रियुगलस्य कृतोद्यमेव ॥ १५ ॥

याने गृहाद्बहिरुपान्तजनेन रुद्धे
　रोषारुणं सपदि जृम्भितबाष्पपूरम् ।
कस्याश्चिदीक्षणयुगं विदधे हुताश-
　निष्टप्तदत्तसलिलस्मरशस्त्रशङ्काम् ॥ १६ ॥

निर्गम्य काचिदसितोपलगर्भहर्म्या-
　दालोकिते गुरुजने भयवेपिताङ्गी ।
भूयोऽपि तत्र सहसैव तिरोबभूव सौदा-
　मिनी नवघनादिव निष्पतन्ती ॥ १७ ॥

त्रुट्यद्गुणेन निजवृत्तपरिच्युतेन
　संक्रान्तभूरिरजसा हतकन्तुकेन ।
व्याकुर्वता युवतिवश्यदशां नराणां
　काचिद्विहाय विहृतिं हरमाससाद ॥ १८ ॥

नेत्रं विधाय धृतकज्जलमेकत(म)स्या
　मात्रा परस्य करणेऽपि तथा प्रवृत्ते ।
काचिद्भवान्तिकगतित्वरितप्रवृत्तै-
　र्बाष्पैः कृतार्थमपि तेन समीचकार ॥ १९ ॥

त्याज्या सखि द्रुतगतिः कुचधारकोऽयं
　संशय्यतां तव यया समुपैति मध्यः ।
लोके सुदुर्लभतरो गुणवान्कृशोऽपि
　यः कल्पतेऽन्यभरनिर्वहणोत्सवाय ॥ २० ॥

अप्युत्तरांशुकमिदं त्वरितप्रयाणे
　पीनस्तनात्क्षिपति चेल्लघु भारभीत्या

'कन्तुः कन्दर्पवित्तयोः'.

वोढुं क्षमा भवसि तत्र निषेदुषीणां
भारं पुनस्तरुणचित्तपरम्पराणाम् ॥ २१ ॥
यत्नान्मयैव विहितं तिलकं ललाटे
घर्माम्बुना विलुलितं गतिसंभ्रमेण ।
पत्रक्रिया च सखि ते कुचयोर्विलुप्ता
व्यापत्तये भवति हन्त [1]जलेन योगः ॥ २२ ॥
कर्णोत्पलान्नयनमाप गतिच्युतात्ते
तन्मीलने मुखमयं न जहाति भृङ्गः ।
येनैनमद्य विनिवारयसि प्रमत्ते
तस्मिन्करेऽपि न किमम्बुजसाम्यदोषः ॥ २३ ॥
गत्वा तथा त्रिचतुराणि पदानि तूर्णं
गन्तुं पुनः सखि शनैरपि न क्षमासि ।
प्रायः स्वशक्तिमन(नि)रूप्य कृता प्रवृत्तिः
[2]शक्तिं निजामपि शरीरभृतां क्षिणोति ॥ २४ ॥
लाक्षारुणैः सपदि विश्लथकेशपुष्पै-
र्भ्रष्टैरशोभत परं पदवी परस्याः ।
आशंभुदर्शनमनुद्रवतः स्मरस्य
बाणैर्विभिन्नहृदयैरिव शोणितार्द्रैः ॥ २५ ॥
स्विद्यल्ललाटमधिकाकुलितालकान्तं
काचिद्घनस्तनविवल्गनरुग्णमध्यम् ।
दोलाच्छलेन रतिशिक्षणमाचरन्ती
हित्वा तदाशु हरपार्श्वभुवं जगाम ॥ २६ ॥

---

१. जडेन, वारिणा च. २. प्राच्यां दशामपि इति पाठान्तरम्।

काचिद्विहृत्य किल कन्तुककेलिरङ्गा-
　द्दूरेणुरूषिततनुर्निरगान्मृगाक्षी ।
उत्फुल्लपङ्कजवने सुचिरं चरित्वा
　किंजल्करेणुपरिधूसरितेव लक्ष्मीः ॥ २७ ॥
यान्ती हरं प्रति शशाङ्कमुखी पदाग्र-
　लाक्षारसैररुणितां पदवीं चकार ।
सा च क्षणेन पदवी पदमन्वथास्याः
　किं नोपकारिणि भवेदुपकारवाञ्छा ॥ २८ ॥
पूर्वं द्विरेफपरिभूतिभयाद्भवत्या
　यत्केशपुष्पभरणं हरिणाक्षि मुक्तम् ॥
व्यर्थं तदद्य पुनरप्यलकेषु भृङ्गाः
　पुञ्जीभवन्निजकुलभ्रमतः पतन्ति ॥ २९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये निर्गमनपद्धतिश्चतुर्थी ।

पञ्चमी पद्धतिः ।

यत्रागतिः पशुपतेर्नगरप्रवेशे
　तत्रैव धावनपरस्य वधूजनस्य ।
संजल्पितानि पथि यानि मिथो बभूवु-
　रेतानि सन्तु रसिकश्रुतिपारणाय ॥ १ ॥
पादाम्बुजं सखि तवेदमियं धरित्री
　सद्यः परागपरिधूसरितं विधाय ।
पद्मेन शोच्यजननेन समीकरोति
　सत्यं भवत्यसमसाम्यकरः कुसङ्गः ॥ २ ॥

मामप्यपेतकरुणे प्रतिपाल्य याहि
शंभुं विलोकयितुमुत्सुकितामतीव।
पश्च्यां विलासगमनं न परं त्वयाप्तं
हंस्या गतिर्वियति पक्षतिसाधिता च॥ ३॥
हारो न यत्कुचभरे निहितो भवत्या
प्रस्थानसंत्वरितया तदतीव भद्रम्।
आलिङ्गनं यदि करिष्यसि भूतभर्तु-
र्मोघत्त्वदीयदृढमौक्तिकमर्दतोदः॥ ४॥
मञ्जीरमालि चरणाश्रितमेतदेता-
नाहूय मञ्जुनिनदैर्गमने त्वदीये।
वाञ्छावतां तव मदालसयानचौर्ये
चारायते गृहसरःकलहंसकानाम्॥ ५॥
एकावलीं करतले दधती स्वकण्ठे
विस्मृत्य धर्तुमबले त्वमतीव भासि।
मन्त्रेण साधयितुमात्मपतेः शरीरं
वाञ्छावती रतिरिव स्फटिकाक्षमालाम्॥ ६॥
अस्या हरो हृदयगेहनवप्रवेशं
वासाय दीर्घमचिरेण करिष्यतीति।
धात्रा न्यधायि नवमङ्गलकुम्भयुग्मं
नूनं तवोन्नतपयोधरनामधेयम्॥ ७॥
मीनध्वजस्य शरधिद्वयमस्तमूर्ते-
र्जङ्घात्मना परिणतं तव यद्ध्रुवं तत्।
नो चेत्कथं मदनवैरिसमीपयाने
जङ्घायुगस्य गतिरालि विलम्बिनी ते॥ ८॥

वामे पदे निहितमार्द्रमलक्तकं ते
नान्यत्र यत्तदतिसुन्दरमेव मन्ये ।
येनाद्य लब्धमबले परिकर्मसाम्यं
नारीविमिश्रवपुषः परमेश्वरस्य ॥ ९ ॥

किं चित्रमत्र जघनं घनमुद्वहन्त्या
मन्दीभवन्ति यदि ते गतयो[1] वराङ्गि ।
यद्वीक्षणेऽपि गतधैर्यगुणा युवानो
गन्तुं मनागपि पुनर्नहि शक्नुवन्ति ॥ १० ॥

शंभोरवेक्षणमहोत्सव एव लभ्ये
नायाति शीघ्रमिदमालि पदाम्बुजं ते ।
ज्ञातं मम द्रुतगतेः फलमप्रयत्ना-
त्संलप्स्यते नयनयुग्ममितीर्ष्य एव ॥ ११ ॥

विस्मृत्य यावकमकारि हरंदिदृक्षो-
र्नैवाधरे तव यदद्य तदालि युक्तम् ।
आत्मोपयुक्तगरलौषधपानकामः
पास्यत्यवश्यमधरामृतमिन्दुमौलिः ॥ १२ ॥

प्रागेव बद्धरुचि लोचनकान्तिचौर्ये
नीलोत्पलं यदकरोः सखि नाद्य कर्णे ।
बुद्धिभ्रमादिदमभूदिति मा विषादः
कस्तस्करं घनगृहाधिकृतं करोति ॥ १३ ॥

इन्दुर्मुखं कुचभरो गुरुरेव दन्तः
शुक्लोऽधरश्च तव लोहित एव जातः ।

---

१. 'गतयो यदि ते' इति पाठान्तरम् ।

एवं ग्रहात्मवपुषः सखि तन्न चित्रं
यत्पादयोरपि शनैश्चरता तवास्ते ॥ १४ ॥

मा भूत्तवालि गिरिशस्य विलोकनाय
यान्त्या न मण्डनमकारि मयेति लज्जा ।
यत्ते विलासिजनलोचनपेयमेत-
न्निर्मक्षिकं मधु निराभरणं शरीरम् ॥ १५ ॥

मातैव ते गतिनिवारणमग्रतोऽभू-
त्सद्यस्तथा परिहृतं सखि बाष्पपूरैः ।
[1]शक्ता न गन्तुमधुनासि नितम्बभारा-
द्दोषो निसर्गजनितः परिहारहीनः ॥ १६ ॥

हस्तस्थितां तु सखि ते नवपुष्पमालां
मा विस्तृता शिरसि कर्तुमिति स खेदः ।
दृष्टे शिवे सपदि तस्य कुतूहलेन
कण्ठे निधातुमुचिता वरणोत्सवाय ॥ १७ ॥

त्याज्या सखि द्रुतगतिः कुचभारधारी
संशय्यतां तव यया समुपैति मध्यः ।
असिद्धगत्यसुलभः सुगुणाभिरूढः
कार्ये निजे भवति यः परधारणाय ॥ १८ ॥

[2]वैफल्यशंकनवशाज्जनगर्हितोऽभू-
द्यन्निर्मितौ शतधृतेरतिमात्रयत्नः ।

---

१. 'अशक्तासि गन्तुमधुना न' इति पाठान्तरम् । २. 'नूनं जनस्य न करोत्यवकाशदानम्' इत्यपि पाठान्तरं पुस्तक एव लिखितम्.

अस्य त्वदीक्षणमनुगस्य विशालता वा
साफल्यमेष्यति वृषाङ्कविलोकनेन ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये निर्गमपद्धतिः पञ्चमी ।

षष्ठी पद्धतिः ।

नेत्रैर्मषीमलिनितैर्ददृशुस्तमेव
रथ्यागताः शिवमयास्त एव नार्यः ।
ज्ञानात्मकेन विमलेन विलोचनेन
यद्वीक्षणाय हृदये यतयो यतन्ते ॥ १ ॥

गौरीकुचक्षपितभस्मनि कापि दृष्टिं
चिक्षेप वक्षसि विभोरभिलाषगर्भाम् ।
आशाग्रहः सुलभदुर्लभयोर्विवेके
नूनं जनस्य न करोत्यवकाशदानम् ॥ २ ॥

स्पन्दैरमन्दजनितैर्मुहुरेव यस्य
संसूचितं झटिति शर्म भविष्यतीति ।
अन्यन्निमील्य निबिडं मुदितेव काचि-
द्वामेन तेन नयनेन शिवं ददर्श ॥ ३ ॥

न्यस्ता लिपिः शिरसि येन शरीरभाजां
तस्याप्यजस्य हरपाणिभृते[1] कपाले ।
दृष्ट्वाक्षराणि मसृणानि चिराय काचि-
देतान्यनेन लिखितानि किलेति मेने ॥ ४ ॥

---

१. 'गिरिशेन घृते कपाले । × × × देतानि केन लिखितानि किलेति-दध्यौ ॥' इति पाठान्तरम् ।

६ द्वादशगु०

वक्षःस्थले च महति स्मरशासनस्य
स्वस्मिन्पयोधरयुगे च विजृम्भमाणे ।
कस्याश्चिदीक्षणयुगं विदधे मुहूर्त-
मानन्दशोकपिशुनानि गतागतानि ॥ ५ ॥
आरादुदैक्षत तथा हरकण्ठमूल-
माश्लेषकौतुकवशेन चिराय काचित् ।
तस्या यथा कलितकज्जलदृष्टिपातैः
कल्माषितं तदिति पार्श्वजनस्य तर्कः ॥ ६ ॥
काचित्करेण मणिदर्पणमुद्वहन्ती
तत्रावलोक्य गिरिशं प्रतिबिम्बलग्नम् ।
कण्ठे कथं मलिनिमेति गरं गलस्थं
मुग्धा मुहुर्मुकुर एव मुधा ममार्ज ॥ ७ ॥
कुम्भस्थलं कुचतटेन गतेन यान-
मूर्वोर्युगेन च करं करिणो जहास ।
या पूर्वमद्य किल सा वसिते हरेण
तस्यैव चर्मणि कुतूहलिनी बभूव ॥ ८ ॥
पूर्णेन्दुबिम्बतुलितेन मुखेन काचि-
त्प्रीतिं चकार हरहारमहोरगस्य ।
सा तस्य भीतिमपि भीतिनिवृत्तकण्ठी
सस्मार केशनिचयेन मयूरभङ्गीम् ॥ ९ ॥
कस्याश्चिदीक्षणमलोकविलासलोलं
बिम्बौष्ठरक्तकुमुदे पदपाणिपद्मे ।
संतापहारिणि हरास्यमहातटाके
सद्यो निपत्य शफरायितमाचचार ॥ १० ॥

आलोक्य लोकविपरीतममुष्य काचि-
त्कङ्कालमंसशिखरे शितशूलबद्धम् ।
कोऽयं क्रमः प्रमहसामिति विस्मयेन
नासानिवेशितकराङ्गुलिरेव तस्थौ ॥ ११ ॥

कस्याश्चिदायतदृशो हरकण्ठमूलं
कण्ठग्रहोत्सुकतयैव विलोकयन्त्याः ।
त्रासावहं न गरलं न च हारसर्पो
यत्पार्वतीवलयपङ्क्तिपदं तदेव ॥ १२ ॥

नेत्रद्वयेन हृतधीः करुणामयेन
काचित्तृतीयमपि लोचनमीश्वरस्य ।
उन्मीलितं चिरनिमीलितमाचकाङ्क्षे
सा तन्न वेद मदनेन्धनवह्निगर्भम् ॥ १३ ॥

कान्त्या रतिर्भुजगहारतयैव हासः
शोकश्च दुर्लभतया गरलेन भीतिः ।
क्रोधश्च निर्दयतया च यदायताक्ष्या
नानारसास्पदमजायत शंभुकण्ठः ॥ १४ ॥

अङ्गानि भीषणभुजंगविभूषणानि
मत्वेतराणि नयनं विनिवर्त्य तेभ्यः ।
वक्त्रे स्मिताभरणमीशितुरीक्षमाणां
बालां रुरोध सहसा प्रतिनेत्रपातः ॥ १५ ॥

संध्यानभःकपिशभासि विभोः कपर्दे
काचिद्विलोक्य बुबुधे तुहिनांशुलेखाम् ।
स्रष्टुः कपालशकलावलिसाहचर्या-
द्दंष्ट्रेति पोत्रिवपुषः पुरुषोत्तमस्य ॥ १६ ॥

शंभोश्चिरं पदयुगे चिरमूरुकाण्डे
मध्ये चिरं चिरमुरस्यधरे तथैव ।
एवं मुहुः कृतपरिभ्रमणा मृगाक्ष्या
दृष्टिर्जगाम तृषितेव शिरःस्रवन्तीम् ॥ १७ ॥

गङ्गामवेक्ष्य गिरिशस्य जटाकलापे
दीर्घोर्मिहस्तकलितेन्दुकलां चिराय ।
इत्थं बभूव किल भर्तरि शैलजाया
दाक्षिण्यपाक इति कापि मुहुः शुशोच ॥ १८ ॥

व्यालोलकेशकलितैककरैव काचि-
त्काञ्चीगुणश्लथनदर्शितनाभिमूला ।
वक्षस्यभीष्टदयिताकुचमुद्रितोऽयं
योगी किलेति गिरिशं कुटिलं ददर्श ॥ १९ ॥

शर्मोद्भविष्यति ममेति तदीयकम्पै-
र्बुद्ध्वाननन्द यदतीव पुरा वराङ्गी ।
तद्वाममेव नयनं शिवमीक्षमाणा
शर्वस्य सर्वसमचित्ततया निनिन्द ॥ २० ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये दर्शनपद्धतिः षष्ठी ।

सप्तमी पद्धतिः ।

आपादपद्मयुगमा च कपर्दभारा-
दङ्गान्यनङ्गदमनस्य पुरन्ध्रिवर्गः ।
नेत्रैरपाकृतनिमेषकथैर्विलोक्य
कर्णामृतानि वचनानि मिथो बभाषे ॥ १ ॥

नैवान्यदस्ति शरणं चरणारविन्दा-
द्वौरीसखस्य सखि दुःखजुषां जनानाम् ।
यत्पद्मदुर्बलमपि स्वयमन्तकस्य
वक्षो बिभेद दृढमाश्रितरक्षणाय ॥ २ ॥

तारापतीन्सुदति पश्य पिनाकपाणेः
पूर्णानिमान्पदमुपेत्य नखच्छलेन ।
अस्यायमङ्घ्रिकमलाश्रयहानिदोषा-
दद्यापि हन्त कृश एव कपर्दचन्द्रः ॥ ३ ॥

जङ्घायुगं सखि विलोकय भूतभर्तुः
संवाहनेषु गिरिजाकरपल्लवेन ।
संजातकण्टकतया प्रतिपद्यतेयन्-
नित्यं पदाम्बुरुहकोमलनालकक्ष्याम् ॥ ४ ॥

कक्षोरगेन्द्रमिह पश्य विभोस्तमेन-
मावेष्टनेन विपुले कलितं नितम्बे ।
येनायमद्य लभते वरसुन्दरीणां
चित्ताम्बुराशिमथने सखि मन्दरत्वम् ॥ ५ ॥

नाथस्य सुन्दरि विलोकय नाभिगर्त-
मस्योत्तमाङ्गकलिता विबुधस्रवन्ती ।
आवर्तमाशु विरचय्य पुनःपुनस्तं
यत्साम्यदुर्लभतया शिथिलीकरोति ॥ ६ ॥

अङ्गीकृतं यदमुना वसनत्वपक्षे
कक्षोरगेन्द्रफणरत्नमरीचिशोणम् ।
मातङ्गचर्म चिरकालनिकृत्तमेत-
दद्यापि पश्य रुधिरार्द्रमिवावभाति ॥ ७ ॥

नैसर्गिकारुण शालिनि पश्य भिक्षो-
हैरण्यगर्भमयि पाणितले कपालम्।
आविष्करोत्यरुणतामरसे विनिद्रे
निद्रावशस्तिमितहंसगतामभिख्याम्॥ ८॥
आलेपनं यदिदमस्य भुजान्तराले
तद्भस्म दग्धवपुषो मदनस्य मन्ये।
नो चेत्कथं कथय वीक्षितमात्र एव
संमोहयेत्सखि मनः सकलाङ्गनानाम्॥ ९॥
गौर्या मनोहरभुजार्पणयोग्य एव
कण्ठे कथं सखि हरस्य भुजङ्गहारः।
मन्ये तयान्यवनितासुदृढोपगूढ-
साशङ्कया वसति तत्र कृताभ्यनुज्ञः॥ १०॥
शीतं निसर्गधवलं हृदये विहाय
हारं भुजङ्गमतिभीषणमेव धत्ते।
स्वातन्त्र्यभङ्गभयतः प्रभवः कदापि
कुर्वन्ति हन्त न गुणेष्वपि पारतन्त्र्यम्॥ ११॥
हारायितः सखि हरस्य महाभुजङ्गः
पार्श्वस्थितिं मृगदृशां निरुणद्धि भीमः।
मन्ये विभुष्वधिकवल्लभतां प्रपद्य
प्रायः पराश्रयणमाशु भुजङ्गवर्गः॥ १२॥
नैल्यं यदस्य गलमूलगतं तदेके
कामं गृणन्तु गरमालि ममैष तर्कः।

१. 'पराश्रयमतीव' इति पाठान्तरम्।

या कापि सिद्धगुलिकैव मृगेक्षणाना-
　माश्लेषकौतुकविधाननिरूढशक्तिः ॥ १३ ॥
यो मूर्ध्नि मुग्धशशिभङ्गभयेन सोढा
　पार्थस्य निर्घृणशरासनताडनानि ।
यो वा करोत्युभयदानमपायकाले
　तं पश्य दक्षिणकरं सखि शंकरस्य ॥ १४ ॥
साकूतमन्दहसितोदयलोभनीया-
　दास्यादिहास्य सखि संप्रति निर्गतानि ।
देहीति लोकबहुमानविवर्जितानि
　याच्ञाक्षराण्यपि महेश्वरतां ध्वनन्ति ॥ १५ ॥
आलोकयैतदलिकेक्षणमालि शंभो-
　र्निर्हेतुनिह्नुतमनोभवरम्यदेहम् ।
सर्वेषु जन्तुषु विभुः समदर्शनोऽपि
　शाठ्येन यस्य विषमेक्षण एव जातः ॥ १६ ॥
सत्यार्थमेव खलु तद्यदिहाद्भुतस्य
　पात्रं भुजङ्गपरिरक्षितमाहुरार्याः ।
पश्याम्बिकाकलवचोमृतपात्रभूते
　कर्णेऽपि कुण्डलभुजङ्गपरिष्क्रियास्य ॥ १७ ॥
फा(भा)लेक्षणान्तिकचरं सखि पश्य शंभो-
　श्चूडाशशाङ्कमतिम(क)र्शितगात्रमेनम् ।
स्वप्रेमबन्धुमदनप्लुषि हव्यवाहे
　त्यक्तुं निजामिव तनुं विहितावसायम् ॥ १८ ॥

---

१. 'निर्गुणशरासन' इति पाठान्तरम् ।

नासीरपूरणविधौ मकरध्वजस्य
धन्वुर्धचांसि सुलभानि च यानि नार्यः ।
तानीन्दुशेखरभवं मदनावमानं
सद्यो ममार्जुरपि तस्य वपुः पुरारेः ॥ १९ ॥

सत्यं समाश्रितजनो बहुमानलाभे
नामाप्तवाञ्छितफलोऽपि विभुं जहाति ।
पश्येन्दुरेष कुरुते शिरसा धृतोऽस्मी-
त्येतावता पशुपतेः कृश एव सेवाम् ॥ २० ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्येऽङ्गवर्णनपद्धतिः सप्तमी ।

अष्टमी पद्धतिः ।

गौर्याः समक्षमपि यस्य विभोर्विकारं
कर्तुं कथंचिदपि नालमभून्मनोभूः ।
तस्यैव चित्तमपहर्तुमहो विलासा
नानाविधा नगरवामदृशां बभूवुः ॥ १ ॥

पुष्पं कराञ्जलिधृतं चलदुत्तरीया
चिक्षेप कापि पुरतः स्मरशासनस्य ।
एतावदद्य मयि पुष्पशरेण मुक्तं
पश्यास्त्रजालमिति शंसितुमुद्यतेव ॥ २ ॥

आविश्चिकीर्षुरतुलं निजबाहुमूलं
कन्दर्पमूलधनमीश(शि)तुरग्र एव ।
काचिद्विलोलवलयावलिना करेण
नेत्रान्तिकादलकभारमपाचकार ॥ ३ ॥

एका त्रपापरिभवासकलप्रवृत्ति
चिक्षेप दृष्टिमबला नवचन्द्रचूडे ।
प्रायेण तिष्ठति विदग्धविलासिनीना-
मर्धेक्षितेषु मदनः परिपूर्ण एव ॥ ४ ॥

काचिद्विलासचतुरं कतिचित्पदानि
शंभोर्जगाम पुरतो मदमन्थरेव ।
तां वीक्ष्य तादृशगतिं विशिखैः किमन्य-
दात्मन्यपि स्वयमभून्मदनः प्रहर्ता ॥ ५ ॥

कंदर्पशत्रुरयमित्यनुरूपयन्ती
सैषा पपात पुर एव पुरां विजेतुः ॥
इत्यात्मदोषमपरत्र निपात्य काचि-
त्काञ्चीमहो गुणवतीमपरा निनिन्द ॥ ६ ॥

प्राप्ता स्वगेहमणितोरणदण्डमेका
रथ्यागतत्रिपुरवैरिविलोकनाय ।
किं स्थाणुसंश्रयणमिष्टमिति ब्रुवाणां
पाणिस्थकेलिकमलेन सखीं जघान ॥ ७ ॥

किं ब्रह्मणो हननमेव तपोऽङ्गमेव किं
ते विरक्तिरबलासु वशीक्रियेयम् ।
किं पावनी शवशिरःस्रगिति स्मरार्तै-
रानर्च कापि गिरिशं वचनप्रसूनैः ॥ ८ ॥

व्यालोलकेशकलितेन करेण काचित्का-
ञ्चीगुणश्लथनदर्शितनाभिमूला ।

---

१. 'विलासललितं' इति पाठान्तरम् । २. 'स्थाणु गतासि तव भद्रमिति ब्रुवाणां' इति पाठान्तरम् ।

वक्षस्यभीष्टदयिताकुचमुद्रितोऽपि
योगी किलेति गिरिशं कुटिलं ददर्श ॥ ९ ॥
काचित्पुरा प्रणतिकृत्यमशिक्षितापि
गौरीवराय विनयाञ्जलिमाबबन्ध ।
तन्मौलिचन्द्रकिरणैर्मुकुलीकृतेन
लीलाम्बुजेन कृततत्प्रवणोपदेशा ॥ १० ॥
हीनाङ्गतोपरतमार्गणमोचनेन
प्राचीनवैरकुपितेन मनोभवेन ।
संचोदितेव निशितैर्निखिलेऽपि देहे
विव्याध कापि मदनारिमपाङ्गबाणैः ॥ ११ ॥
प्रस्थानवेगशिथिले सति केशपाशे
काचित्तथैव गिरिशस्य समीपमाप ।
स्थाने स्मरस्य परिभूतिमपास्य केश-
बन्धो विधेय इति बद्धदृढव्रतेव ॥ १२ ॥
येनाकुलेक्षणयुगा तरुणेन्दुमौलि-
मान्दोलितेन न विलोकयितुं शशाक ।
लीलाम्बुजेन सहसैव नुनोद काचि-
दात्मालकं चलदलिभ्रमवश्यबुद्धिः ॥ १३ ॥
कण्ठे सकौतुकसमर्पितया तदीये
वव्रे स्वयं पशुपतिं पतिमेव सद्यः ।
कालाञ्जनप्रणयमेचकया स्वदृष्ट्या
नीलोत्पलारचितमालिकयेव काचित् ॥ १४ ॥

---

१. 'मुकुलायितेन × × × तद्वचनोपदेशा' इति पाठान्तरम्.

वल्ली वधूस्तदधरस्तरुणप्रवाल-
स्तत्रापि निर्मलरुचिस्मितमेव पुष्पम् ।
तस्योद्गमे जनविलोचनभृङ्गसेव्ये
मासो मधुर्मधुसखारिरभूत्क्षणेन ॥ १५ ॥

रथ्योपहारकुसुमस्खलनेन काचि-
त्पादाग्रतोदमभिनीय पुरः पुरारेः ।
आत्मन्यशृङ्खलमनोभवमुच्यमान-
पुष्पास्त्रदुर्विषहतां प्रकटीचकार ॥ १६ ॥

काचित्प्रकोष्ठवलयावलिसंश्रितस्य
लीलाशुकस्य मुखसंक्रमितैर्वचोभिः ।
भिक्षाटनादिलघुकृत्यनिषेधगर्भै-
र्मन्दस्मितोत्तरमयुग्मदृशं चकार ॥ १७ ॥

द्वारि स्थितस्फटिकतोरणदीर्घदण्डं
तुङ्गस्तनाग्रयुगलेन निपीडयन्ती ।
मन्दस्मितानुमितचित्तनिगूढभावा
काचिन्मुहुर्मुहुरवैक्षत चन्द्रमौलिम् ॥ १८ ॥

कस्याश्चिदीशपदवन्दनलालसाया
नासीद्दिवा मुकुलितं करपद्ममेव ।
चूडाग्रशाङ्ककिरणैः परिभूयमानं
तस्याः करप्रणयकेलिसरोरुहं च ॥ १९ ॥

अह्नाय काचिदनियन्त्रितमेव कृत्वा
बन्धश्लथं चिकुरमीश्वरमाससाद ।

कामायमानं[1]·························सस्त-
निःशेषनिर्हरणबद्धदृढव्रतेव ॥ २० ॥
काचित्कलक्वणितकङ्कणमञ्जुनादै-
रीशं स्ववीक्षणपरं विदधे विदग्धा ।
पुंसां मनोऽभिलषितेषु विलासिनीनां
प्रायेण भूषण एव: प्रथमाभिलाषः ॥ २१ ॥
आचारपुष्पमपरा स्मितपुष्पमिश्र-
मग्रे विभोः क्षणमवाकिरदानमन्ती ।
लालाटलोचनकृशानुभयादुपात्त-
रूपान्तरेव कुसुमायुधचापयष्टिः ॥ २२ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये विलासपद्धतिरष्टमी ।

नवमी पद्धतिः ।

तैस्तैर्विलासचरितैर्विकृतं न वेत्ति
चित्तं परीक्षितुमयुग्मविलोचनस्य ।
यान्यूचिरे युवतयो वचनानि सार्धं
तस्योत्तरैरनुगुणैः कथयामि तानि ॥ १ ॥
सख्यं वरेण्यघटितं द्रविणेश्वरेण
कार्श्यं[2] तथापि किमिदं तव नापयातम् ।
किंचैष सुन्दरि चिराय पयोधरेण
स्फीतेन ते परिचितः कृश एव मध्यः ॥ २ ॥

---

१. अत्र पाठो न दृश्यते. २. कार्श्यं निःसारत्वं च.

सर्वेषु जन्तुषु समं कथमिन्दुमौले
त्वामेव हन्तु विषमेक्षणमाह लोकः ।
मध्यः कृशोऽपि वहति स्तनयोर्भरं ते
तस्मिन्वहत्यपि च मध्यमवाद एव ॥ ३ ॥
दोषं विनैव भवता तरुणेन्दुमौले
कस्मात्पुरा विनिहतः करियूथनाथः ।
त्वत्पीवरस्तननिराकृतकुम्भकान्ति-
र्जीवन्मृतो मयि वराङ्गि मृषापवादः ॥ ४ ॥
आद्यन्तशून्यइति वेदविदो वदन्ति
त्वामिन्दुशेखर जगत्युदयान्तभाजि ।
तद्वादमात्रमयमद्य हि दृष्ट एव
सर्वैश्चकोरनयने तव मध्यलोपः ॥ ५ ॥
उत्पाद्य पावकमयं नयनं ललाटे
प्लुष्टस्त्वया किमिति शंकर पुष्पकेतुः ।
दृष्ट्वैव ते यदयमाप पुनः प्रसूतिं
तच्चण्डि हास्यपदमस्म्यहमेव जातः ॥ ६ ॥
मुक्तामयः स्फुटमयं रशनागुणो मे
धिग्धिग्भयंकरभुजङ्गमकल्पितं ते ।
मुक्तामयत्वमुचितं ननु तस्य बाले
यः सेवते तव नितम्बमजस्रमेव ॥ ७ ॥
पूर्णं विहाय कथमेनमनङ्गशत्रो
मूर्ध्ना भवान्वहति नित्यकृशं शशाङ्कम् ।
त्वद्वक्त्रकान्तिपरिभूतिमनाकलय्य
पूर्णाद्वराङ्गि वर एव कृशोऽयमिन्दुः ॥ ८ ॥

ये गर्हिता गिरिश तेऽपि भवन्तमेत्य
श्लाघ्या भवन्ति सहसेति सतां प्रवादः ।
रागोऽधरे कुटिलताप्यलके, कृशत्वं
मध्ये, कुचे कठिनता च तथा न किं वा ॥ ९ ॥
वैवस्वतेन दमितः सकलोऽपि लोकः
सोऽपि त्वदीयचरणेन पिनाकपाणे ।
पद्मं शशी जयति भीरु मुखं तवैन-
मेकान्ततो न विजयोऽस्ति पराजयो वा ॥ १० ॥
देहीति वाचि पदमद्य तवेन्दुमौले
चक्षुः पुनर्मृगदृशां मणिमेखलासु ।
पुंसो रसार्द्रहृदयस्य पुरो वधूनां
वाक्ये च चेतसि च कर्मणि चान्यदन्यत् ॥ ११ ॥
एतेन भैक्षचरणेन जगत्कुटुम्ब-
त्राणक्षमा पशुपते किमलाभि पूर्तिः ।
पूर्णो न किं प्रतिदिनं त्वयि भिक्षमाणो
लावण्यमाननगतं प्रतिपच्छशाङ्कः ॥ १२ ॥
अग्रेसरस्त्वमसि नाथ विलासभाजां
भिक्षामटस्यपि कथं त्वमपास्तलज्जः ।
स्वच्छन्दवीक्षणवचांसि पृथग्वधूषु
कर्तुं न भैक्षचरणादपरोऽभ्युपायः ॥ १३ ॥
एतानि नाथ वचनान्यमृतोपमानि
कण्ठादुपात्तगरलादपि निर्गतानि ।
स्वादिष्टता वचसि वक्तृगुणैर्न जाता
श्रोतुर्जनस्य गुणवत्त्वनिबन्धनैव ॥ १४ ॥

क्रीडापरः कथमसि त्वमनादिवृद्धो
मुग्धासु भैक्षचरणच्छलतो बधूषु ।
यः संगमो युवतिभिर्जरयातुराणां
तं सूरयो जरणभैक्षजमामनन्ति ॥ १५ ॥

धिक्त्वां भुजङ्गममयस्तव यस्य हारो
मुक्तामयस्तव न किं मम पश्य नाथ ।
मुक्तामयत्वमुचितं ननु तस्य बाले
पीनस्तनेन कृतसंगमनिर्वृतस्य ॥ १६ ॥

अन्यत्र यातमपि मानसमीश किं ते
नैवाददासि बलिमद्य नच प्रयासि ।
यस्ते गुरुस्तनभरः कलकण्ठि तस्य
तद्दक्षिणीकृतमिदं हृदयं मया ते ॥ १७ ॥

यत्कार्ष्ण्यमीश भवतो मुखपूर्णचन्द्रे
भ्रष्टं तदेव गणयामि गलस्थमेतत् ।
रागोऽधरे सुदति यः स तवाननेन्दो-
राभासि(ति) संचित इवोदयशोणभावः ॥ १८ ॥

मध्यस्थमीश कथयन्त्यखिला भवन्तं[1]
कस्मादकारि भवता स्मरदेहदाहः ।
पुंसां करोति मदिराक्षि नितान्तपीडां
मध्यस्थमेव कथमद्य वलित्रयं ते ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्य उत्तरप्रत्युत्तरपद्धतिर्नवमी ।

---

१. 'कथयन्ति जना भवन्तं' इति पाठान्तरम् ।

दशमी पद्धतिः ।

प्रत्यालयं कृपणवज्जगतामधीश
देहीति दीनपदवादिनि भिक्षमाणे ।
वामभ्रुवां मनसिजावशमानसानां
भिक्षाप्रदानचरितान्युपलालयामः ॥ १ ॥

काचित्पुरः पुररिपोरतिसंभ्रमेण
भिक्षामपात्रपतितामवबुध्य सद्यः ।
अन्तर्भयेन निदधे हृदये कराग्रं
भिक्षाहमस्मि भवतो भगवन्नितीव ॥ २ ॥

प्रेम्णापि याचितनिदानविरोधिता तु
दर्वीं दधत्यपि करेण समृद्धसिद्धाम् ।
भैक्षाटणा(ना)न्तमपरा गिरिशेन योगा-
न्निश्चित्य कालहरणं कपटैश्चकार ॥ ३ ॥

सत्पात्रदानविधिना यदनेन पुण्यं
तन्मे तवैव कृशभावमपाकरोतु ।
इत्येवमिन्दुशकलाभरणाय काचि-
द्भैक्षेण पुण्यमपि दानभवं दिदेश ॥ ४ ॥

आदातुमैच्छदधिकं गिरिशो न भैक्षं
पात्रं वधूः सपदि पूर्णमियेष कर्तुम् ।
आयस्तयोर्युवतिशंकरयोर्बभूव
भिक्षाप्रदानसमये सुचिरं विवादः ॥ ५ ॥

दर्व्याः परिच्युतमिदं तमियं च हस्ता-
द्दानादयं तदपि दुर्लभसंप्रदानात् ।

अश्रान्तमेव गिरिशान्तरपल्लवेन
　　कस्याश्चिदायतदृशः सितपुष्पकेण ॥ ६ ॥
आयाहि तिष्ठ जहि भीमभुजङ्गहार-
　　मेनं गलात्तदनु भैक्षमिदं गृहाण ।
इत्येवमीश्वरमपेक्षितभैक्षदाना-
　　त्प्रागेव कापि निजकिंकरतां निनाय ॥ ७ ॥
एका कथंचन चिरेण विनम्रवक्त्रा
　　लज्जावशेन गिरिशाय दिदेश भिक्षाम् ।
दानोन्मुखस्य च गुणाभ्यधिके निकृष्टे
　　याच्ञापरस्य च समस्त्रपया विकारः ॥ ८ ॥
धिग्याचनं जगति सन्निहितावमानं
　　भैक्ष्यं प्रदेयमिदमर्थयते महेशः ।
कामद्रुहे न खलु देयमिति स्ववाचा
　　प्रत्यादिदेश पुर एव हि तस्य काचित् ॥ ९ ॥
यो भिक्षते प्रतिगृहं भुवनेश्वरोऽपि
　　तस्मै च या सकरुणैव ददाति भिक्षाम् ।
तावन्ववेक्ष्य गिरिशं [च] सखीं च काचि-
　　त्तामेव सर्वसहतां जगते जगर्हे ॥ १० ॥
दर्वीमुखं द्रुतगतिच्युतसिक्थमेव
　　काचिन्मुधैव निदधे हरभैक्ष्यपात्रे ।
तस्याः पुनः परिहृतो झटिति प्रकोष्ठा-
　　द्भिक्षाकपालपतितैर्वलयैः प्रमादः ॥ ११ ॥
भिक्षां प्रदातुमपरा शमनान्तकस्य
　　वेगादुपान्तमुपसृत्य बभूव तूष्णीम् ।

७ द्वादशगु०

दानादधःकृततदीयकरारविन्दा-
च्छ्लाघ्यं विमुद्य(बुध्य) जनशोच्यमदानमेव ॥ १२ ॥
आहूत एव चरितो विधृतान्नदर्व्या
भिक्षुः कयापि गिरिशो न कृतः कृतार्थः ।
दोषावरन्नि(रं नि)रवधेर्विरहासहिष्णोः
स्नेहस्य किंचिदपि चारुदृशो न तस्याः ॥ १३ ॥
भिक्षां प्रदातुमभिवाञ्छ्य पुमानमुष्मै
कङ्कालवेष इति बन्धुविबोधितापि[1] ।
नैव न्यवर्तत वि(व)धूः शिवभैक्ष्य(क्ष)दाना-
द्धर्मात्मना परिणतो ननु काम एव ॥ १४ ॥
यावन्न निर्गलति देहिवचोऽस्य वक्त्रा-
त्तावद्ददौ झटिति काऽपि शिवाय भैक्षम् ।
देहीति दीनपदनिर्गमयत्नमूल्यं
नालं जगत्त्रितयमर्थिजनाय दत्तम् ॥ १५ ॥
यो दक्षिणः पुरजितो विततार भिक्षां
कस्याश्चिदाशु वलयैः स करो विहीनः ।
हा हन्त दैवतमतिक्रमकारि वामः
संरक्षितो वलयवान्मलिनालकायाः ॥ १६ ॥
भिक्षोदने स्थलनिपातिनि कापि शंभोः
पात्रं न सम्यगिति पाणिगतं जगर्हे ।
आत्मीयदुष्करणहेतुक एव मर्त्यैः
सर्वैर्विधेः शिरसि पात्यत एव दोषः ॥ १७ ॥

---

१. 'बुद्धिविबोधितापि' इति पाठान्तरम् ।

मा गच्छ शंभुमिति मातृनिवारितापि
भिक्षाप्रदानमपदिश्य जगाम काचित् ।
धर्मप्रतीपगतिरप्यभवत्तदानी-
मालम्बनं मनसिजस्य विचित्रमेतत् ॥ १८ ॥

काचित्करेण दधती गुरुभैक्षगर्भां
दर्वीमियाय हरपार्श्वभुवं न यावत् ।
स्नेहोज्ज्वलां मनसिजः स्वयमग्र भिक्षां
तामेव तावददिशत्परमेश्वराय ॥ १९ ॥

पात्रोत्तमस्त्वमसि नायक पाणिलग्नं
पात्रं तथापि न पवित्रमिदं कपालम् ।
यावन्न तत्त्यजसि नैव ददामि ताव
दित्येव कापि गिरिशाय ददौ न भिक्षाम् ॥ २० ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये भिक्षाप्रदानपद्धतिर्दशमी ।

एकादशी पद्धतिः ।

भिक्षाप्रदानसमये वनिताजनस्य
जातानि शंभुमधिकृत्य वचांसि यानि ।
तस्योत्तराण्यपि च यानि नयान्वितानि
वक्ष्यामि तानि विदुषां श्रवणोत्सवाय ॥ १ ॥

भिक्षाटनादिकममङ्गलचेष्टितं ते
किं नाम सापि सहते गिरिराजपुत्री ।
यं यं करोत्यविनयं जगतीह भर्ता
साध्वी वधूरनुगुणैव हि तस्य तस्य ॥ २ ॥

भिक्षाटनं यदि न ते विहृतिप्रवृत्तं
याचस्व भूरि पुरशासन मैव भैक्षम् ।
लोकेऽत्र लोभबहुले मितमेव याच्यं
तावानलाभसमये भविता विषादः ॥ ३ ॥

भिक्षान्नसाध्यमभिधेहि पिनाकपाणे
रुच्यावहं तव तदेव हि कालकूटम् ।
यद्याचितं कृशजनेन तदाशु देयं
दात्रा कथं चिदपि नास्य फलं विचार्यम् ॥ ४ ॥

अस्त्येव ते प्रियसखः शिव वित्तनाथः
तस्मिन्स्थितेऽपि किमियं तव भैक्षयाञ्चा ।
वित्तान्धदुर्मुखनिरीक्षणभीतिभाजां
भिक्षा वरं प्रति निकेतमदैन्यलभ्या ॥ ५ ॥

सर्वाः कला वदनतो भवतः प्रवृत्ताः
किं तासु काचिदपि नाथ न पोषहेतुः ।
अन्यैव कापि धनिनां द्रविणात्मिका श्री-
र्विद्यात्मिकापि विदुषामपरैव लक्ष्मीः ॥ ६ ॥

कंचिन्मुहूर्तमिह तिष्ठ विभो मदीयं
गेहं प्रविश्य पुनरेत्य ददामि भिक्षाम् ।
अभ्यर्थिनामभिमतस्य चिरेण लाभा-
दभ्यर्हितः सपदि नास्ति पदस्य लाभः ॥ ७ ॥

तां तां समृद्धिममरा भवतो लभन्ते
भिक्षाटनव्यसनमीश किमर्थमेतत् ।

---

१. 'रुच्याशनं जगति ते गरलं प्रसिद्धम् ।' इति पाठान्तरम् । २. 'त्वामाहुराद्यकवयो निर्लयं कलानां' इति पाठान्तरम् ।

नीचैः कदाचन समस्थितिरन्यदोच्चै-
　रप्येकदा भवति देहभृतामवस्था ॥ ८ ॥
यत्केवलं तव कराग्रकरोटिपात्र-
　मद्याप्यलाभि भवता न किमग्रभैक्षम् ।
उत्साहसंततिकृतामपि देहभाजां
　लाभो न यत्नमनुधावति भाग्यतन्त्रः ॥ ९ ॥
मागाः परत्र भवने भव पात्रमद्य
　भिक्षोदनैरहमिदं तव पूरयामि ।
वाचं मुधा कुसुमितां विदधाति लोकः
　किंचित्त्वसौ फलति नार्थिषु दीर्घतोऽपि ॥ १० ॥
संपन्नमन्नमखिलेश्वर भैक्षमात्रं
　तुभ्यं प्रदातुमियदेतदपत्रपेऽहम् ।
निर्णीतमेतदखिलार्थिजनेन दाने
　देयस्य काललघुता लघुतां[1] क्षिणोति ॥ ११ ॥
भैक्षार्थिना प्रतिगृहं चरता त्वयैव
　न स्थीयते किमिति हन्त मुहूर्तमात्रम् ।
एकत्र पुष्कलमलब्धवतां स्वकाम्यं
　क्वापि स्थितिर्मधुलिहामिव दुर्लभैव ॥ १२ ॥
दास्यामि भैक्ष्यमखिलेश दिने परस्मि-
　स्तुभ्यं हतेन विधिना गलितोऽन्नकालः ।
संप्रीयतां[2] स खलु नाम तयात्वदुक्त्या
　यः स्वात्मनः स्थिरमतित्वमिहातनोति ॥ १३ ॥

---

१. 'लघुतां करोति' इति पाठान्तरम् । २. 'धत्ते स्थिरत्वमतिमात्मनि यः स भूयाद्भाव्यर्थलाभमुदितो म तथाहमस्मि ॥' इति पाठान्तरम् ।

कालात्ययेऽद्य भवता गृहमागतं मे
नास्त्येव भैक्षमखिलेश किमत्र कृत्यम्।
नास्तीति यो वदति भिक्षुसमक्षमेव
सद्भावमात्मनि निषेधति नैव देये ॥ १४ ॥
अप्रापणे वदनमेति यथा विकासं
भैक्षस्य नैव हि तथा तव तस्य लाभे।
वाञ्छाम्यलाभमहमायतलोचनाभ्यः
सद्यो वियोगविपदाहत एव लाभः ॥ १५ ॥
स्वामिन्मया पुरत एव विखण्डिताशो
भूयोऽपि मां किमनुधावसि भैक्षकामी।
भृङ्गः पुरा मुकुलनेन विमोघकामः
पुष्पं न किं पुनरुपैति विकासकाङ्क्षी ॥ १६ ॥
तुभ्यं ददामि कथमद्य वरेण्य भिक्षां
तां स्वीकरोति कथमेव भवानलज्जः।
दाता यथारुचि ददात्यमितं मितं वा
गृह्णाति वस्तु मितमप्यगतिर्दरिद्रः ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये दीनोक्तिपद्धतिरेकादशी।

द्वादशीपद्धतिः।

बध्नाति मे प्रथमवैरिणि पक्षपात-
मेवं जनोऽयमिति जातरुषा स्मरेण।
निःशङ्कविद्धहृदयस्य वधूजनस्य
यत्पारवश्यचरितं तदुदीरयामि ॥ १ ॥

भूतैः किमन्तिकचरैः सहसा गृहीता
　दष्टा शरीरकलितैरुत पन्नगेन्द्रैः ।
का(क्रा)न्ता स्विदस्य गलकालगरोष्मणेति
　काचिच्छिवस्य पथि संदिदिहे सखीभिः ॥ २ ॥
भूषोरगानविगणय्य विभोरुपान्ते
　कापि स्थितैव निजबन्धुनिवारितापि ।
किं धार्ष्ट्यमेतदुत मौढ्यमहो स्विदस्या
　भक्तिर्वरा किमु मनोभववैभवं वा ॥ ३ ॥
आलोक्य दृष्टिररुणा प्रथमं मृगाक्ष्या
　गौरीकुचाहतिकिणोरसमिन्दुमौलिम् ।
पश्चादुदश्रुसलिलाभवदग्नितप्ता
　मारस्य दत्तनिशिताश्रुजलेव शक्तिः ॥ ४ ॥
अस्त्रं विमुच्य निखिलं प्रथमप्रयोगे
　भूयोऽपि वेद्धुमबलां विहितोद्यमस्य ।
पुष्पायुधस्य वपुरेव तदीयमेकं
　लक्ष्यं च हन्तशरधिश्च तदा बभूव ॥ ५ ॥
पादेन किं फणिगणे चकितं नितम्बे
　शंभोः करे विवशमग्रसरे सपात्रे ।
आधूसरं भसितलेपिनि बाहुमध्ये
　स्नातुं शिरः सरिति चित्तमधीरदृष्टेः ॥ ६ ॥
काचित्पृथुस्तनभरे गलितोत्तरीये
　व्यत्यासभङ्गिनिहितेन भुजद्वयेन ।
आलिङ्गनं हृदयदेशजुषः शिवस्य
　कर्तुं समीप्सितवतीव चिरं चकाशे ॥ ७ ॥

पुष्पं विकीर्य गिरिशाय पुरैव पश्चा-

त्सर्वो जनो जगति बन्धविमुक्तिमेति

वेणीभरो मृगदृशः प्रथमं विमुक्तो

बन्धात्पुनः पुरजिते कुसुमं मुमोच ॥ ८ ॥

आत्मानुबन्धिरशनागलनाद्यवद्य-

मन्यास्वपि क्षणमवेक्ष्य हराग्र एव ।

काचित्त्रपापरिभवं न ययौ तदानीं

लज्जावहो न खलु जात्यविशेष दोषः ॥ ९ ॥

आलिङ्गनादृतमना गिरिशं विलोक्य

रोमाञ्चकण्टकितमूर्तिरजायतान्या ।

रागेण पुंसि निहिता सुदृशां दृगेव

प्रायेण तत्तदुपभोगसुखं करोति ॥ १० ॥

कस्याश्चिदार्द्रघनचन्दनपङ्किलायां

संवर्धितं स्तनभुवि स्मरकर्षकेण ।

रोमाच(ञ्च)सस्यममितिश्रमवारिसिक्तं

भेदस्तु नाभवदयं खलु दीर्घतन्त्रः ॥ ११ ॥

भिन्नाः स्तनांशुकगुणा हरसंनिधाने

प्रीत्या यदायतदृशो न तदद्भुताय ।

योषिद्गुणा नियमिता विधिनैव तस्या

लज्जादयः सपदि यत्त्रुटिता बभूवुः ॥ १२ ॥

आसीत्परा सपदि तस्य कृतान्तशत्रो-

रालोकनादनिमिषेति किमत्र चित्रम् ।

---

१. 'वेणीभरस्तु सुदृशः' इति पाठान्तरम् । २. 'पुरः शिवस्य' इति पाठान्तरम् ।

यस्य क्षणस्मरणमात्रवशेन मर्त्या
　　यत्नं विनाप्यनिमिषत्वपदं लभन्ते ॥ १२ ॥

च्योतत्सखीवसनरक्षणदत्तहस्ता
　　विस्रंसिनि स्ववसने पुरतः पुरारेः ।
अन्यापुनः क्षणमजायत कृत्यमूढा
　　नात्मावनेपि गणना पररक्षकाणाम् ॥ १४ ॥

कस्याश्चिदुत्तरदुकूलविलोपदृश्या-
　　दाभोगतः कुचयुगस्य विनिर्जगाम ।
अन्तर्गतं झटिति वक्तुमिवेन्दुमौलिं
　　रोमाञ्चमन्तिकगताय सखीजनाय ॥ १५ ॥

बन्धश्लथः कचभरः प्रचुराश्रु नेत्रं
　　कम्पोत्तरं कुचयुगं गलदुत्तरीयम् ।
विस्रस्तकाञ्चि जघनं चरणं प्रयाणे
　　शक्तेतरं मृगदृशो हरदर्शनेन ॥ १६ ॥

हस्तः कयापि गलितांशुकवारणाय
　　व्यापारितो वलयविच्युतिदैन्यमाप ।
यत्ने कृते शमयितुं विनिपातमेकं
　　हानिं परामपि विधिर्विदधाति वामः ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये पारवश्यपद्धतिर्द्वादशी ।

त्रयोदशी पद्धतिः ।

कन्दर्पमुक्तशितबाणपरम्पराभिः
　　शंभोः पुरः प्रहृतचित्तमवेक्ष्य सख्यः ।

नारीजनं निजगदुर्वचनानि यानि
रम्याणि सन्तु रसिकश्रुतिपारणाय ॥ १ ॥
मुग्धे स्मरार्तिपिशुनं वसनाञ्चलेन
रोमाञ्चमावृणु पुरः पुरसुन्दरीणाम्।
लोकः परस्खलनदर्शनदिव्य चक्षु-
र्जात्यन्ध एव निजदोषनिरीक्षणेषु ॥ २ ॥
यत्पूर्वमात्तविनयाञ्जलिरीशपार्श्वे
भूयाः सदेति मुहुरालि मयोपदिष्टम्।
तस्यावधीरणफलं वलयच्युतिस्ते
क्षेमंकरो भवति किं न शिवे प्रणामः ॥ ३ ॥
स्वैरं विलोकय कृशोदरि कामशत्रुं
मा भूदयं तव मुखाम्बुरुहे विकासः।
आविर्भवत्यहिमभासि विकासमात्रा-
त्तत्प्रेयसीति नलिनीं न किमाह लोकः ॥ ४ ॥
आमीलनेन कमलस्य मधुव्रतानां
स्वच्छन्दचारविहतिस्त्वयि सान्यथैव।
फुल्लेऽपि शंकरमुखाम्बुरुहे विलीनः
शक्तो न गन्तुमपरत्र कटाक्षभृङ्गः ॥ ५ ॥
वासच्यु(श्च्यु)तं तव सखीत्यभिधीयमाना
नीलं हरस्य गलमूलमिति ब्रवीषि।
उन्मादिनां जगति नूनमपार्थजल्पा-
दल्पान्तराणि मदनातुरभाषितानि ॥६ ॥

---

१. 'रम्याणि तानि कथयामि विदन्तु सन्तः।' इति पाठान्तरम्।

शंभोः समीपमुपगच्छसि निर्विशङ्कं
　　मुग्धे मनोभवभवेन मतिभ्रमेण ।
हाराहिमस्य न निरूपयसि क्षुधार्तं
　　मुग्धं च ते मुखमिदं शशिनिर्विशेषम् ॥ ७ ॥

स्रस्तोत्तरीयमधुना कुचमण्डलं ते
　　पाहि(णि)द्वयेन पिदधासि यदम्बुजाक्षि ।
तत्साधु संप्रति पुनर्वलयोज्झितस्य
　　तस्याभिधेहि सखि केन तिरस्क्रियास्तु ॥ ८ ॥

नेत्रद्वयं हरविलोकनलाभधन्यं
　　सर्वेतरेन्द्रियगता गमितैव शक्तिः ।
स्पर्शं न वेत्सि मुहरङ्गुलिताडितापि
　　नाह्वानशब्दमपि यत्सखि मे शृणोषि ॥ ९ ॥

सर्वाङ्गवीक्षणमहोत्सवभाग्यहीना
　　नूनं त्वमस्य गिरिशस्य किमद्य कुर्मः ।
वक्षःस्थले प्रथममस्य दृशं निमग्ना-
　　मुद्धर्तुमेव निपुणासि न यत्नतोऽपि ॥ १० ॥

नैवाद्य कान्तिविलयो वपुषीश्वरस्य
　　संकोचनं न तव नेत्रयुगे प्रसक्ति ।
अन्यः किमद्य सखि पश्यसि रोषरूक्षं
　　पश्यन्तु ता अपि वृषध्वजमादरेण ॥ ११ ॥

ईर्ष्याकठोरमसकृत्त्वमवेक्षसे कि-
　　मन्योऽपि तं कमपि पश्यतु भीरुवर्गः ।
मोहेन शंकरविलोकनसंभवेन

श्वासं न किंचिदपि मुञ्चसि कातराक्षि।
भृङ्गामदीयवरसौरभलोभलोभा-
द्यत्नेन संप्रति तवाननमाश्रयन्ते ॥ १२ ॥

मा मेखलेति मम वा वनमाकलय्य
बद्धा तदाक गलिता मणिमेखला ते
पथ्यं न यः स्वयमवैति जनः स नूनं
पथ्योपदेशमपि हन्तबहिष्करोति ॥ १३ ॥
यो मूढधीः स्वयमयं पुनराप्तवाक्यं
न श्रद्दधीत यदि तस्य विपत्तिरेव ॥ १४ ॥

काञ्चीगुणः पततु काममसौ नितम्बा-
देतानि रत्नवलयानि च बाहुयुग्मात्।
एतत्तु मे व्यसनमालि सहैव तैस्तै-
र्लज्जामयस्य सहजाभरणस्य पातः ॥ १५ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये पारवश्योक्तिपद्धतिस्त्रयोदशी।

चतुर्दशी पद्धतिः।

श्लाघ्येन भैक्षचरणेन चिरं विहृत्य
रथ्यासु कालदमने गमनप्रवृत्ते।
जातानि तस्य पुर एव नितम्बिनीनां
विश्लेषभीतिकलुषानि(णि) विचेष्टितानि ॥ १ ॥

गन्तुं प्रवृत्तमवलोक्य वृषाङ्कमेका
बालाम्बु नेत्रयुगुले प्रचुरं बभार।

तस्यास्तदीयनयनानि पुनर्विदाहा-
　त्रस्यन्निव क्षणमलक्ष्यत पञ्चबाणः ॥ २ ॥
साकूतमैक्षत हरं मुहुरेव काचि-
　द्विश्लेषवन्दननिमीलितपाणिपद्मा ।
संज्ञां सरोरुहनिमीलनयोग्यकाले
　भूय स्तदागममपेक्ष्य वितन्वतीव ॥ ३ ॥
मन्दस्मितैरकलितोत्तरमीशमन्या
　देहीन्द्रनीलमिति कण्ठगरं ययाचे ।
आगामितं झटिति तीव्रवियोगतापं
　तेनैव कर्तुमभिवाञ्छय विमूढ बुद्धिः ॥ ४ ॥
काचित्पतिं गतिविषक्तमवेक्ष्य चिह्नैः
　कामं तथास्त्वथ च कापि ममास्ति नीतिः ।
एते न मे हृदयगेहमहं प्रविष्टो
　मा निर्गमेदिति विलोचनमामिमील ॥ ५ ॥
मा गा इति व्यवसिता गदितुं कयाचि-
　त्वह्ना निरोद्धुमपि बाहुयुगार्गलेन ।
नानुष्ठितं गमनकाङ्क्षिणि भूतनाथे
　ह्नीयन्त्रणा भवति नैव मनःप्रवृत्तेः ॥ ६ ॥
हस्तान्मम क्वगलितं वलयं न जाने
　भिक्षाकपालमिह नायक दर्शयेति ।
काचिच्चकार हरयानमुहूर्तविघ्नं
　भिक्षुः शिवोऽपि परिभूतिपदं जगाम ॥ ७ ॥

---

1. आद्यपादस्यार्थोऽस्फुटः.

वीथीविमोचनकृतव्यवसायमेका
  ज्ञात्वा हरं विरहतश्चकिता चकार ।
तत्संनिधावपि निमील्य निमील्य चक्षु-
  र्यत्नेन भावितदवीक्षणसाम्यशिक्षाम् ॥ ८ ॥
तावत्त्रपा त्वरितपार्श्वगतिर्मृगाक्ष्या
  तावच्छलादसकलानि विलोकितानि ।
वीथीपरिभ्रमणकेलिविपक्षभूतो
  यावत्प्रभोर्न गमने जनितोऽभिलाषः ॥ ९ ॥
अन्तर्ज्वरः श्वसितमूर्जितमेव भूयां-
  न्गण्डस्थले धवलिमा दृशि बाष्पपूरः ।
जातो हरेण सुदृशो विरहप्रतापा-
  त्पूर्वं फलं तदनु हेतुरहो विचित्रम् ॥ १० ॥
काचिन्निरर्गलविनिर्गतबाष्पपूरै-
  राशङ्कितं हरवियोगभयं सखीभ्यः ।
दृष्टिर्ममेयमलकच्युतपुष्परेणु-
  स्पृष्टेत्यपृष्टवचनैः प्रकटीचकार ॥ ११ ॥
प्रस्थानमिन्दुशकलाभरणस्य काचि-
  दासन्नमेव विगणय्य भयेन मुग्धा ।
आदर्शमापतिततत्प्रतिबिम्बहृद्य-
  मङ्गेष्वनङ्गविवशेषु मुहुर्न्यधत्त ॥ १२ ॥
भग्नस्य शङ्खवलयस्य ममैतदेक-
  मर्धं चिराय मृगये तदिह द्वितीयम् ।
यन्मूर्ध्नि ते कुटिलभास्वरमेतदद्य
  संदर्शयेति वनिता गिरिशं रुरोध ॥ १३ ॥

स्वच्छन्दरागरसिकस्य गतिर्वि(गतिं नि)रोद्धुं
शक्तास्मि ते मलयमारुततुल्यवृत्तेः ।
अस्याः स्मरार्तिरियतीति सखी प्रदर्श्य
प्रस्थायिनं हरमवोचदुपांशु काचित् ॥ १४ ॥

संद्यः प्रयाणकरणोद्यमगम्यमान-
नैरस्यमार्द्रयितुमेव मनस्तदीयम् ।
पेतुः पिनाकिनि मुहुर्मृगलोचनाया
बाष्पोदकान्तरितलोचनवीक्षितानि ॥ १५ ॥

काचित्प्रसक्तगमनं गिरिशं करस्थे
छायाप्रविष्टवपुषा मुकुरे निधाय ।
तं सर्वदा सुलभमेव विबुध्यमाना
नारी वियोगभयविह्वलतां जहास ॥ १६ ॥

लीलाम्बुजे मम रमस्व यथेष्टमस्मि-
न्मा गच्छ षट्पद परिभ्रमणेन किं ते ।
इत्याशु कापि गिरिशस्य गतिप्रसङ्गे
भृङ्गाश्रयं गतिनिषेधवचो जगाद ॥ १७ ॥

आशासमुल्लसितपीनपयोधराग्रा
ताम्राधरस्फुरणदर्शितशक्रगोपा ।
काचिद्बभूव गतिकाङ्क्षिणि नीलकण्ठे
बाष्पाम्बुदुर्दिनमुखी जलदागमश्रीः ॥ १८ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये विश्लेषारम्भपद्धतिश्चतुर्दशी ।

पञ्चदशी पद्धतिः।

स्था(स्थि)त्वा विभोर्जिगमिषोः पथि कातराक्ष्या-
स्तत्प्रस्थितिक्षणनिवारण[1]कारणानि।
अप्यल्पिकां विविदिषां सुवहन्त्य एव
प्रश्नात्मिकानि ललितानि वचांसि चक्रुः॥ १॥

स त्वं पुराण कथयेह ममाद्य रूपं
सख्या सहैव चिरकालकृतो विवादः।
यद्भस्म ते वपुषि तद्भवता गृहीतं
दाहे स्मरस्य किमथो नु पुरत्रयस्य॥ २॥

शङ्कामिमां शमय नाथ पुनर्यथेष्टं
देशं भवान्व्रजतु को नु तदा विरोधः।
दाक्षायणीपरिणयप्रणयेऽपि किं ते
पाणिः फणीन्द्रपु(प)रुषोऽयमथान्यथा वा॥ ३॥

पृच्छाम्ययं किमपि नाथ भवन्तमेत-
द्ब्रूहि द्वयोरपि तयोरधिकः क एव।
अन्विष्य यस्तव वराहमलाभखेदो
व्याधाकृतेः सुचिरमस्य च यो भवन्तम्॥ ४॥

स्वामिन्मदीयहृदये चिरकाङ्क्षितोऽयं
कार्यस्त्वया सपदि विप्रतिपत्तिलोपः।
देहीति यत्पदमथाब्धिभवं विषं वा
जिह्वाग्रदुःसहमुदीरय किं तयोस्ते॥ ५॥

---

१. 'आत्मीयसंशयनिराकरणापदेशात्' इति पाठान्तरं च तृतीयपादस्य दृश्यते।

जिज्ञासया हृदयमाकुलितं तथापि
   पृच्छामि तत्कथय नायक तथ्यमेव ।
किं ते कपालमनिशं दधतः करस्य
   किं वानुगेहमटतश्चरणस्य तोदः ॥ ६ ॥

याचे भवन्तमधुना मधुबन्धुशत्रो
   शङ्कामिमां प्रशमयाद्य चिरानुषक्ताम् ।
त्वद्भक्तयोर्वद पुलिन्दमुकुन्दयोस्ते
   नेत्रं यदेतदधिकं कतरेण दत्तम् ॥ ७ ॥

अभ्यर्थये भव भवन्तमपाकुरुष्व
   दीर्घं विवादमनुयुक्तविबोधनेन ।
का वल्लभा तव हिमालयजह्नुपुत्र्यो-
   र्भागेन किं परिणता शिरसा धृता वा ॥ ८ ॥

अस्त्येतया न विहतिर्मचतस्तथापि
   संदेहमद्य निरवद्य[1] निराकुरुष्व ।
सर्पैरलंकृतिरियं किमु कान्तिदर्पा-
   त्किं सर्वयोषिदुपगूहनशङ्कया वा ॥ ९ ॥

पृच्छाम्यहं किमपि नाथ भवन्तमद्य
   तथ्यं निगद्य कुरु मामपि वीतशङ्काम् ।
चापाहतिः किमनतिः शिरसा स्वयं वा
   कामस्य दाहसमये तव कोपहेतुः ॥ १० ॥

---

१. 'मम देव निराकुरुष्व ।' इति पाठान्तरम् ।

यत्सत्यमत्र वद निश्चयहेतुहान्या
दोधूयते[1] मम मतिश्चिरकालमेव ।
किं ते श्मशानभसिते किमु सर्पहारे
सर्वस्वबुद्धिरुत भैक्षकपाल एव ॥ ११ ॥

एतत्कुतूहलवशेन ममास्ति किंचि-
द्विज्ञाप्यमद्य भगवन्भव सावधानः ।
किं ते गलस्य यदि वा विबुधाङ्गनानां
कण्ठस्य भूषणमवेक्ष्य विषोपयोगः ॥ १२ ॥

वाङ्मिश्रणं कुरु मदीयवचोभिरद्य
संदिग्धवस्तुकथनेन शशाङ्कमौले ।
मूर्ध्ना नतिस्तव विलोमुमलक्तरागं
गौर्याः पदे किमुत वा दृशि कोपरागम् ॥ १३ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये प्रश्नोक्तिपद्धतिः पञ्चदशी ।

षोडशी पद्धतिः ।

भिक्षाटनव्युपरमे सति यान्तमीशं
या विप्रयोगभयदुःस्थतयानुजग्मुः ।
तासां सरोरुहदृशामनुयानकाले
यच्चेष्टितं तदपि मां मुखरीकरोति ॥ १ ॥

पूर्वाङ्गमङ्गजरिपोः प्रतिनेत्रपात-
व्रीडाद्विलोकन(कित?)वती न पुरा नतभ्रूः ।
पश्चाददपश्यदपराङ्गमनुव्रजन्ती
सर्वाङ्गवीक्षणमहोत्सवभाग्यहीना ॥ २ ॥

---

1. 'डोलायते' इति पाठान्तरम् ।

आन्दोलिताममरसिन्धुतरङ्गवातै-
रिन्दोः कलां शिरसि कापि विलोक्य शंभोः ।
एषा पतिष्यति पतिष्यति संप्रतीति
तत्स्वीकृतिव्यवसिता तमनु प्रतस्थे ॥ ३ ॥
[1]तस्यां द्विदन्तिकसखीभिरुपेक्षितायाः
सख्यो न वा बत हरानुगमे बभूवुः ।
एका दृढा व्यवसितिर्महती वरान्या
काचित्कठोरगुरुवर्गनिषेधशङ्का ॥ ४ ॥
काचित्स्वबन्धुजनमेकपदे विहाय
रथ्यासमागतमनाकलितान्ववायम् ।
(?)भिक्षां विरूपनयनं वनितां विहाय
कामश्चिरं प्रणयमाहव(वह)ति क्षणेन ॥ ५ ॥
काचिज्जनस्य पुरतो मनसाध्यवस्य
मुग्धेन्दुचूडमनुगन्तुमुदश्रुनेत्रा ।
संयुध्यतोरथ जयार्थतयार्गलाभू-
दुद्रिक्तमानमदनद्विपयोर्मुहूर्तम् ॥ ६ ॥
गच्छन्तमन्तकविपक्षमनुव्रजन्ती
धात्र्या कथंचिदपि कापि निवारिताभूत् ।
चक्रेऽथ केवलमियं मनसा नु यात्रां
वल्ली यथा सुमनसा मलयानिलस्य ॥ ७ ॥
गौरीपतेरनुगमेन किमित्युदीर्य
पूर्वं पुनस्तु वचनैर्विहितानुयात्राम् ।

---

१. 'कस्याश्चिद्' इति पाठो भवेत्.

तच्चित्रमाप्तवचनैर्वनितार्थमूढै-
रित्यात्मनः प्रियसखीमपरा चुकोप ॥ ८ ॥
भिक्षाविसर्जनमकारि मया न तस्मै
मा भूत्कदापि मम याचनभङ्गदोषः।
आलप्य काचिदिति शङ्करमन्वयासी-
द्दर्वीं विना प्रहसितैव सखीजने ॥ ९ ॥
प्रते(?)बलिग्रहणकर्मणि कापि बाला
यातुं प्रवृत्तमवगम्य पिनाकपाणिम्।
एष्यं निशाघनतमस्यभिसर्तुमीशं
चूडेन्दुयाचनपरा चिरमन्विधा(या)य ॥ १० ॥
एका रहस्यभिमतं किल वक्तुकामा
दीर्घां विभोरनुगतिं विदधे मृषैव
सा किं करोतु सकलास्वपि चात्मनैव
तुल्याभिलाषगमनासु विलासिनीषु ॥ ११ ॥
एषा भविष्यति मनोभवसायकाना-
मद्यैव प(पा)त्रमिति तां सहसा विहाय।
तस्याश्चिदीशमपयान्तमियाय चेतो
नैवास्तिरापदि फलाय नपुंसकेन ॥ १२ ॥
काचित्प्रयान्तमनुगम्य पतिं जवेन
बाला पदानि कतिचिन्न पुनः शशाक।
(?)मुक्तास्त्वया दिशमनेन गतामवेक्ष्य(?)
श्वासानिल(ला)स्तमनु दूरपथा(?)नुजग्मुः ॥ १३ ॥
नास्माद्वाप्यनुमतिर्न सखी च लब्धा
संबाधिका न च तया विदितोऽस्य देशः

काचित्तथाप्यनुजगाम हरं प्रयातं
　न क्वापि हन्त गणना मदनातुराणाम् ॥ १४ ॥
संतर्जितापि गुरुभिः कृतसान्त्वनापि
　जीवोपमैः परिजनैरनुयाचितापि ।
जाल्मैश्च कापि हसिताप्यनुशोचितापि
　मध्यस्थितैर्न गिरिशानुगतिं मुमोच ॥ १५ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्येऽनुगमनपद्धतिः षोडशी ।

सप्तदशी पद्धतिः ।

सर्वेश्वरोऽपि निजशासनहानिदोषा-
　द्ग्रामेषु भैक्षचरणादिषु यः प्रयत्नः(त्तः) ।
आधातुमस्य विनयं गिरिशस्य चक्रुः
　शिक्षावचांसि दृढभक्तिवशेन नार्यः ॥ १ ॥
याचे विभो जहि कराग्रकरोटिपात्र-
　मेतद्विधातृवधपातकसूचकं ते ।
कर्मायशस्यमवशापतितं स्वकीयं
　कः श्लाघयत्यनुदिनं जगति त्वदन्यः ॥ २ ॥
दाता जनोऽस्तुभुवने भवतोऽप्यनेकः
　कामं तथापि न फलाय तवार्थितोऽयम् ।
रत्नाकरो विधिवशाद्यदि नाम शुष्ये-
　त्कस्तस्य पूरणविधानपटुः पयोदः ॥ ३ ॥
भिक्षाटनं तव न यद्यपि वर्जनीयं
　देहीति मा वद कदापि शशाङ्कमौले ।

अभ्यर्थिनामवनताननमुद्रुयैव(?)
दाता ददाति नहि देहिगिरापि लुब्धः ॥ ४ ॥
आमो(त्मो)परोधविरसा करुणा न जातु
भूयादितः प्रभृति ते कृपणामरेषु ।
चक्रे निसर्गविमलस्य तवापि कण्ठे
कार्ष्ण्यं वृषध्वज यदीयविपाकदोषः ॥ ५ ॥
गीर्वाणलोकसरिता सह नित्यमेना-
मस्थ्यावलिं शिरसि मा बिभृयाः पुरारे ।
त्वयं (य्य)क्रमाकलितविश्वपदार्थवर्गे
मा भूत्कदापि न विशेषविदित्यवद्यम् ॥ ६ ॥
भीमं भुजङ्गमपहाय पिनाकपाणे
कण्ठे कुरु प्रकृतिशीतलमेव हारम् ।
तेनैव शान्तिमुपगच्छतु कालकूट-
नित्यास्पदस्य सहसैव गलस्य तापः ॥ ७ ॥
मा जातु चन्द्रशकलाभरण श्मशाने
क्रीडा विभो सह पिशाचगणैर्विधेया ।
क्षुद्रे चिरं परिचयो विहितो विधत्ते
सौजन्यभूषणभृतामपि चित्तभेदम् ॥ ८ ॥
कस्त्वा निरोद्धुमलमीश यथेष्टचारं
विज्ञापनीयमथवास्ति ममैतदेकम् ।
गौरीपयोधरनिसर्गपरिग्रहेऽस्मि-
न्वक्षस्यमङ्गलचिताभसितं न कार्यम् ॥ ९ ॥
शार्दूलचर्मवसनव्यसनं विहाय
क्षौमं सुरद्रुमभवं परिधेहि नाथ ।

नैतेन यद्यपि तवास्ति विशेषलाभः
शोभां तदाशु लभतां तव संश्रयेण ॥ १० ॥
प्रागेव जृम्भितमभूदयशो जयत्सु
पुष्पायुधं यदकरोर्नयनाग्निहव्यम् ।
नेत्रानलात्परिहरास्य सहायमिन्दु-
चूडापगोर्मिचलनाद्भव सावधानः ॥ ११ ॥
श्वासेन हुंकृतिमता स्तनितैः कठोरै-
रुत्तुङ्गशृङ्गयुगलेन च भीषणेन ।
यस्त्रासमावहति भीरुजनस्य शंभो
हित्वा जरद्गवमिमं कुरु भैक्षचर्यम् ॥ १२ ॥
तेनैव वित्तपतिना जहि मैत्रबन्धं
याच्ञाञ्जलिः शिरसि नाथ मुहुः कृतो मे ।
भिक्षाटनादुपरतिं तव यो न चक्रे
शक्तो न चेत्कर[1]करोटिविपर्ययं वा ॥ १३ ॥
मा दूयये पदयुगं नलिनप्रकारं
सुत्रामनाथ पितृकाननचंक्रमेण ।
यत्क्षालयत्यहरहः परिषत्सुराणां-
मुत्तंसपुष्पगलितैर्मकरन्दपूरैः ॥ १४ ॥
योगोचिते मदनसूदन सांध्यकाले
शोकोचिते शवशतैर्निचिते श्मशाने ।
प्रेतप्रमोदनटनं भवता न कार्यं
दिग्देशकालगणनाविधुरं चरित्रम् ॥ १५ ॥

---

१. 'तत्राक्षमः करकरोटिविपर्ययं वा ।' इति पाठान्तरम् ।

आत्मीयभूतिपरिभूतिकरीं समृद्धि-
माकल्ययाल्पशशिभूषणभृत्यवर्गे ।
आरोप्यते जलजनैर्जगदाधिपत्यं
यत्त्वत्समाश्रयणलब्धपदे मुकुन्दे ॥ १६ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये भिक्षाटनपद्धतिः सप्तदशी ।

अष्टादशी पद्धतिः ।

भिक्षाप्रतिग्रहमिषेण मृगेक्षणाना-
मादाय मानमपयायिनि लोकनाथे ।
रथ्यासु दुःसहनवोत्कलिकाकुलानां
तासां चरित्रमहमद्य विजृम्भयामि ॥ १ ॥
हारः क्वचित्क्वचिदलक्तरसः क्वचिच्च
धम्मिल्लपुष्पनिवहः क्वचिदुत्तरीयम् ।
काप्यर्धभग्नवलयानि मृगेक्षणानां
रथ्यां हरेण कृतचंक्रमणां विवव्रुः ॥ २ ॥
क्षोणीतले········निपातितहारमुक्तां
स्वीकर्तुमादृतवतीव निषण्णमूर्तिः ।
रथ्यारजःसु निहितानि विभो पदानि
काचिद्ददर्श सुचिरं पुरतः सखीनाम् ॥ ३ ॥
काचित्पुरारिपदलाञ्छनभूषिताया
वीथ्याविमोक्षविमुखी पुरतः सखीनाम् ।

---

१. 'चेतः प्रमथ्य गलिते सति लोकनाथे ।' इति पाठान्तरम् ।

भूमौ विकीर्य मुषतो(?) निजहारमुक्तां
तासां क(क्र)मग्रहणसंभ्रममाचकार ॥ ४ ॥
आदाय शंभुपदमुद्रितमादरेण
रथ्यापरागमपरा निदधे कुचाग्रे ।
कन्दर्पमुक्तशितबाणनवव्रणानां
निर्वापणार्थमिव सिद्धरसस्य चूर्णम् ॥ ५ ॥
मार्गे शिवस्य पतितं कृतमालपुष्प-
मादाय कापि बहु संकटमाससाद ।
यत्पुष्पमात्रधृतिभूषितमुत्तमाङ्गं
नैवाङ्गमस्ति च यदन्यत(द)तो वरिष्ठम् ॥ ६ ॥
शंभोः कपर्दगलितं कृतमालपुष्पं
लब्ध्वा सखीं प्रमुदितामवलोक्य काचित् ।
वीथ्यागतप्रणयिना स्वयमप्यवाप्तुं
चूडानदीमलभतैव दृशोः क्षणेन ॥ ७ ॥
वीथ्या ययाप ललितां कृतपुष्पमालां
शंभोः कपर्दगलितामपरा वहन्ती ।
तां वीथिकां न विजहौ शशिखण्डलोभा
लब्धेऽप्युपर्युपरि काङ्क्षत एव लोकः ॥ ८ ॥
वीथ्यां शिवस्य चरणाम्बुजदत्तमुद्रां
काचिद्विलोकयितुमाननमानमय्य ।
धारात्मना निपतदश्रुजलात्तदानीं
ज्याबन्धनी मदनकार्मुकयष्टिरासीत् ॥ ९ ॥
अत्रस्थितं सुचिरमत्र बलिर्गृहीता
साकूतमत्र गिरिशेन विलोकिताहम् ।

इत्याकुला परिजनैः सह तत्र तत्र
बभ्राम नष्टमिव कापि मनो विचेतुम् ॥ १० ॥
स्वीकर्तुमैच्छदपरां वसनाञ्चलेन
पांसुं....हरस्य पदमुद्रितमादरेण ।
विन्यासलोपचकिता मुहुरीक्षमाणा
नैवाददे न च मुमोच वधूश्चिराय ॥ ११ ॥
आदौ वृषस्य खुरधूलिरथास्य घण्टा-
नादः पुरः शिशिरमौलिधुनीसमीरः ।
वीथी स्वयं तदनु भूतपतेः प्रवासे
कस्याश्चिदाश्वसथहेतुरभूत्क्रमेण ॥ १२ ॥
संबन्धि वस्तु दयितेन सुदूरतोऽपि
लब्धं मनो रमयति ध्रुवमङ्गनानाम् ।
ईशानवाहनवृषाङ्घ्रिखुराहतायां
वीथ्यां रजोभिरपि निर्वृतिमाप काचित् ॥ १३ ॥
वीथ्यां चकार कृतमालमवेक्ष्य काचि-
न्मौलेः शिवस्य निपतेदिति जाततर्का ।
दैवात्तदास्यपचिचाय पुनः शशाङ्कं
लब्धेऽप्युपर्युपरि काङ्क्षत एव लोकः ॥ १४ ॥
यस्यां विरञ्चिबलसूदनदुर्लभाभ्यां
पद्भ्यां चचार सुचिरं स विहारभिक्षुः ।
स्वच्छन्दकेलिभवनादपि सैव रथ्या
पथ्येति कापि न कदापि गृहं विवेश ॥ १५ ॥
आत्मीयमेव धवलं वलयस्य खण्डं
मार्गे शिवस्य पतितं वनिता विलोक्य ।

सद्यः कपर्दगलिता शशिनः कलेति
　जग्राह काचिदुपसृत्य कुतूहलेन ॥ १६ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये रथ्याचरितपद्धतिरष्टादशी ।

एकोनविंशी पद्धतिः ।

आत्मीयनेत्रपथलम्बिनि भूतनाथे
　रथ्यागता हरवियोगविषादशान्त्यै ।
वामेक्षणा जगदुरस्य कथाप्रसङ्गा-
　दाविष्कृतामृतरसानि मिथो वचांसि ॥ १ ॥

कस्मादयं सखि करेण बिभर्ति शंभु-
　र्भिक्षाटने विधिशिरोमयमेव पात्रम् ।
कार्या कदाचिदपि नार्थिषु कालहानि
　र्दीर्घायुषामपि दशेयमितीव शास्ति ॥ २ ॥

पोत्री पदाम्बुजमलं न बभूव बोद्धु-
　माद्यो जटाटविमुमादयितस्य हंसः ।
क्रोडस्य काननचरस्य न पङ्कजेन
　हंसस्य पद्मवसतेर्न वनेन योगः ॥ ३ ॥

कोऽन्यो ददाति हिमसानुमतस्तनूजां
　मारद्रुहे च जगति श्वशुरद्रुहे च ।
तं लब्धुमद्रितनयामपहाय कन्या
　का वा करोति सुकुमारतनुस्तपांसि ॥ ४ ॥

कैवापरा गिरिसुतामपहाय कन्यां
　कामद्रुहं जगति कामयती वृषाङ्कम् ।

तस्याः पितुर्हिमवतः श्वशुरद्रुहेऽस्मै
कोऽन्यो ददाति तनयामपहाय भीतः ॥ ५ ॥
अभ्यर्थितः सुरगणेन विमुक्तशङ्क-
श्चक्रे हरः किमिति तीव्रविषोपयोगम् ।
मन्येऽहमुत्तमगुणा गणयन्ति पथ्यं
याच्ञाविभङ्गकरणाद्विषपानमेव ॥ ६ ॥
नेत्रानलार्चिषि विभोर्मदनेन साकं
प्लोषोत्सवं किमिति नैव रतिः प्रपेदे ।
सा तत्र यत्नमकरोदथ भाग्यहान्या
तस्या बभूव नयनोदकमन्तरायः ॥ ७ ॥
कामप्रिया मदनमेव विभोर्वितन्वं
दग्धस्तदा किमिति नैव हुताशनेन ।
दाह्यो न किं व्यतिकरं शिवया शिवस्य
मूढः स्वकृत्यमिति दर्शयितुं प्रवृत्तः ॥ ८ ॥
शैलात्मजासहचरोऽपि हरः किमर्थं
मन्दाकिनीं शिरसि सादरमेव धत्ते ।
इत्थं न चेत्कथमयं बहुशो भवान्याः
पादप्रहारफलदं कलहं लभेत ॥ ९ ॥
देहीति दीनपदमाहितपात्रपाणिः
केनार्थिंत्रेषमयमाह्वयने(द्रियते) वृषाङ्कः ।
सर्वो यथा विभवमाद्रियते जनोऽन्यः
कार्श्यं तथा प्रकृतिदुर्लभमीश्वरोऽपि ॥ १० ॥
भिक्षैव वृत्तिरजिनं वसनं यदस्य
वाहो वृषस्तदयमिच्छति किं महेशः ।

सर्वो यथा विभवमाद्रियते जनोऽन्यः
　　कार्श्यं तथा प्रकृतिदुर्लभमीश्वरोऽपि ॥ ११ ॥
निद्रानिमीलितविलोचनमूल्यमेष
　　शंभुः स्वदर्शनमदाद्गरुडध्वजाय ।
कालान्त एव विभवः कुटिलस्वभावै-
　　र्वृत्त्यैः प्रसाधितधियो महते फलाय ॥ १२ ॥
कैलासचालनकृतागस एव कस्मा-
　　दीशः कृपाणमदिशद्दशकन्धराय ।
संत्रासिताद्रितनयादृढकण्ठपाश-
　　लाभेन तुष्टहृदयः स न किं ददाति ॥ १३ ॥
आराध्य दुग्धजलधिः सुधयैव देवा-
　　न्देवाय हन्त महते गरलं दिदेश ।
एषा ध्रुवं प्रकृतिरेव जलाशयानां
　　नीचेषु संमतिरसंमतिरुच्चमेषु ॥ १४ ॥
विद्वज्जनो जगति येन पितामहेन
　　भिक्षाप्रतिग्रहणपात्रमकारि सर्वः ।
तस्योत्तमाङ्गमपि शंकरपाणिपद्मे
　　भिक्षाप्रतिग्रहणपात्रमहो बभूव ॥ १५ ॥
बाणाहवे मुरजिता विजितः पुरारि-
　　रित्येव विश्वगदितः सखि भूतवादः ।
सत्या स एव स यतः प्रभवो लयानां
　　भूत्यै पराक्रमणकृत्यमतीव हास्यम् ॥ १६ ॥

---

१. अस्फुटार्थोऽयमुत्तरार्धः.

शंभो पुरा यदभवन्मदनेन वैर-
मद्यापि किं सुदति तत्तदवस्थमेव ।
गौर्या सहैव कृतविग्रहसंधिना वा
पुष्पायुधोऽपि कृतविग्रहसंधिरेव ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये चरितोपलालनपद्धतिरेकोनविंशी ।

विंशी पद्धतिः ।

गौरीवरस्य पदपातपवित्रपांशुं
रथ्याः कथंचिदपहाय शनैः प्रवृत्तैः ।
गेहे प्रवेशचरितैः पुरमानिनीनां
वाणीमिमां वयममी चरितार्थयामः ॥ १ ॥

काचित्सखीविहितपथ्यवचोङ्कुशानां
पातैः प्रवृत्तिविपरीतशिरोविधूतिः ।
पार्श्वस्थितैः परिजनैः परिणुद्यमाना
कृच्छ्रेण दुष्टकरिणीव निकेतमाप ॥ २ ॥

अच्छिन्नया स्मृतिरम्परयैव वीथ्यां
गौरीपतिं विहितसन्निधिमीक्षमाणा ।
सर्वास्वपि स्वनिलयं प्रति कामिनीषु
यातासु कापि न चकार गृहप्रवेशम् ॥ ३ ॥

प्राक्संगमे पुरजिता मदशोणरूपं
शोकेन पाण्डुरमतो नु गृहप्रवेशम् ।
कस्याश्चिदाननमभूदुदयाद्रिमेत्य
भूयः क्रमाद्विजहता शशिना समानम् ॥ ४ ॥

आश्रित्य यं भवनतोरणदीर्घदण्डं
　पूर्वं पुरारिमवलोकयति स्म काचित् ।
तन्मोक्तुमेव न शशाक गृहप्रवेशे
　प्राप्ते तदा कलितमूर्तिरिव स्मरास्त्रैः ॥ ५ ॥
नीतां कथंचन गृहं प्रियबन्धुवर्गो
　भूयोऽपि निर्जिगमिषुं सहसा रुरोध ।
स्निह्यत्यकारणमपूर्वकपालिनीति
　तस्याः कथा झटिति हन्त बहिर्गतैव ॥ ६ ॥
निःश्वासमात्रशरणामकरोदवस्थां
　कस्याश्चिदीशमपहाय गृहप्रवेशः ।
मत्तं मतंगजमपोह्य विधेर्विपाका-
　द्वारिप्रवेश इव तापकरः करिण्याः ॥ ७ ॥
तापेन शोकमहता प्रविहाय रथ्या-
　मेका विवेश भवनं बहवो निरीयुः ।
श्वासानिलैर्निरवधिर्नयनाम्बुपूरो
　वादश्च हन्त विषमेक्षणरागिणीति ॥ ८ ॥
आपाण्डुगण्डयुगला गलदश्रुनेत्रा
　स्वस्थानविच्युतकटीगुणबद्धपादा ।
आलीजनेन परितः परिरक्ष्यमाणा
　बन्दीव कापि शनकैर्वसतिं विवेश ॥ ९ ॥
पूर्वं गृहात्प्रचलिता हरदर्शनाय
　यामङ्घ्रियावकरसैररुणीचकार ।
बाष्पैर्मषीमलिनितैर्विनिवर्तमाना
　तामेव कापि पदवीमसितां चकार ॥ १० ॥

काचित्कथंचन सखीजनसान्त्ववादै-
र्द्वारं गतापि हरमार्गविलोकनेच्छुः ।
बाणी मनस्विन इवार्थनदैन्यकाले
नान्तर्गता च वनिता न बहिर्गता च ॥ ११ ॥
या पूर्वमुन्नतपयोधरगौरवेण
क्लान्ताप्यवाप हरमीक्षितुमाशु रथ्याम् ।
तस्यैव सा हृदयदेशजुषा गरिम्णा
गेहप्रवेशमशकन्न पुनर्विधातुम् ॥ १२ ॥
नाथे चिरेण पतितामनिवर्त्य बुद्धिं
काचित्स्वयं निववृते गुरुवश्यबुद्धिः ।
तस्याः पुनर्बहुविचारसखीं विनैव
बुद्धिं कृतं तदनु हास्यमभूच्चरित्रम् ॥ १३ ॥
काचित्कथंचिदपि नैव गृहं विवेश
रथ्यां विहाय बहुभिः कृतसान्त्वनापि ।
कामातुरस्य हृ(ह)तबन्धुजनावकीर्णे
कारानिवाससम एव गृहे निवासः ॥ १४ ॥
गेहं प्रविश्य पुनरप्ययमागतः स्या-
द्वीथ्यां वृषाङ्क इति कापि विनिर्जगाम ।
रथ्यासु भैक्षचरणादपरं न कृत्यं
तस्येति सा मृदुमना गणयांचकार ॥ १५ ॥
काचित्प्रदक्षिणविकर्शनदुर्बलाङ्गी
वीथ्यां निपात्य निजभूषणमेकमेकम् ।
यावद्गृहोपगमनं ननु तावदेव
रथ्यावशेषसकलाभरणा बभूव ॥ १६ ॥

वीथ्याः कथंचन गृहं वचनप्रभेदैः
प्रावेशयद्भिरहिर्णीं प्रियबन्धुवर्गैः ।
चित्तं तदीयमसमाक्षविरक्तिवाचा
नालं प्रवेशयितुमेव पुनर्बभूव ॥ १७ ॥

काचिद्विवेश शयनालयमाप्तसख्या
रथ्यां विहाय हरवीक्षणहानिदूना ।
तस्या मनश्च विरहव्यथया सहैव
श्रीकण्ठसंगममहोत्सवलम्भचिन्ताम् ॥ १८ ॥

हस्तच्युतैश्च वलयैश्चिकि(कु)रप्रमुक्तैः
पुष्पैश्च यावकरसैश्च पदाग्रमुक्तैः
कीर्णैश्च भा(हा)रमणिभिर्गिरिशस्य रथ्या-
माकल्प्य कापि शनकैर्वसतिं विवेश ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये गृहप्रवेशपद्धतिर्विंशी ।

एकविंशी पद्धतिः ।

आलोक्य मारजनितां कृपणामवस्थां
वामभ्रुवां निजगृहं पुनरागतानाम् ।
संदूयमानहृदयो हितबन्धुवर्गो
यान्यप्यवोचत वचांसि वदामि तानि ॥ १ ॥

हा हन्त दग्धमदनस्तव पुष्पशय्या-
शेषं शरीरमकरोदसहाय एव ।
रात्रावथास्य नवकैरवगन्धबन्धु-
मन्दानिलप्रभृतयो बहवः सहायाः ॥ २ ॥

१ द्वादशगु०

कालानलो यदलिकाक्षिणि रक्षितोऽभू-
त्कण्ठे च यद्गरलमर्पितमीश्वरेण ।
तत्सर्वमात्मविरहे सति बालिकानां
तापं विधातुमिति संप्रति मे वितर्कः ॥ ३ ॥
अस्या हरेण विरहादतिकर्शितायां
हस्तच्युतं वलयमेतदलब्धदेशम् ।
आस्ते पुनः स्थितिमगादिदमङ्गुलीयं
स्थानाच्युतिर्महत एव भवत्यनर्थः ॥ ४ ॥
अज्ञातमद्य तनये त्यज शोकशङ्कां
पञ्चायुधः किमपि न त्वयि जातकोपः ।
किं तु त्वदीयहृदये गिरिशं निरुध्य
बाणैस्तमेव खलु विध्यति पूर्वशत्रुम् ॥ ५ ॥
सन्तापदाय्यसुलभार्थनमित्यजस्रं
बाले वदामि न मनागपि तच्छृणोषि ।
यद्वा स्मरास्त्रनिकरे हृदयं प्रविष्टे
पथ्योक्तयो न खलु कर्णपथं विशन्ति ॥ ६ ॥
वन्ध्यत्वमध्यमनियम्यतनूजलाभाद्दुः
साधरोगनयनाद्वरमान्ध्यमेव ।
धिक्कामशिक्षितपरां मम सूतवत्याः
कृन्तत्यहो हृदयमाधिमयः कृपाणः ॥ ७ ॥
रागो नवश्चरणयोरनुयानजन्मा
मुक्तावली विरचिता नयनाम्बुलेशैः ।
अङ्गेष्वयं धवलिमैव यदङ्गरागो
दत्तः शिवेन सखि ते व्रजतैष वेषः ॥ ८ ॥

भैक्षं प्रदातुमनघाय यदोद्यमस्ते
तूष्णीं तदा सुकृतभङ्गभयादभूवम् ।
वत्से तदद्य मम पापमभूत्त्वेत्थं
यत्संशयस्थितिरियं मदुपेक्षयैव ॥ ९ ॥

सर्वोऽपि वक्ति जन एव शिवाभिधानं
भस्मावलीं प(प्र)ति यथेप्सितमङ्गकेषु ।
तन्मे सुता विदधती परिहासपात्रं
प्रायेण कामुकजनस्य गुणोऽपि दोषः ॥ १० ॥

घुर्घूरकं शिरसि नैव सुगन्धि पुष्पं
भस्म स्तने न तव कुङ्कुमचन्दनादि ।
धत्ते सुता मम किमन्यदियं वृषाङ्के
प्रेम्णा भविष्यति भुजंगमभूषणापि ॥ ११ ॥

यस्य क्षणं स्मरणमेव सुदुस्तराणां
सर्वापदामुपशमाय वदन्ति वृद्धाः ।
दृष्ट्वापि तं शिवमियं पुनरेवमार्ता
प्रायेण पुण्यमपि पुण्यवतां फलाय ॥ १२ ॥

तत्सत्यमेव किल यन्नवबन्धुजीव-
शोभाहरं सखि हरायनमामनन्ति ।
तस्मान्नि(द)तीव रतिमद्य दधासि तेन
शोभागतैव तव शंसयितुश्च जीवः ॥ १३ ॥

मेघं विना स्थितिमगान्न तडित्तथैव
बाला वृषाङ्कमिति भीतिरभूत्पुरा मे ।
लाभो महानयमहो यदभूदमुष्याः
प्राणैर्निजैः सह पुनर्भवनप्रवेशः ॥ १४ ॥

यस्त्वां क्षिणोति विशिखैः स्वशरण्यभूता-
मेवं सदा सुमुखि तेन समः स मारः ।
शाखां स्वयं समधिरुह्य महीरुहस्य
यस्तां छिनत्ति निशितेन परश्वधेन ॥ १५ ॥
यन्न्याय्यवर्त्मगमनं निपुणा च या धी-
र्लज्जा च या यदपवादभयं त्वदीयम् ।
तत्सर्वमालि कथमेकपदे विनष्टं
सर्वंकषः स खलु तत्रभवाननङ्गः ॥ १६ ॥
बालामिमां हतमनोभवपुष्पबाणै-
र्मा विध्य संप्रति वदामि तवैव पथ्यम् ।
अस्या मनस्यविरतं वसतीन्दुमौलि-
स्त्वं न किं भवसि तेन पराजयं ते ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये बन्धुवचनपद्धतिरेकविंशी ।

द्वाविंशी पद्धतिः ।

यैश्चेष्टितैः प्रकटितः पुरसुन्दरीणां
भूयो विजेतरि पुरामनुरागबन्धः ।
प्रस्तुत्य तानि विरहोज्ज्वलमन्मथानि
संपादयामि विदुषां श्रवणातिथेयम् ॥ १ ॥
संतर्जिता गिरिशमालपसीति मात्रा
काचिन्नपानतमुखी भुवमालिलेख ।
रेखा तदाकृतिरभूत्किमियं विधत्तां
चित्तानुसारि वचनं च विचेष्टितं च ॥ २ ॥

पार्श्वं व्रजाशु गिरिशस्य निशान्धकारे
मा ते विषाद इति जीवसखीजनेन ।
आश्वासिता झटिति कापि निमील्य चक्षुः
संपादितं तम इति प्रमदा जगाद ॥ ३ ॥
तुङ्गौ युवामिह वृथैव प्रथासुवृत्ता-
वन्योन्यसंगमजुषौ च वृथेति काचित् ।
श्रीकण्ठबाहुयुगलान्तरकाङ्क्षयेव
कण्डूभृतौ करतलेन कुचौ ममर्द ॥ ४ ॥
काचिद्दिवैव गिरिशाभिरतिं विधातुं
संनह्यति स्म हसितापि सखीजनेन ।
रागोपजाततिमिरावृतमानसानां
नास्ति प्रियाभिसरणे दिनरात्रिभेदः ॥ ५ ॥
क्रीडाशुकं हर हरेति शनैः प्रवृत्तौ
यत्नेन पाठयितुमन्तरमन्मथापि ।
मातुर्भयेन पुनरेवमवोचदेत-
दिष्टं फलं मम करादिति वाक्यशेषम् ॥ ६ ॥
बालेन्दुशेखरमनारतकालकण्ठं
पिङ्गत्विषा तिलकितालकमीक्षणेन ।
सख्योऽपि यूयमिह पश्यत पश्यतेति
कस्याश्चिदाविरभवन्विविधा विलापाः ॥ ७ ॥
बन्धुष्वनादृतवती चिरसंस्कृतेषु
भस्मावगुण्ठिततनुर्दृढबन्धमौना ।
काचित्सदैव हृदये शिवमर्चयन्ती
योगं वियोगविधुरा फलितं चकार ॥ ८ ॥

कस्याश्चन स्तनभरो भसितेन शंभो-
वक्षःस्थलप्रणयिना बनितं चकार ।
यः कर्तुमीप्सति समागमनं महद्भि-
स्तद्वल्लभेन कुरुते तदयं पुरैव ॥ ९ ॥
तुष्टाव निन्दति जने त्रिपुरारिमेका
पार्श्वस्थिते स्तुवति गाढतरं निनिन्द ।
मौनावलम्बिनि चुकोप चकोरदृष्टिः
स्नेहप्रिये दुरवबोधगतिर्वधूनाम् ॥ १० ॥
काचिन्निजाङ्कमधिरोप्य शनैर्विपञ्चीं
गाथामुपाक्रमत पाठयितुं शिवस्य ।
तस्या विलोचनजलैः पुनरार्द्रव(य)द्भि-
स्तन्त्रीं स्वकीयजलता प्रकटीकृतैव ॥ ११ ॥
एका त्रपोदयवशेन पुनः सखीनां
चित्रे विधातुमसमक्षमपारयन्ती ।
बाह्यं विहाय करणं पटतूलिकादि
चेतःपटे स्मरणतूलिकया लिलेख ॥ १२ ॥
शीघ्रं नयात्र सखि संप्रति नीलकण्ठ-
मित्यूचिषी सपदि मात्र(तृ)भयेन काचित् ।
तीव्रातपादुपवनादिति पूरयित्वा
लीलामयूरविषयं वचनं चकार ॥ १३ ॥
चक्षुश्चकार निजसद्मनि यत्र यत्र
विश्लेषणैर्गिरिशमैक्षत तत्र तत्र ।
एतद्ध्रुवं सपदि संगमतोऽपि मन्ये
विश्लेष एव दयितेन वरं वधूनाम् ॥ १४ ॥

शंभुर्यथा गृहमगान्मम भैक्ष्यकाङ्क्षी
मां भिक्षयैव सह दत्तवती तदानीम् ।
प्राप्तः स एव हृदयालयमाशु तस्मै
किं देयमद्य कथयेति सखीमपृच्छत् ॥ १५ ॥

अध्यापितो रहसि केलिशुकः कयापि
नामानि मन्मथरिपोर्विरहार्तिशान्त्यै ।
तानि क्षणाद्गुरुजनस्य परो निगद्य
तस्या मनस्थविकृतिं प्रकटीचकार ॥ १६ ॥

यः कोऽपि सोऽस्तु विषमा गतिरेष रोगो
भस्मार्पणं निखिलरोगसमा चिकित्सा ।
मातुः पुरो वचनमेवमुदीरयन्त्यां
सख्यां न्यधत्त तरलां दृशमाशु काचित् ॥ १७ ॥

काचिन्निजाशयतिरस्करणाय शंभो-
र्निन्दापराण्यकथयद्वचनानि बाला ।
तानि प्रकोपमधिकं जनयांबभूवु-
स्तस्याः पुनः परिजनैरनुभाषितानि ॥ १८ ॥

गाथाः शिवस्य विलपन्नपरो मृगाक्ष्याः
क्रीडामृगो विरहतापमपाचकार ।
संस्मारयन्निजगलेन सितेतरेण
कण्ठं तदीयमसकृद्गृहबर्हिणोऽपि ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्येऽनुरागपद्धतिर्द्वादशी ।

त्रयोविंशी पद्धतिः ।

याभ्यो दुरापहरसंगमलोलुपाभ्यो
बन्धुर्जनः स कटु पथ्यवचो बभाषे ।
तासां तदीयवचनश्रवणार्दितानां
ब्रूमो वचांस्यनुगुणार्थमनोहराणि ॥ १ ॥
मातः सदा गिरिशसंगमविघ्नमेव
याचे करोषि न ततस्त्वयि जातरोषा ।
स्नेहं मिथो न गणयन्ति यतः पुरन्ध्र्यः
सापत्न्यमेव करणस्पृहया वहन्त्यः ॥ २ ॥
मां दुर्निवारविषमास्त्रकृतावसादां
या तर्जयत्यसकृदेव शठैर्वचोभिः ।
अप्राप्य यौवनमनङ्गविधेयमेषा
मन्ये मदीयजननी जरती बभूव ॥ ३ ॥
अद्यापि शैशवमिदं परिवर्तते मे
तन्मैव मां प्रति सवित्र(त्रि)हितोपदेशः ।
ये यौवनस्थितिजुषो जगतीह तेषा-
माचार्यकं वहति मन्मथ एव नान्यः ॥ ४ ॥
कंदर्पमुक्तविशिखव्रणिताशयस्य
यो दुर्विदग्धगुरुसंनिधिदेशवासः ।
त्रुट्यत्किरातशररुग्णतनोर्मृगस्य
मन्ये क्षुधार्तमृगवैरिगुहाप्रवेशः ॥ ५ ॥
पथ्योपदेशसमयः स गतः सदूरो (सुदूरे)
यस्मिन्न सन्ति मदनज्वरसंनिपाताः ।

किं नैव वेत्सि जननि त्वमिमामवस्थां
यस्याः कथंचिदपि जीवितमेव रक्ष्यम् ॥ ६ ॥
शाम्येदपि स्वयमयं मदनारि(ग्नि)रीशे
नैराश्यतो जननि मा कुरु तं प्रदीप्तम् ।
एधांसि नीरसनिषेधवचांसि मन्ये
कामानलस्य गुरुभिर्बहुशः कृतानि ॥ ७ ॥
स्नेहो न ते मयि परं मम देह एव
मातः किमन्यदिदम(र)त्र मम प्रमाणम् ।
ईशानुसारविनिवारणमाचरन्ती
यन्मे झटित्यसुगतेर्विदधास्यनुज्ञाम् ॥ ८ ॥
मातस्त्वदीयवचनैः शितशूलकल्पै-
र्नाहं मृता किमिति मर्मसु ताडितापि ।
प्रायः प्रियेण विरहव्यसने वधूनां
प्राणप्रयाणमपि पुण्यफलं वदन्ति ॥ ९ ॥
छायां समाश्रयति काममहाद्रुमस्य
सर्वोऽपि संसृतिमरुस्थलचारतप्तः ।
निन्दत्यथापि किमिमं वयसो विपाके
मन्ये जरा जनयति स्मृतिमूलनाशम् ॥ १० ॥
(?) अस्त्येव शंभुविषयान्मनसो विकारा-
द्रागो ममाद्य सखि मा परसङ्गमूलम् ।
पौष्पं रजः सपदि मालघ(य) मारुतार्थ्ये
मूर्ध्नो वधायमपरं(?) पुरुषं जनस्य ॥ ११ ॥
मातः समस्तमपरं वचनं विमुञ्च
शैवीसमागमकथा यदि तां शृणोमि ।

मत्कर्णयोर्ज्वलितकालहुताशतप्त-
नाराचपातसदृशोऽन्यवचःप्रवेशः ॥ १२ ॥
धामान्नि(या मां नि)यच्छति सुदुर्लभकाङ्क्षिणी भू-
र्मा मेति किंचिदपि सा जननी न वेत्ति ।
सर्वैर्विना प्रियतमैः सुखमासितव्यं
स्वापेक्षया यदि भवेदभिलाषबन्धः ॥ १३ ॥
मामद्य शिक्षयसि शंकरवादमात्रा-
द्रोमाञ्चकण्टकितमूर्तिरसि त्वमेव ।
वृद्धः करोति विनयं विषयात्परस्मै
तस्मान्मनागपि निवर्तितुमक्षमोऽपि ॥ १४ ॥
कष्टा नितान्तमशरीरिशरेण पीडा
तस्या यदस्य(?)तितरार्तिगतो विशेषः ।
प्रायेण शत्रुरपि शोचति मर्त्यमार्तं
मातापि नैव दयि(य)ते मदनातुरेषु ॥ १५ ॥
त्रातुं कृताभिलषितैःस्मरयन्त्रवृत्ता-
न्मौनव्रतैर्गुरुजनैर्भवितव्यमेव ।
स्वादूकरोति सुकृतामपि कामवृत्तिं
शास्त्रेण वा गुरुजनेन च वा निषेधः ॥ १६ ॥
यो वक्ति पथ्यवचनं हृदयानुकूलं
यो वा भिषज्यति भिषक्प्रियभेषजेन ।
तावेव बान्धवजनश्च चिकित्सकश्च
प्रच्छन्नशत्रुरपरो न सुहृन्न वैद्यः ॥ १७ ॥
एतन्नम(?)प्रथममम्ब मयि त्वदीये
प्रेम्णे पुनस्तदनुरूपविचेष्टितेभ्यः ।

यन्मां प्रतीत्थमुपदेशविधिस्तवायं
　　मा भूद्विजेतरि पुरामनुरागबन्धः ॥ १८ ॥
अद्यापि शैलसुतया वपुरैक्ययोग-
　　मङ्गीकरोति गिरिशः स्वयमादिवृद्धः ।
केषांचिदत्र तदयं जरतां जनानां
　　कामानवाप्तिपर एव विरक्तिवादः ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये गुरुवचनोपालम्भपद्धतिस्त्रयोविंशी ।

चतुर्विंशी पद्धतिः ।

रथ्यां विमुच्य कथमप्यसुनिर्विशेषै-
　　रालीजनैर्भवनमाशु निवेशितानाम् ।
वामभ्रुवां शशिकलाधरविप्रयोगे
　　देहाश्रयाणि चरितान्युपलालयाम ॥ १ ॥
कस्याश्चिदक्षियुगलाधरयोर्वियोगे
　　जातः प्रसाधनविधेर्विपरीतभावः ।
बाष्पैस्तयोः प्रथम आहितराग आसी-
　　दन्तःश्वसन्मलिनितः श्वसितोष्मणैव ॥ २ ॥
भस्मालिलेप कुचयोर्हरिचन्दनादि-
　　लेपं विहाय विरहे वनिता हरेण ।
बाष्पोदकं तदपि हन्त पुनर्निरासे
　　शुध्यन्त्ययोर्निरसनेन जलस्य भेदः ॥ ३ ॥

---

१. अस्योत्तरार्धस्यास्फुटत्वम्,

त्यक्तेऽपि रत्नवलयैः सह केलिपद्मै-
हस्तादवाप्तगलने मणिकंदुकेऽपि ।
कस्याश्चिदेव न जहौ करभूषणत्वं
क्रीडाशुकः पठितशंकरनामधेयः ॥ ४ ॥
श्वासानिलश्च नयनोदकनिर्गमश्च
जातागसी(सौ) विरहिणीकुचयोरभूताम् ।
आक्षेपणेन लघुनो वरणांशुकस्य
लोपेन च प्रचुरचन्दनकर्दमस्य ॥ ५ ॥
विश्लेषदुर्बलमकारणपाटलेन
संसृज्यमानमपि गण्डतलं करेण ।
आपाण्डुरच्छवि बभूव मृगेक्षणायाः
संसर्गजा इति मृषैव गुणाश्च दोषाः ॥ ६ ॥
संमानपात्रमहमस्म्यमृतांशुमौले-
र्भूयासमित्यधिकवर्धितकौतुकेव ।
अन्या वधूरहरहः परिकर्शनेन
स्वाङ्गं शशाङ्ककलया सममेव चक्रे ॥ ७ ॥
कस्याश्चिस्रग(रं ग्ल)पितचम्पककान्ति गात्रं
जातं हरेण विरहे घनसारगौरम् ।
(?)निःशृङ्खलप्रसृतिभिस्तदसंनिधाने
व्याप्तं मनोभवयशोभिरिवा(रा)बभासे ॥ ८ ॥
दृष्टे पुरा पुरविरोधित(नि) काचिदङ्गै-
र्या कण्ठकोद्गतिमयीं(?) ह रतिं प्रपेदे ।
तां नैव जातु विजहौ विरहेऽपि तस्मि-
न्नन्तर्हितेऽपि सवितर्यरविन्दिनीव ॥ ९ ॥

तुल्या शशाङ्ककलयेति मृगेक्षणायाः
स्थौल्यातिरेकभणितावपरः प्रकारः ।
अङ्गानि शंकरवियोगभुवा तनिम्ना
मध्याङ्गसाम्यमितराण्यपि शोच्यमापुः ॥ १० ॥

आत्मीय एव सति धार्यदशां प्रपन्ने
कस्तस्य धारणमृते परधारणाय ।
[1]यत्खेदपाण्डरमधान्मुखपद्ममेका
हस्तोदरे विरहिणी न तु केलिपद्मम् ॥ ११ ॥

कस्याश्चिदश्रुसलिलेषु कृताभिषेकं
शोकानलेन हृदयज्वलितेन तप्तम् ।
गौरीपतेरुपरि लब्धुमिव प्रदेशं
तीव्रं तपः पृथुकुचद्वयमाचचार ॥ १२ ॥

आप्तो भवेद्यदि विपत्करणे प्रवृत्तः
पीडां करोत्यरिजनादपि देहभाजाम् ।
द्रष्टुं दिवा हरमुदश्रुतया मृगाक्षी
स्वप्नेऽपि लोचनमनिद्रतया रुरोध ॥ १३ ॥

नालंकृतौ न शयने न मिथः प्रलापे
न क्रीडनेषु न च भोजनपानयोर्वा ।
आस्थावती शिवसमर्पितचेतनैका
रागो निरत्ययसुखोऽन्यविरक्तिहेतुः ॥ १४ ॥

श्वेताकृतिस्तरुणपल्लवतल्पमध्ये
संध्यानभस्यभिनवा शशिनः कलेव ।

---

१. अस्फुटार्थोऽयं श्लोकः.

दुर्लक्ष्यमूर्तिरपि काचिदतीव कार्श्या-
त्संलक्षिता हितजनेन कथंचिदेव ॥ १५ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये विरहिण्यवस्थापद्धतिश्चतुर्विंशी ।

पञ्चविंशी पद्धतिः ।

निष्प्राप एव गिरिशे विहितस्पृहाणां
वामभ्रुवां मतिविभेदनकारणेन ।
आप्तो जनो रहसि यानि जगाद तानि
प्रत्युत्तरैः सह वदामि पुनस्तदीयैः ॥ १ ॥
इन्दीवराक्षि विषमाक्ष इति प्रसिद्धे
मा त्वं कृथाः पुरविरोधिनि पक्षपातम् ।
वैरूप्यमेव सखि तस्य चिराय काङ्क्षे
येनायमन्यवनिताजनवर्जनीयः ॥ २ ॥
कण्ठे हरस्य न वरं परिरम्भणं ते
हारोरगेण न कदापि यदेष शून्यः ।
त्राताः पयोधिमरलादपि येन लोका-
स्त्रातुं न मामहिविषात्किमयं समर्थः ॥ ३ ॥
यः कामदेहदहनाद्विरसः प्रसिद्ध-
स्तस्मै कुतः स्पृहयसि त्रिपुरान्तकाय ।
कोऽन्यः क्षमेत मदनद्रुहमन्तरेण
रक्षां विधातुमिह मन्मथपीडितानाम् ॥ ४ ॥
आश्लेषणेषु कथमिच्छसि शंकरस्य
भस्मक्षयं सुरभिणा कुचकुङ्कुमेन ।

न्यूनार्धमेव भसितादपि कुङ्कुमं त-
　　दर्धस्थितिः परमभिज्ञम(कृ)तैकमन्नात् ॥ ५ ॥
येनार्धगात्रमनुरागवशाद्वितीर्णं
　　कस्यैचिदेनमपि कामयसे किमर्थम् ।
चक्रे ध्रुवं स पुनरर्धशरीरदाना-
　　दन्याङ्गनाप्रणयसंगमनाभ्यनुज्ञाम् ॥ ६ ॥
यो नीरसाग्रगणितः स्मरदेहदाहा-
　　त्तस्मिन्पिनाकिनि कथं तव कामबन्धः ।
स्वारस्यवानथ च वा विरसः स भूया-
　　त्कान्त्यैव वश्यमनसः पुरुषे युवत्यः ॥ ७ ॥
भूलोकभृङ्गवनिता यदि दिव्यपुष्प-
　　माघ्रातुमिच्छति तथा हरसंगमस्ते ।
अस्माकमक्षिविषयः सहसैव योऽभू-
　　त्किं संभवेन्न हि हरेण समागमोऽपि ॥ ८ ॥
पाणिं हरेण यदि वाञ्छसि गृह्यमाणं
　　भीरु त्वयाप्युरगकौतुकमेव धार्यम् ।
सत्यं तदेव दृढकौतुकबन्धि(न्ध)नं मे
　　व्यर्थः करे शिथिलकौतुकतन्तुबन्धः ॥ ९ ॥
भर्तारमिच्छसि शिवं यदि तेन सार्धं
　　वस्तव्यमालि नियतं पितृकाननेषु ।
एणीदृशां हृदयवल्लभसंनिधाने
　　सौधस्थलस्य विपिनस्य च को विशेषः ॥ १० ॥
हित्वा तपांसि परुषाणि हरो दुरापः
　　कर्तुं क्षमं न खलु तावकमङ्गमेतत् ।

मुग्धे तदीयविरहानलतीव्रतापा-
दसादसह्यतरमस्ति तपः किमन्यत् ॥ ११ ॥
शैलात्मजैव हरमर्हति कामिनीषु
मुग्धे कथं कथय तेन समागमेच्छा ।
अर्हेतराणि गणनापरवेषवन्ति
सर्वोऽपि सर्वमपि वाञ्छितुमर्ह एव ॥ १२ ॥
उन्मादिनी त्वमिति निश्चितमालि किं तु
तन्मात्रवेषचरिते यदि ते रिरंसा ।
उन्मादिनी यदि भवेयमहं तथा त्वं
नो मन्त्रशिक्षणविधिः प्रकृतिस्थितानाम् ॥ १३ ॥
गौरीं विना सखि कदापि न शंभुरास्ते
कालोऽन्यया सह न तस्य समागमाय ।
रात्र्या सहैव चरि(र)तो दिवसस्य नित्यं
किं संध्यया न सममस्ति मुहूर्तयोगः ॥ १४ ॥
व्रीडां तनोति मदिराक्षि विशेषतोऽपि
वामभ्रुवामननुरागिणि रागबन्धः ।
श्लाघावहो भवति नैव किमापगाना-
मम्भोनिधेरुपरि यत्स्वयमेव पातः ॥ १५ ॥
कामं हरः सुलभ एव विहाय भीतिं
सापत्न्यमिच्छसि कथं जगतां जनन्याः ।
अस्थानधावनपरस्य मनोभवस्य
प्रायेण नैव हि जलस्थलयोर्निपातः ॥ १६ ॥
गौर्याः पुरो वहति यः शिरसैव गङ्गां
विस्रम्भभूमिरियमालि कथं परस्य ।

स्त्रीशब्दमात्रतरले तरुणेन्दुमौलौ
तस्मिन्ममापि खलु पाक्षिकलाभशङ्का ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्येऽतिदीनोक्तिप्रयुक्तिपद्धतिः पञ्चविंशी ।

षड्विंशी पद्धतिः ।

उद्यानमाशु विविशुर्हरविप्रयुक्ता
नार्यो निजार्तिपरिहारमतिभ्रमेण ।
पूर्वं निरूढपतनैर्मदनः शरैस्ता..........
स्तस्याथ दृश्यपतनैश्च सुसंस्कृतेव ॥ १ ॥

काचिन्निजोपवन एव वियोगरुग्णा
पुष्पाणि वीक्ष्य विकचानि भृशं दुदूये (?) ।
हासो जनस्य निजचापलदर्शनोत्थः
सद्यः स्मरातुरजनैर्ननु पुष्पहासः ॥ २ ॥

आलोलकिंशुकतरोस्तरुणप्रसून-
मापाटलं परिजहार भयेन काचित् ।
निर्भिन्नकामिहृदयक्षतजावसक्तं
नूनं स्मरास्त्रमिदमित्युपजातबुद्धिः ॥ ३ ॥

काचिद्वधूः शमय शंभुवियोगताप-
मित्यादरेण मलयद्रुममालिलिङ्ग ।
लेभे स सिद्धिमतुलां तरुणैरलभ्यां
नैषा स्मरार्तिशमनं फलमाप किंचित् ॥ ४ ॥

कन्दर्पबाणनिकषच्युतचूर्णकल्पं
सद्यः परागमवलोक्य दिशासु पौष्पम् ।

आसूचिताखिलवियोगिजनव्यपाय-
मुत्पातपांसुमपरा गणयांचकार ॥ ५ ॥
काचिद्गता विरहिणी सहकारमूल-
माकर्ण्य शब्दमशनिस्वननिर्विशेषम् ।
सद्यः किमित्युपरि लोचनमर्पयन्ती
पापादवैक्षत भयंकरमन्यपुष्टम् ॥ ६ ॥
कर्णे कयापि करपल्लवमर्पयन्त्या
भृङ्गस्वनव्यथितया गृहवाटिकायाम् ।
व्याख्यातमेव च सखीजनदीयमान-
कर्णावतंसनवपल्लवनैरपेक्ष्यम् ॥ ७ ॥
दृष्ट्वा पलाशमुकुलान्कुटिलस्वभावा-
न्काचिद्भयादपससर्प सुदूरतोऽपि ।
मिथ्या प्रकाश्य भुवने निजसौमनस्यं
कौटिल्यमात्मनि वहन्परिवर्जनीयः ॥ ८ ॥
आलम्बितो विरहदुःखितया कयाचि-
दाम्रद्रुमस्य सहसा तरुणप्रवालः
कृष्णच्छविर्यदभवन्ननु युक्तमस्य
प्रागेव पाणितलशोणितमस्तकस्य ॥ ९ ॥
यस्यैव चम्पकतरो(र)पनीय(?) पूर्वं
मूले ददौ (वि)मलशीतलवारिधाराम् ।
तस्येतरा कुसुमितस्य विनिश्चिकाय
दातुं पुनर्विरहिणी निशितास्त्रधाराम् ॥ १० ॥
भृङ्गस्वनाढ्य(ढ्य)कुसुमे कुरवे पुरस्थे
गाढं निमील्य नयने विरहिण्यमलात् ।

कर्णद्वये तु निजसिद्धिविधानहीने
काचिन्ननन्द च निनिन्द च पद्मयोनिम् ॥ ११ ॥
काचित्पुरा प्रतिदिनं परिवृद्धिहेतो-
र्यस्यै दिदेश सलिलं नवमल्लिकायै ।
सा पुष्पितैव जलमश्रुमिषाद्वियोगे
तस्यै प्रदाय कथमप्यनृणा बभूव ॥ १२ ॥
पुष्पेषु संस्मृतिमतीं क्वणितालिमाला-
मालोक्य कापि महदेव भयं प्रपेदे ।
शंभोस्तृतीयनयनानलधूमनीला
सा मन्मथस्य धनुषो यत एव मौर्वी ॥ १३ ॥
यो लम्बितो विरहधर्मितया कयाचि-
दुद्यानचूतविटपो मधुसंभृतश्रीः ।
म्लानप्रवालकुसुमः क्षणएव जातः
स्पर्शोऽपि कामुकजनैः कुरुते विपत्तिम् ॥ १४ ॥
अङ्गारसंचयमतिर्विरहातुरायाः
पुष्पेष्वजायत पलाशमहीरुहस्य ।
सा स्थापितैव मधुपैः पुनरत्र लीनैः
किंचित्प्रशान्त्युचितकार्ष्ण्यधियं विधाय ॥ १५ ॥
मा पुष्पितोऽयमिति नैव चकार काचि-
दुद्यानभाजि पदघातमशोकयूनि ।
न्यक्कारकृत्यमपि नाभिलषन्ति कर्तुं
प्रायः प्रसादविषयादपरत्र नार्यः ॥ १६ ॥
कामास्त्रमेतदिति जातरुषा लतासु
विश्लेषिणी सुमनसां हरणे प्रवृत्ता ।

कामास्त्ररक्षकजनैरिव सद्य एव
सैषा न्यरोषि(धि) कृतहुंकृतिभिर्द्विरेफैः ॥ १७ ॥
स्निग्धेन कोकिलरुतेन नवोद्गतेन
चूताङ्कुरेण पवनेन च मालयेन ।
कालं वसन्तमवलोक्य जनोपकण्ठे
कालं वसन्तमपरा कलयांचकार ॥ १८ ॥
आलम्बिता विरहधर्मितया कयाचि-
त्क्लान्तप्रवालकुसुमाभवदाम्रशाखा ।
तां वीक्ष्य तादृशदशां प्रणयिन्यथास्यां
दीर्घं स्वकीयमजुगुप्सत बन्धुभावम् ॥ १९ ॥
आमूलपुष्पितमवेक्ष्य पलाशमन्या
विश्लेषिणी ज्वलितबुद्धिरिमं शशाप ।
अङ्गारकारकरगोचर एव पूर्वं
पश्चात्त्वमेवमरुणच्छविराशु भूयाः ॥ २० ॥
यस्याश्चिराय विदधे गृहयूथिकायाः
पुष्पोद्गमाय बहुदैवत[त]र्पणानि ।
तां पुष्पितेन परिगृह्य चकार काचि-
द्विश्लेषिणीयुवतिजातिसमानकक्ष्याम् ॥ २१ ॥
अप्यात्मनापरिहृतेन सखीसमक्षे
दृष्ट्वा वसन्तसमये बकुलं सपुष्पम् ।
काचिद्व्यथां विरहिणी महतीं प्रपेदे
सत्यं नहि प्रतिनिधिर्भवितव्यतायाः ॥ २२ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये उद्यानचरितपद्धतिः षड्विंशी ।

सप्तविंशी पद्धतिः ।

उद्यान एव ननु पुष्पितशाखिवर्गे
विश्लेषतप्तमनसां मदिरेक्षणानाम् ।
तं तं विनोदमनुभूय विषादवेगा-
द्वाक्यानि वक्रगलितानि विजृम्भयामः ॥ १ ॥

यन्नाम ते जगति रूढमजातवृत्त्या
जातं पुरा कुरबकद्रुम वाच्यमेव ।
भूयस्तदद्य भवता कृतमन्वितार्थं
वाचालमत्तमधुपावसथं(?) प्रदाय ॥ २ ॥

उद्यानभूषण तवेदमयुक्तरूपं
छायाप्रदानहृततप्तजनश्रमस्य ।
अस्मिञ्जने विरहपावकतापवृद्ध्या
शोकातुरेऽपि यदसि त्वमशोक एव ॥ ३ ॥

वाचालकोकिल तथा मधुराणि पूर्वं
मां पीडयन्ति विधुरां तव कूजितानि ।
धन्यं धिनोति वचनैः श्रवणानुकूलै-
रन्यं दुनोति परुषैः परपुष्टजातिः ॥ ४ ॥

किं किंशुक त्वमपि संप्रति वीतलज्जः
कर्त(तुं) व्यवस्यसि रुजं कुसुमैरगन्धैः ।
अभ्यर्थितोऽहमिति विक्लवमानसाना-
मस्त्येव दार्क्ष्य(क्ष्य)मसतां परि(र)पीडनेषु ॥ ५ ॥

भृङ्गाङ्गने सखि तवापि ममापि तुल्या
श्रीकण्ठ[कण्ठ]रुचिरस्त्यथ कोप(ऽपि) भेदः ।

---

१. पद्यमिदं व्यतिरेकालंकारप्रकरणे विश्वेश्वरेणालंकारकौस्तुभेऽप्युदाहृतम्.

पुष्पेषुचेष्टितमतीव तवानुकूलं
सत्यं तदेव हि मम प्रतिकूलमासीत् ॥ ६ ॥
आपीय सीधुरसमागलमुन्मिषत्सु
पुष्पेष्वमी तत इतश्चषकायितेषु ।
मन्ये कलध्वनिमिषेण मनोभवस्य
गायन्ति मत्तमधुपा विजयप्रशस्तिम् ॥ ७ ॥
पूर्वं मया चिरतरं सहकारबुद्ध्या
यः पोषितः प्रतिविधानमुखैः प्रयत्नैः ।
जातः स संप्रति जगत्त्रयनाशहेतु-
र्हा हन्त पुष्पसमये विषवृक्ष एव ॥ ८ ॥
नृत्तोद्यमोऽसि फणिसंगमनिर्भयोऽसि
बर्हिन्यदप्यसितबन्धुरकन्धु(न्ध)रोऽसि ।
तैस्तैर्गुणैरनुकरोषि पिनाकपाणिं
हन्तुंममार्तिमधुना कथमक्षमोऽसि ॥ ९ ॥
अम्भोनिधौ निपतितो यदि सेतुहेतोः
शैलोऽपि दक्षिणसमीरणजन्मभूमिः ।
सीतेव कान्तविरहे न परं कपीन्द्रैः
संरक्षिता युवतयः सकला भवेयुः ॥ १० ॥
यत्ते निसर्गलघिमा यदभूल्लतानां
संसृज्य पुष्परजसा तव धूसरत्वम् ।
मैत्रं च यत्तव जलैरुचितं तदा तै-
र्मन्दानिल त्वमसि यत्प्रतिकूलवृत्तिः ॥ ११ ॥
आरग्वधादनिल कोरकमाहर त्वं
सद्वा प्रसूनमथवा दलमेतदीयम् ।

सौरभ्यमेव यदि वा करुणा तवाहो
किं नाञ्जनेयजनकस्य वियोगिनीषु ॥ १२ ॥
अत्युच्छ्रितासु सहकारमहीरुहाणां
शाखासु पुष्पनिबिडास्वधिरूढवन्तः ।
प्रायः कुहूरिति पिका निजकूजितेन
वध्यां निशामभिवदन्ति वियोगिनीभ्यः ॥ १३ ॥
पोषं स्वकीयजननीपरिवर्जितानां
कुर्वन्ति ये बलिभुजः पिकपोतकानाम् ।
तैः सम्यगेव विदितं परिरक्ष्यपात्रं
कृष्णात्मनां सुकृतरूपमपि क्रियासु ॥ १४ ॥
मात्रापि दुर्गुणतया परिवर्जितानां
के रक्षणं विदधते पिकपोतकानाम् ।
काकैर्न हन्त विदितं परिरक्ष्यपात्रं
कृष्णात्मनां सुकृतबुद्धिरसत्क्रियासु ॥ १५ ॥
पूर्वं मदीयवदनासवपुष्पितस्त्व-
मद्याहमस्मि विधिना हरविप्रयुक्ता ।
हा हन्त पीडयसि मां बकुल प्रसूनै-
र्भोक्तव्यमात्मकृतदुष्कृतमात्मनैव ॥ १६ ॥
वर्णः सुवर्णविजयी शुचिरेष गन्ध[:]
संभावना शिरसि ते परमेश्वरेण ।
एतत्तथापि कृतमाल तवास्ति दोषो
यत्संगतोऽसि मलिनैरसकृद्द्विरेफैः ॥ १७ ॥

१. इति पाठभेदः पुस्तकान्तरे दृश्यते ।

उद्यानकेलिकमलानि च तानि हित्वा
शंभोः पदाम्बुजयुगे यदि ते रिरंसा ।
गीर्वाणनाथगणकस्य जनार्दनादे-
रारुह्यतां सपदि लालित(?) मौलिमाला ॥ १८ ॥

क्वाप्युच्चयः सुमनसां कुहचित्परागो
गन्धः क्वचित्क्वचन दक्षिणगन्धवाहः ।
दिष्ट्या वसन्तसमये मरणाभ्युपाय[ः]
सार्वत्रिको विरहदुर्भरजीवितानाम् ॥ १९ ॥

पूर्वं प्रवालमथ पुष्पमथो नु गन्धं
पश्चान्मधुव्रतकुलं पुनरस्य शब्दम् ।
चूते विधाय विधिरेवमभद्रमालां
किं किं करिष्यति वियुक्तनिरूढवैरः ॥ २० ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्य उद्यानोक्तिपद्धतिः सप्तविंशी ।

अष्टाविंशी पद्धतिः ।

उद्रिक्तशंकरवियोगविषादशान्त्यै
नानाविधे सपदि बन्धुजनैः प्रवृत्ते ।
शीतक्रियाप्रकरणे वरमर्णिता(नी)नां
यद्यद्बभूव चरितं कथयामि तत्तत् ॥ १ ॥

संचारितार्द्रकदलीदलतालवृन्तै-
रुत्थापितः परिजनैः शिशिरः समीरः ।
नान्तर्ज्वरं मृगदृशां शमयांबभूव
यत्ने कृतेऽपि न फलाय मृदुः स्वभावः ॥ २ ॥

मालां नवोत्पलमयीं विरहोष्मितायाः
सख्या निधाय हृदये कृतमानुकूल्यम् ।
पुष्पास्त्रमोचनपरस्य मनोभवस्य
विस्रम्भणं न वनितासु कदापि कार्यम् ॥ ३ ॥

यः कल्पितः कुचतटे विरहातुरायाः
शैत्याय सान्द्रतरचन्दनपङ्कलेपः ।
अन्तः स तापमधिकं जनयन्नयासी-
दापाकलाक्ष्यनवकर्दमलेपकक्ष्याम् ॥ ४ ॥

कस्याश्चिदीशविरहे शयनीकृतानि
पङ्केरुहाण्यपि तया सह शोषमापुः ।
अन्यार्तिनिर्वृतिमशक्नुवतां विधातुं
म्लानिः स्वयं सुमनसामुचितैव वृत्तिः ॥ ५ ॥

धारागृहं विरहवह्निशमाय तन्व्या
भूयोऽपि मुग्धपरिवारजनश्चकार ।
तस्याः सदा कुचतटे पतिताम्बुधारे
धारागृहत्वमधिकुर्वति नेत्र एव ॥ ६ ॥

हाराः पयोधरयुगे विहिताः कयापि
विश्लेषतापजुषि नीलदशामवापुः ।
संतापशान्तिकरणाक्षमतापवाद-
माधातुमिन्द्रमणिमूर्धनि वाञ्छयेव ॥ ७ ॥

विस्रम्भिता प्रियसखीवचनेषु रम्भा-
माश्लिष्यति स्म विरहोष्मशमाय काचित् ।
कस्याश्चन स्तनयुगे निहितं मृणाल-
मानीय तेन सुषुवेऽम्बुजमाननस्य ॥ ८ ॥

आपीतरक्तकपिशा किमु जालजिह्वा
ज्वाला किमद्य जगतः किमुत क्षयाग्नेः ।
आलोक्य काचिदिति संदिदिहे सखीभि-
र्नीतानि शंभुविरहे नवपल्लवानि ॥ ९ ॥
विश्लेषिणी तरुणपल्लवक्लृप्तशय्यां
दीप्ता चितेति परिहातुमियेष काचित् ।
बाष्पोदकैस्तदुपरि प्रसरद्भिरेव
तस्या मतिभ्रममुपान्तजनो जहार ॥ १० ॥
हा हन्त कापि विधुरा रचितं सखीभिः
प्रत्यग्रपुष्पशयनं क्षणमारुरोह ।
सा मूढधीरसुनिराशजनैर्निषेव्यं
प्रायेण कामशरतल्पमिदं न वेद ॥ ११ ॥
विस्रम्भतः प्रियसखीवचनेन रम्भा-
माश्लिष्यति स्म विरहोष्मशमाय काचित् ।
तस्यास्तदूरुयुगलोपनतामवज्ञां
स्मृत्वैव तापमथ सा विपुलं ततान ॥ १२ ॥
हारादिभूषणविधिः सरसैर्मृणालैः
पत्रैर्नितान्तपृथुभिर्व्यजनोपयोगः
पद्मैश्च तल्परचना विरहातुराया-
स्तत्पद्मिनीविधिरहो विरहैकशेषः ॥ १३ ॥
कस्याश्चिदान्तरघनज्वरशान्तिहेतो-
रालीजनेन विहिते शिशिरोपचारे ।
रेजे कुचोपचितचन्दनपङ्कलग्ना
मुक्तावली बिसलतेव मुखाम्बुजस्य ॥ १४ ॥

सख्यार्पितेन कुचयोर्नवचन्दनेन
भूरिज्वरा विरहिणी कुपिता क्षणेन ।
तस्यास्तदेव घनसंनहना विलेप्तुं
काचित्कृपामृदुमना न तथा चकार ॥ १५ ॥

कस्याश्चिदीशविरहानलतापशान्त्यै
वाञ्छां विभोर्बहुमते भसिते वहन्त्या ।
भस्मात्मना परिणतः क्वथिताङ्गसङ्गा-
त्सख्या कृतः सरसचन्दनलेप एव ॥ १६ ॥

कह्लारसारघनसारहिमादि वस्तु
यत्पठ्यते हृदयतापहरं विदग्धैः ।
तद्व्यर्थमेव समभूत्कुचयोः परस्याः
किं चौषधं गिरिशशब्दितमेव शिष्टम् ॥ १७ ॥

जित्वा सरोजनिलयामलयागृहीतां
सौर्यं तपः कमलिनीनियतं परस्याः ।
पद्मैरकारि शयनं व्यजनं विशालैः
पत्रैर्मृणालरचितानि विभूषणानि ॥ १८ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये शिशिरोपचारपद्धतिरष्टाविंशी ।

एकोनत्रिंशी पद्धतिः ।

नारीजनो हरवियोगमहोष्मशान्त्यै
शीतक्रियां प्रियसखीषु वितन्वतीषु ।
निःशृङ्खलद्विगुणवर्धिततीव्रताप-
स्तत्कृत्यदूषणपरामिति वाचमूचे ॥ १ ॥

शीतक्रियां फलवतीं यदि कर्तुमास्था
सख्या मदीयमुखतः शृणुताभ्युपायम् ।
आनीय शंकरमिहाद्य मदीयपार्श्वे
कार्यास्ततो नु विविधाः शिशिरोपचाराः ॥ २ ॥
सत्यं त्वया प्रकटितो मयि भावबन्धः
शीतक्रियासु विरमाद्य वृथाप्रवृत्तेः ।
शक्यः कथं शमयितुं सखि निर्विकल्प-
कल्पावसानदहनश्चुलुकोदकेन ॥ ३ ॥
निर्भागधेय हरिचन्दनसौरभेण
सान्द्रेण किं तव दिगन्तविजृम्भितेन ।
बद्धादरः परुषभस्मविलोच(लेप)नेऽपि
यत्तत्पराङ्मुखमना जगदेकनाथः ॥ ४ ॥
किं चन्दनेन किमु पल्लवसंस्तरेण
किं मु(मौ)क्तिकैर्बिसगुणैरथ भूषणैर्वा ।
मूढे सखि प्रियसमागम एव यद्वा
मारज्वरस्य मरणं शिशिरोपचारः ॥ ५ ॥
प्रारभ्यते प्रतिविधिः सखि यो भवत्या
मूर्च्छासु मे हरसमानयनं विनान्यः ।
काराग्रहाज्झटिति निर्गमतो जनस्य
द्वारोपरोधविधिना स शठेन तुल्यः ॥ ६ ॥
आदित्यतापसदृशं विरहोष्मतापं
बुद्ध्वैव या प्रयतते शिशिरोपचारे ।
सा त्वं पयोधिसलिलैर्वडवामुखाग्नेः
शान्तिं करोष्यपरवह्निसमभ्रमेण ॥ ७ ॥

साम्यं प्रतीत्य सखि सांप्रतमन्यरोगै-
स्तस्येदृशः प्रतिविधानमनोरथस्ते ।
सोऽयं पुनः स्मरगतो विपरीतवृत्ति-
र्यस्यैक एव जनकश्च निवारकश्च ॥ ८ ॥

क्रीडाशुकं सखि कलानि वचांस्यजस्रं
जल्पन्तमेनमपसारय शीघ्रमेव ।
अस्याश्वशिक्षणगिरं मुहुरुद्गिरन्त्या
कार्यस्त्वयापि मम संनिधितोऽपसारः ॥ ९ ॥

निर्वापणं सरसवस्तुभिरेव कर्तुं
मूढे किमस्य सखि वाञ्छसि चन्दनाद्यैः ।
किं त्वं न वेत्सि सरसेषु मनोभवाग्नि-
र्वृद्धिं प्रयाति सुतरामिति लोकवादम् ॥ १० ॥

और्वानलं जलनिधेर्नहि यानि शेकु-
र्हर्तुं दवाग्निमथवा न वनद्रुमाणाम् ।
तैर्मौक्तिकैः किसलयैरपि तैरिदानीं
शक्यः कथं शमयितुं सखि मन्मथाग्निः ॥ ११ ॥

ये शीतलप्रकृतयो भुवने पदार्था-
स्तेऽप्यद्य हन्त मयि तापकरा हिमाद्याः ।
यः सर्वसर्गनिकरे निपुणः स वेधाः
कर्तुं क्षमो न किमयं गुणवैपरीत्यम् ॥ १२ ॥

शय्यां करोषि मम तापनिवृत्तये चे-
दादित्यमैत्र्यजनितौष्ण्यगुणैः सरोजैः ।

सख्यावयोर्हृदयजीवितयोरभेदा-
न्मारज्वरो मयि घनस्त्वयि हन्त मोहः ॥ १३ ॥
यं पन्नगा निजविषोष्मनितान्ततप्ताः
श्रीखण्डपादपमिवानिशमाश्रयन्ते ।
अन्तर्ज्वरं शमय मे सखि तस्य शंभोः
काराग्रहान्नहि वरः शिशिरोपचारः ॥ १४ ॥
नैवामुना श्रुतिकटुक्कणता शुकेन
नैव त्वयाप्यनुपमव्यवधानयापि ।
नीतौ युवां हितविधायिपदं ययैव
मन्ये मयैव सखि संप्रति मेऽपराद्धम् ॥ १५ ॥
हारस्त्वया सखि कृतो यदि मे मृणालै-
र्वारे न केन यदि वा विदितं मयैव ।
नाथेन वक्षसि धृतो यदतो ममाशु
संतापहार्यपि भवेत्स भुजङ्गहारः ॥ १६ ॥
मत्तेव(त्तोऽव)गच्छ सखि संप्रति शीतविद्यां[1]
विश्लेषिणीमलमलं विफलक्रियाभिः ।
लोके सुखप्रदतया प्रथितानि यानि
तैर्वस्तुभिर्विरह एव परं भिषज्या ॥ १७ ॥
प्रारम्भतोऽपि पुरतः परपीडनानां
यान्त्या पदं स्वयमकारणरूढवैराः ।
यन्मां वियोगविधुरां परितप्तुकामो
निष्पीड्यते मलयजो भवतीभिरद्य ॥ १८ ॥

---

१. 'शीतविधानविद्यां' इत्यादर्शे पाठः.

धन्यैव सा जनकभूर्विरहे परीता
या राक्षसीभिरनिशं न वृता सखीभिः ।
तस्या अपि प्रियसखीजनसंगमश्चे-
च्छीतक्रियामहमिवानुभवेदसह्याम् ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये सख्युपालम्भपद्धतिरेकोनत्रिंशी ।

त्रिंशी पद्धतिः ।

तापं सरोरुहदृशामचिकित्सनीयं
विज्ञाय शीतलविधाभिरपि क्षणेन ।
अन्तर्दधे करुणया किल तिग्मभानु-
स्तासां पुनश्चरितमद्य वयं वदामः ॥ १ ॥

तिग्मद्युतावपरदिक्प्रणयप्रवृत्ते
दुःखं विभाव्य रजनीमुखभावि तीव्रम् ।
कस्याश्चिदश्रुमलिनं विरहातुरायाः
पूर्वं मुखं तदनु पूर्वदिशस्तमोभिः ॥ २ ॥

जालान्तरेण पवनः प्रविशन्कयापि
रुद्धो मुहुर्दृढकवाटसमर्पणेन ।
लुप्ते यथात्मनि तथा विशति स्वगेहे
मन्दानिलेन विरहिण्यकरोदवज्ञाम् ॥ ३ ॥

कस्याश्चिदस्तमयलम्बितपाटलिम्ना
पूष्णा सहैव पतता दिशि पश्चिमायाम् ।
सख्या वियोगपरिहारनिरुद्यमायाः
कोपात्पपात शनकैररुणः कटाक्षः ॥ ४ ॥

मीर्तिं यथैव विदधे कुमुदैर्हंसद्भि-
रासूचितादयतटान्तरितस्वरूपः ।
वामभ्रुवो विरहविज्वरिताशयायाः
प्रादुर्भवन्नपि पुनर्न तथा हिमांशुः ॥ ५ ॥
आलम्बते दिनमणिः सखि पश्चिमायां
सद्यः कयापि वि(प्यभि)हिता हरमानयेति ।
काचित्सरःसरसिजं मुकुलायमान-
मालोक्य पाणिकमलं मुकुलीचकार ॥ ६ ॥
यः पावकप्रणयिभिर्दिवसे पृथिव्या-
माधायि चण्डमहसः किरणैरनेकैः ।
सर्वोऽपि हन्त निशि मन्मथपीडितायाः
कस्याश्चिदाशु हृदयं स विवेश तापः ॥ ७ ॥
या तुङ्गसौधवलभीशयिता वियुक्ता
या तत्समीपगतमङ्गलदीपिका च ।
सख्यः प्रमादमभिशङ्क्य तयोर्वितेनु-
र्जालप्रविष्टपवनात्सममेव रक्षाम् ॥ ८ ॥
काचित्सहायरहितां निशि चक्रवाकीं
दृष्ट्वा सतीष्वपि सखीष्वनुरागिणीषु ।
तस्यै शनैरकथयन्निजकामपीडां
नूनं दशासदृशता प्रणयस्य हेतुः ॥ ९ ॥
आ × × कार्यकरणो निखिलोऽपि लोको
यद्गूहते झटिति निह्नुतदिग्विभागम् ।
भीमं तमस्तदपि कापि ननन्द तस्मा-
द्यस्मात्त्रिलोचनगलस्मृतिमाततान ॥ १० ॥

काचिद्विलोक्य कमलानि निमीलितानि
विश्लेषिणी विकसितानि च कैरवाणि ।
शोकः सतां परविपद्यसतां च हर्षो
धात्रैव सृष्ट इति कापि विनिश्चिकाय ॥ ११ ॥

गौरीपतेरभिसृर्तिं सुदृशा कयापि
कर्तुं प्रसाधनमशङ्कितमाचरन्त्या ।
नाबन्धि रत्नरशना विपुले नितम्बे
वाचालता गुणवतामतिदूषणाय ॥ १२ ॥

संध्यानभश्चरमसीमनि कापि पांसुं
संसर्पिणी विरहिणी सहसा निरीक्ष्य ।
मेने जगत्त्रितयनिर्जयवैजयन्तीं
कामस्य रत्नपटिकां भवविह्वलैव ॥ १३ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये प्रदोषचरितपद्धतिस्त्रिंशी ।

एकत्रिंशी पद्धतिः ।

प्राप्तः प्रदोष इति वीक्ष्य निरर्गलेन
पुष्पायुधेन भृशपीडितमानसानाम् ।
वामभ्रुवां विरहतापविजृम्भितानि
वाक्यानि वक्तुमभिवाञ्छति चेतना मे ॥ १ ॥

कृत्वा स्ववेणुजनितं स्वयमेव गीतं
विध्यन्ति मुग्धहरिणान्विजने पुलिन्दाः ।
आश्चर्यमुच्चलति गोपतिवंशगीतं
कामस्तु विध्यति वियोगिजनं पृषत्कैः ॥ २ ॥

तुभ्यं नमो भवतु वासरलोपसंध्ये
नान्तःश्लथामनुकरोषि जटां शिवस्य ।
आशास्महे वयममी तत एव हेतो-
र्मा भूत्कदापि शशिनः शकलेन हीना ॥ ३ ॥

नेयं निशा हतनिशाचरयोषिदेषा
हन्तुं वियोगविधुरं जनमाजगाम ।
अस्या मुखे सपदि यः प्रथते प्रकामं
रागः स कोपजनितो न तु सांध्यरागः ॥ ४ ॥

संधुक्षयत्यविरतं हृदयं मदीय-
मन्तः प्रविश्य मदनाग्निरसौ समीरः ।
अस्मिन्नमुष्य विषमास्त्रविमुक्तबाणै-
रापाद्यमानविवरे सुकरः प्रवेशः ॥ ५ ॥

यः पश्चिमे क्षणमदर्शि नभःप्रदेशे
रागः क यात इति संप्रति मे व(वि)शङ्का ।
सत्यं हरेण विरहे हरिणेक्षणानां
चित्तेषु पुष्पधनुषा कृतसंविभागः ॥ ६ ॥

आसन्नचन्द्ररमणप्रणयावि(व)लिप्ता
कामव्यथां मनसि कैरविणी करोतु ।
अम्भोजिनि त्वमपि संप्रति वल्लभेन
विश्लेषिणी मयि कथं रुजमादधासि ॥ ७ ॥

दग्धुं जगत्रयमयं विकलोऽपि वह्नि-
रुज्जृम्भते वियति सांध्यमहश्छलेन ।
इत्थं न चेत्किमिति संप्रति वारि विप्राः
सश्रद्धमञ्जलिभिरूर्ध्वममी क्षिपन्ति ॥ ८ ॥

यस्य प्रयाणसमये प्रकटानुरागः
सोऽवश्यमेष्यति पुनः सवितेति सुप्तिम् ।
अम्भोजिनी व्रजति सुप्तिकथा कथं स्या-
न्निःसङ्ग एव गिरिशे मम भक्तिमत्याः ॥ ९ ॥
साध्वेष वासरपतिर्दिशि पश्चिमायां
तेजःक्षयद्युतिवशेन बभूव रक्तः ।
हा हन्त पातयति सा तमियं वराङ्गी
कस्यापदे जगति नान्यतरानुरागः ॥ १० ॥
मन्येऽहमित्थमुदयारुणचन्द्रनाम-
स्वीकारिणः प्रलयकालहुताशनस्य ।
धूमोऽयमग्रजनितस्तिमिरच्छलेन
विश्लेषिसार्थनयनाश्रुनिपातहेतुः ॥ ११ ॥
एकस्य रात्रिमुखवेषविषद्रुमस्य
संजातसाध्यकिरणारुणपल्लवस्य ।
आगामिपूर्णशशिबिम्बमहाफलस्य
तारागणं विगणयामि नवप्रसूनम् ॥ १२ ॥
अत्युच्छ्रितादनिल ते मलयात्प्रसूति-
र्नित्यं यतः परिचयं सुमनोभिरेव ।
दाक्षिण्यवानिति जगद्विदितोऽसि तस्मा-
न्मा जातु जारसरणिं व्रज नीचसेव्याम् ॥ १३ ॥
पूर्णेन्दुरत्र मरुदत्र हिमाम्बुगर्भो
गन्धोऽयमत्र मुकुलस्य विजृम्भमाणः ।
नाम प्रदोष इति दोषसमग्रभावा-
त्स्रष्टा यथार्थमकरोद्रजनीमुखस्य ॥ १४ ॥

धन्या हि सा भगवती दिवसान्तसंध्या
यामागतां भुवि सुवीक्ष्य पिनाकपाणिः ।
विश्लिष्टबन्धनजटाभरणः स हर्षा-
गौर्याः समक्षमपि नृत्यति वीतशङ्कः ॥ १५ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये प्रदोषोक्तपद्धतिरेकत्रिंशी ।

द्वात्रिंशी पद्धतिः ।

कंदर्पशासनविलङ्घिजनेषु रूढ-
रोषादिवेन्दुमुदयस्थमवेक्ष्य ताम्रम् ।
जज्ञे हरेण विरहे वनिताजनस्य
यच्चेष्टितं तदधुना कथनीयमास्ते ॥ १ ॥

उष्णायमानमुदयारुणमिन्दुबिम्बं
काचिद्रवेर्विरहिणी न शशाक भेत्तुम् ।
तस्या विवेकमतिदायितया तदानीं
तस्योपयोगमहितं शशलाञ्छनत्वम् ॥ २ ॥

अन्या विहाय मदनातुरजीविताशां
जातस्पृहा मरणशब्दितमङ्गलाय ।
लब्धः शिवो भवतु मे परजन्मनीति
चन्द्रातपे विरहिणी सहसा पपात ॥ ३ ॥

आलोक्य काचिदुदयारुणमिन्दुबिम्बं
विश्लेषिणामविषह्यं शिशिरं परेषाम् ।
द्रोही न वा खलु ममेति जनं बिभत्सोः
कामास्य तस्य परशुं गणयांचकार ॥ ४ ॥

ज्ञातो जनैर्विरहतापजुषः परस्य
नेत्रद्वयस्य नलिनस्य च जातिभेदः ।
पद्मेषु चन्द्रकिरणैर्मुकुलीकृतेषु
यज्जागरूकमभवन्निशि नेत्रयुग्मम् ॥ ५ ॥

चूडामणिः पशुपतेरिति जृम्भितास्था
तापावहो विरहिणामिति जातभीतिः ।
चन्द्रस्य काचिदुदये विधुरा निजाक्ष्णो-
रुन्मीलनेऽपि न शशाक निमीलनेऽपि ॥ ६ ॥

भिक्षाटनं पशुपतिः कृतवानिहेति
यां हातुमह्नि गलितेऽपि हि न क्षमाभूत् ।
तां वीथिकां शशिमयूखभयाद्विहाय
छायेव कापि शनकैर्वसतिं विवेश ॥ ७ ॥

कस्याश्चिदीशविरहव्यथिताशयायाः
कामं वदन्तु मुखमेव हि चन्द्रकान्तम् ।
तस्या दृशोर्युगलमप्युदये हिमांशो-
र्निर्दिश्यमानबहलोदकमिन्दुकान्तम् ॥ ८ ॥

यावान्दिनेशपतने विरहातुराया-
स्तावान्हिमत्विषि मनागुदितेऽपि तापः ।
पातो यथा परहिताय तथार्तिभाजां
खेदाय नूनमुदयो मलिनाशयस्य ॥ ९ ॥

स्पृष्टं मनाग्विरहिणी स्तनमिन्दुपादैः
काचिद्ददौ प्रियसखीमुखमारुताय ।
प्रारब्धमन्यदपरं फलितं क्षणेन
जज्वाल हन्त हृदये मदनाग्निरस्याः ॥ १० ॥

एका शशाङ्ककिरणोपनिपातभीत्या
वातायनान्तरपिधानकृतप्रयत्ना।
आमीलनव्यपहृतेन्दुकरप्रयत्ना-
ल्लक्ष्म्याः सरोजवसतिं मनसा ननन्द ॥ ११ ॥
स्पष्टं मुहुर्भवनजालकृतप्रवेशै-
रिन्दुः करैर्विरहिणीं व्यथयांचकार।
स्प्रष्टुं जडप्रकृतिरिच्छति कामिनीना-
मङ्गं मनःस्थितिमनाकलयन्करेण ॥ १२ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये चन्द्रोदयपद्धतिर्द्वात्रिंशी।

त्रयस्त्रिंशी पद्धतिः।

चन्द्रोदये विरहविह्वलमानसानां
या निर्गता भणितयो वदनाद्वधूनाम्।
माधुर्ययोगपुनरुक्तसुधान्वितानां
तासामिहास्मि कथनेन विदग्धमान्यः ॥ १ ॥
किं कृत्यमद्य सखि पश्य जगत्समस्तं
व्याप्नोति सान्द्रमपहृत्य निशान्धकारम्।
त्रैलोक्यसंहरणकर्मणि कामशत्रोः
कोपाट्टहास इव कोऽपि शशिप्रकाशः ॥ २ ॥
एतस्य चन्द्रहतकस्य कठोरभावं
सख्यस्तदेव गमयेति विकल्पमेव।
अम्भोनिधेरखिलरक्षणजागरूको
जग्राह यत्पशुपतिर्गरलेन साकम् ॥ ३ ॥

अन्येषु जन्तुषु सुधासहजत्वमिन्दो
व्यक्तीकरोषि किरणैरतिशीतपातैः ।
अस्मादृशेषु तु पुनर्विधिवञ्चितेषु
तैर्दुःसहैर्गरलसोदरभावमेव ॥ ४ ॥

वेधाः सुखी भवतु सांप्रतमात्मशिष्टं
कृत्वा जगत्त्रितयमिन्दुमयानलेन ।
सद्योनिमीलितजनार्दननाभिपद्मे
गूढं स्थितस्य न हितस्य शशाङ्कभीतिः ॥ ५ ॥

किं राहुणा कवलितः किमु चन्द्रमौलेः
सर्वात्मना मुकुटभावमलंकरोति ।
निर्मूल एव किमु शीकरतः प्रलीनो
यत्तस्य राज्यमयमुष्णकरः करोति ॥ ६ ॥

पूर्तिं विहाय निहतद्युतिमद्य शोच्यं
कार्श्यं तदेव कुमुदैकपते भजस्व ।
यस्मिंस्त्वया निखिलवन्दनहेतुभूतं
प्राप्तं पुरार्दन[1]कपर्दशिखामणित्वम् ॥ ७ ॥

अङ्गारगर्भकरमिन्दुमिमं पिधाय
यादृच्छिकानुगमने····कुरु मेघ रक्षाम् ।
कालप्रतीक्षणपरो भुवनोपकारे
जीमूतजातिरिति मास्तु तवापवादः ॥ ८ ॥

अन्तःकलङ्कमुदयाहितशोणभाव-
मालोचयामि सखि संप्रति चन्द्रबिम्बम् ।

---

1. पुरार्दनः पुरारिः शिवः.

अङ्गारचक्रमुपशान्तकरालमन्तः
कामस्य दु(द)ग्धवपुषस्त्रिपुरान्तकेन ॥ ९ ॥
किं क्षेममद्य सखि नः कथयाम्बुराशेः
से(सो)यं कलाभिरखिलाभिरुदेति चन्द्रः ।
शैलात्मजावपुरभेदफलां स्वराज्ञा-
मेकैव वर्तयति यस्य कला हरेऽपि ॥ १० ॥
शाणोपलं मकरकेतनसायकानां
पूर्णेन्दुबिम्बमिदमालि वितर्कयामि ।
नो चेत्तथा कथमिदं निशितत्वमेषा-
मस्मिन्नुदञ्चति कथं च पुनः क्षयोऽस्य ॥ ११ ॥
इन्दुच्छलेन जलधेः प्रलयानलोऽय-
मुज्जृम्भते सखि वियोगिजनक्षयाय ।
मूर्ध्ना बिभर्ति सरितं परमेश्वरोऽपि
कालेयचन्द्रितकलापरितापभीतः ॥ १२ ॥
अद्यादिमं यदि स संप्रति राहुरिन्दुं
दिष्ट्या भवेद्विरहिणामपि जीवलाभः ।
भुञ्ज्यात्सदैव यदि भूरिफलं परेषां
मन्ये कदाचिदपि हन्त खलो न भुङ्क्ते ॥ १३ ॥
पात्रं करालगरगर्भितमेव सत्यं
नैवेन्दुबिम्बमिदमालि यतश्चिराय ।
उत्कण्ठते मम मनः शिवकण्ठमेव
यः कालकूटगरलादखिलं ररक्ष ॥ १४ ॥
हृद्यानि मीलयसि हन्त सरोरुहाणि
हा चन्द्र जृम्भयसि संप्रति कैरवाणि ।

युक्तं तवैतदुभयं मलिनाशयस्य
　भव्यावधीरणमभव्यसभाजनं च ॥ १५ ॥
आलोकितं रमणभूषणमङ्गनानां
　तापं वियोगसमये हरतीति वादः ।
चूडामणिः पशुपतेरयमिन्दुराधिं
　हा हन्त वर्धयति मे विधिना शठेन ॥ १६ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये चन्द्रोदयपद्धतिस्त्रयस्त्रिंशी ।

चतुस्त्रिंशी पद्धतिः ।

अव्याजदुस्तरनिशीथपयोधिमध्ये
　वैरायमाणविधिनैवनिपातितानाम् ।
एणीदृशां हरमहाप्लवकाङ्क्षिणीनां
　दौत्यत्वयानि(?) चरितानि जनः शृणोतु ॥ १ ॥
कामातुरो नहि निरूपयति स्वदैन्यं
　काचित्समस्तवनिताजनपूजनीया ।
दूत्या मुहुः सकृदपि त्रिपुरान्तकस्य
　कण्ठग्रहाय चरणग्रहणं चकार ॥ २ ॥
यः पाण्डुरःस्वयमथाब्धिविषं निपीय
　नैल्यं बिभर्ति भुवनत्रयरक्षणाय ।
दौत्यं तथाविधतथा(या)र्हसि शंकरस्य
　तस्येव कापि नवमम्बुधरं ययाचे ॥ ३ ॥
कल्याणबान्धवपरो जगतीह मातु-
　रन्यो जनोऽयमिति जीवसखीरुपेक्ष्य ।

काचित्स्वमातरमयाचत शंभुदौत्यं
किं नैव कारयति कामभवो विकारः ॥ ४ ॥
सामोक्तिभिः प्रियसखीमनुचर्य काचि-
द्दौत्याय वाच्यमनया परिपृच्छ्यमाना ।
तूष्णीमजातनिजसंगमने वृषाङ्के
वक्तव्यहानिपरिदूयमना बभूव ॥ ५ ॥
यामेव जीवितसखीं परिरभ्य गाढ-
मीशोपकण्ठगमने त्वरयांचकार ।
तां प्रस्थितां सपदि वीक्ष्य रुरोध काचि-
दीशान्तिकान्यवनितागमनासहिष्णुः ॥ ६ ॥
संदेशगर्भितपुटे स्मरलेखपत्रे
विन्यस्तसान्द्रनवचन्दनपङ्कमृत्के ।
शंभोर्भविष्यति करःप्रणयीति काचि-
न्मुद्रां व्यधाद्विरहिणी कुचचूचुकेन ॥ ७ ॥
मा गास्त्वमद्य हरसंनिधिमस्मदर्थे
प्राणाधिका यदसि मे तदिहासितव्यम् ।
प्राणाः प्रयान्तु सुखमद्य ममेति काचि-
त्स्नेहोक्तिभिः प्रियसखीं त्वरयांचकार ॥ ८ ॥
न प्रेषिता प्रियसखी गिरिशस्य पार्श्वे
सा स्त्रीति शङ्कितधिया सुदृशा कयापि ।
मत्वा नपुंसकमिति प्रहितं मनोऽभू-
त्तच्चापि तत्र रमते किमियं विधत्ताम् ॥ ९ ॥
कृत्वाधरं रचितचिह्नमलक्तकेन
तस्याः कुचाग्रमपि कुङ्कुमकर्दमेन ।

काचिद्गभीरहृदया हरसंनिधानं
गन्तुं पुनः प्रियसखीं वनिता न्ययुङ्क्त ॥ १० ॥
योऽपीदृशं वितनुते परकीयमिष्टं
तादृक्फलं स फल(लभ)ते पुनरित्यभिज्ञाम् ।
मामद्य योजय हरेण विधाय दौत्य-
मित्याजगाद विधुरा निशि चक्रवाकीम् ॥ ११ ॥
रागः शठो नियतमन्यतरानुरागः
स्वस्थः स एव पुरुषस्य निरङ्कुशस्य ।
मानग्रहो हि मरणाय वधूजनस्य
व्याचक्ष्व नाथमिति कापि जगाद दूतीम् ॥ १२ ॥
वार्ताहरीमनधिगम्य रहः शुचान्या
तापोऽर्जिते स्तनतटेऽश्रुजलं मुमोच ।
तस्मै हृदि स्थितिमते स्थितिमेतदीयां
वक्तुं प्रविष्टमिव तन्नहि तत्र दृष्टम् ॥ १३ ॥
संदेशमीशविषयं स्वयमेव काचि-
द्यस्मिन्विलेखितुमुपाक्रमताश्चिताक्षी ।
पत्रं तदाशु धृतकज्जलबाष्पपातैः
प्रागक्षरार्पणविधेर्मलिनीचकार ॥ १४ ॥
किं किं परिभ्रमसि संप्रति कुन्तले मे
पुष्पोज्झितेऽपि मधुपार्थितया तथैव ।
आनीय शङ्करमिह द्रुतमाप्तकामो
भूया इति भ्रमरमाह शुचेव काचित् ॥ १५ ॥
दीर्घं मयैव कलजल्पितशिक्षणं ते
तद्दक्षिणावितरणस्य स एष कालः ।

कालान्तकाय कथया मम कामपीडा-
मित्यन्तरङ्गमपरा शुकमाबभाषे ॥ १६ ॥
कर्णावतंसकुसुमाश्रयणापदेशा-
त्तस्यैव कण्ठविवरं प्रतिपद्य सद्यः ।
वार्ताहरो भव हराय ममेति काचि-
दात्मालकान्तिकचरं भ्रमरं बभाषे ॥ १७ ॥
विश्लेषदुःखशमनाय सरोरुहिण्याः
संध्या प्रयान्तमनुगम्य कठोरभासम् ।
अध्यास्ततेन न विनेति कथाप्रसङ्गा-
त्सख्युः पुरो विरहिणीं वचनं जगाद ॥ १८ ॥
आहूय दौत्यगमनाभिमुखीं वयस्यां
संदेशमीशविषये बहु वक्तुकामा ।
तत्पार्श्वमेष्यसि यदीत्यसमापितोक्ति-
र्बाष्पैरवोचदपरा कथनीयशेषम् ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये दूतीप्रेषणपद्धतिश्चतुर्स्त्रिंशी ।

पञ्चत्रिंशी पद्धतिः ।

अस्मादृशामसुलभस्य विभोरशक्ये
दौत्ये पदे युवतिभिर्विनियोजितानाम् ।
तं व्यापिनं गगन एव विधाय लक्ष्यं
दौत्योचितानि वचनान्यभवन्सखीनाम् ॥ १ ॥
कालान्तकोऽयमिति विश्वजनप्रसिद्धिं
सत्यां विधातुमथ चेद्गिरिशाभिलाषः ।

योो बाधते त्वयि दृढप्रणयां सखीं मे
　　कालं तमद्य झटिति क्षपय क्षपाख्यम् ॥ २ ॥
सख्यां वसन्तसखबाणगणार्दितायां
　　तां किंचिदत्र करुणां कुरु चन्द्रमौले ।
मा वा न नः क्षतिरतो मरणं वरिष्ठं
　　जीवस्थितेस्त्वदनुरागनिमित्तमस्याः ॥ ३ ॥
किं विस्तरेण शृणु शंकर संग्रहोक्तिं
　　वक्तव्यवस्तुनि मया सति पृच्छ्यमाने ।
नैवाक्षरैः सपदि कण्ठगतैर्मृगाक्ष्याः
　　प्राणैरभाणि भवितव्यमशेषमेव ॥ ४ ॥
गौरीसखस्य तव मा भवतु प्रसक्ति(क्ति):
　　कल्याणकाममितरासु मृगेक्षणासु ।
कण्ठे चिरं रुचिमती गरनीलमूले
　　भूयात्सदैव करुणाधिकवल्लभासु ॥ ५ ॥
शंभो तदा त्वदवलोकनपुण्यकाले
　　याभ्यामभून्निपतितः प्रथमाश्रुपूरः ।
शोकाश्रुणा परिभवोऽपि किमायताक्ष्या-
　　स्तस्यास्तयोर्नयनयोरनुरूप एव ॥ ६ ॥
सर्वज्ञता निरुपधिश्च कृपापि सिद्धे-
　　रव्याहतत्वमिति नाथ गुणास्त्रयस्ते ।
तत्र त्रये नियतमन्यतमस्य लोप-
　　स्तस्या न चेदिह विधास्यसि जीवरक्षाम् ॥ ७ ॥
पाण्डुत्वमावहति भस्मकृतिं विनाङ्गे
　　धूमं विना च नयनाश्रुनिपातहेतुः ।

शंभो विना ज्वलति चेन्धनमद्भुतं त-
त्तस्यास्त्वदीयविरहप्रचितो हुताशः ॥ ८ ॥
याचे भवन्तमिदमद्य जटाकलापे
पूर्णं निधेहि शशिनं विकलं विहाय ।
दैन्यं च ते विकलचन्द्रपरिग्रहोत्थं
तस्याश्च मा भवतु दुर्विषहोऽद्य तापः ॥ ९ ॥
यत्तादृशं मयि तथा प्रणिपातदैन्यं
सख्या गिरीश न हितेऽत्र निदानमेतत् ।
सद्यस्त्वदानयननैपुणरूढयैव
यन्निद्रया निशि विभो प्रणयव्यपायः ॥ १० ॥
त्वां याचते मम सखी निशि मन्निकेत-
मागम्यतामिति पुरार्दन मन्मुखेन ।
नातः परं मृगदृशामभिमानभङ्गो
लभ्येत चेदभिमतं ननु सोऽपि सह्यः ॥ ११ ॥
मध्यस्थितिं तव मनोभवपीडितायां
याचे न पक्षपतनं चिरजीवसख्याम् ।
एतावतैव हि भविष्यति काम्यसिद्धि-
र्माध्यस्थ्यमातुरजनेष्वपि पक्षपातः ॥ १२ ॥
आश्लेषणं तव सुदुर्लभमस्तु शंभो
सख्याः प्रयच्छ ललितं तव बाहुमूलम् ।
तस्या गले विनिहिता(?)मसवः प्रयाणे
प्रारम्भिणी(?) पुनरिमां न विलङ्घयेयुः ॥ १३ ॥
गौरीभुजार्पणमहावलयाहिधन्ये
कण्ठे न तेऽन्यवनिताजनसङ्गमोर्हः ।

तत्र स्वमाहितमवेक्ष्य भुजंगमेनं
　तस्या भुजोऽपि घटतामिति नाथ याचे ॥ १४ ॥
कुर्वन्तु तावदपरे विभवः परेषां
　याच्ञाविभञ्जनमिदं तव नैव युक्तम् ।
शंभो यतस्त्वमपि वेत्सि विधाय भिक्षां
　नित्यं सुदुर्विषहयाचनभङ्गपीडाम् ॥ १५ ॥
त्वत्संश्रितापि भवतैवमुपेक्षिता चे-
　त्सा नः सखी वरद हन्त तवैव हानिः ।
यन्नीलिमा तव गले सहसैव जह्यात्
　कारुण्यहेमनिकषोपलशैललक्ष्मीम् ॥ १६ ॥
सा पद्मचारुनयना विषमेक्षणस्त्वं
　सा कुञ्चितालकभरा हर धूर्जटिस्त्वम् ।
सा सद्गुणैकवसतिर्गुणवर्जितस्त्वं
　तस्यास्तथापि किमिदं शिव दुर्लभोऽसि ॥ १७ ॥
या वीक्ष्य नाथ गरलं तव कण्ठमूले
　या पन्नगेन्दु(न्द्र)मपि तत्र पुरा निनिन्द ।
जातस्पृहैव भगवन्भवतीयमात्रे(र्ता)
　पापादियं न सहते विरहं त्वदीयम् ॥ १८ ॥
कामं वृथा भवतु मे त्वयि कामदौत्यं
　प्रष्टव्यमेतदभिधेहि पिनाकपाणे ।
तस्यास्तथा स्मरशरैर्विहितप्रहारे
　चित्ते वसन्नपि कथं त्वमकामविद्धः ॥ १९ ॥

गङ्गापयः सकलमेव कपर्दकोणे
सद्यो विलीनमिति नाथ कियान्मदस्ते ।
सामर्थ्यमस्ति यदि ते नयनाम्बुपूरः
सख्यास्त्वदीयविरहप्रचितो निवार्यः ॥ २० ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये दूतीवचनपद्धतिः पञ्चत्रिंशी ।

षट्त्रिंशी पद्धतिः ।

विश्लेषिता युवतयो विरहे त्रियामां
निन्युः सुदुःसहवियोगनितान्तदीर्घाम् ।
तेषां विचक्षणवचोभ्युपवर्णनेन
वाणीमिमां वयममी चरितार्थयामः ॥ १ ॥

कस्याश्चिदिन्दुमलयानिलचक्रवाक-
केङ्कारसंतमसकैरवसौरभाद्यैः ।
विश्लेषवंशमथनैर्निचिते निशीथे
मूर्च्छाप्रसादकृत एव हि जीवलाभः ॥ २ ॥

प्रत्यग्रपुष्परचिते शयने न शिश्ये
नासिष्ट कुत्र च न चैव सखीं बभाषे ।
नापि क्वचित्स्थितिमती न ययौ न विघ्नः
किं किं विधाय विधुरा रजनीमनैषीत् ॥ ३ ॥

चन्द्र क्षयं भव मुहुर्भुजगामिषं स्याः
भूयाः कलङ्कनिलयो जलतां भजस्व ।
कस्याश्चिदित्यपुनरुक्तमुदीरिताभिः
शापोक्तिभिः सह निशा विरतिं प्रपेदे ॥ ४ ॥

तच्चिन्तनैस्तदनुबन्धिकथाप्रसङ्गै-
स्तत्संगमानुगुणकर्मनिरूपणाभिः ।
तन्नामभाषिशुकसंवहनैश्च काचि-
द्रात्रिं निनाय रहिता परमेश्वरेण ॥ ५ ॥

पर्याप्तशीतकर···मण्डलतालवृन्ता
नीरन्ध्रसंस्तवदृढप्रणया सखीव ।
कस्याश्चिदीशविरहव्यसने प्रवृत्ते
पार्श्वं न जातु विजहौ विपुला त्रियामा ॥ ६ ॥

संतप्तमूर्तिरतिशीतलराजरम्भा
शंभोस्ततार रजनीसरितं वियुक्ता ।
किंतु च्युते दयितपोतदृढोपगूढे
यत्स्यान्न भावि पुनरुत्तरणं वधूनाम् ॥ ७ ॥

याञ्चोक्तिभिश्च गमनाय गतिप्रसक्ता-
माहूय शंकरवशीकृतिशास्तिभिश्च ।
दूतीं प्रकृत्य पुनरेव पुनः कृताभि-
र्याता निशा मृगदृशो न तु सा प्रयाता ॥ ८ ॥

पौष्पैः शरैः प्रहरतो रतिनायकस्य
पुष्पास्त्रविद्धवपुषश्च मृगेक्षणायाः ।
प्रायेण नैव निशि सुप्तिरभूत्तथापि
मूर्छासु सा विरहितापि निमीलिताक्षी ॥ ९ ॥

किं कालरात्रिरथवा किमु कालदूती
किं पापसंहतिरनेकविधप्रवृत्ता ।
किं मर्मकृन्तनकरी शितहेतिरेषे-
त्येका व्यलङ्घयदपोक्तिभिरेव रात्रिम् ॥ १० ॥

चन्द्राभिधानवडवाग्निमदृष्टपारं
कंदर्पकेतुमकरभ्रमणातिभीमम् ।
अच्छिन्नबन्धहरचिन्तनसेतुनैव
काचिद्गभीररजनीजलधिं ततार ॥ ११ ॥
शैत्यार्थिनी कुसुमतल्पमवाप्य पूर्वं
पश्चात्प्रवालशयनं तदपि प्रमुच्य ।
श्रीखण्डपङ्कसरसीमपि शैत्यहेतोः
काचिद्गतागतिनयैश्च निशां निनाय ॥ १२ ॥
वापीमवाप नवचन्दनपङ्कलिप्ता
प्रत्यग्रपुष्पशयनात्पुनरेतदस्याः ।
इत्थं द्वयोरपि तयोररतिं वहन्ती
काचिद्गतागतगतेन निशां निनाय ॥ १३ ॥
यस्याः क्षणादपगतिं हरविप्रयुक्ता
यस्याश्च काचन समागममाशशंस ।
न प्रस्थिता च रजनी न समागता वा
निद्रा विधातरि विरोधिनि नेष्टसिद्धिः ॥ १४ ॥
एकक्षणप्रतिस....दिवसाः शिवेन
योगान्निशा च विरहादपि नाम दीर्घा ।
ताभ्यां विवर्जितमहो दिवसक्षपाभ्यां
देशं विचिन्त्य विरहिण्यपरा चचार ॥ १५ ॥
आलम्बितैः प्रियसखीभिरथात्मनापि
पर्यायतः क्षणमशक्तिवशेन मुक्तैः ।
बाला शिलामिव विशालतमां कथंचि-
त्काचिद्गुणैः पुरजितो रजनीं चकार ॥ १६ ॥

शक्येतराय गिरिशाय रुचैर्वचोभि-
दौंत्याय जीवितसखीमपरा न्ययुङ्क्त ।
प्राणव्यये विरहिणी रजनीमशेषां
तस्याश्चिरायितवशेन चिरायते स्म ॥ १७ ॥

[1]गौरीपतेरथ च चौर्यमपेक्ष्य काचि-
द्रात्रिं निनाय निखिलामपि जागरेण ।
लब्धेऽपि रक्तकुमुदिन्यवितन्द्रगङ्गा
जागर्ति तस्करजनो निशि पु[2]ष्कलोऽपि ॥ १८ ॥

काचित्क्षपां क्षपयितुं विपुलां सखीभिः
संप्रस्तुतस्य वृषवाहनकीर्तनस्य ।
आकर्णनेन चरमेतरयोः प्रवृत्तां
संध्यां द्वयोरचलयोर्युगपद्ददर्श ॥ १९ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये रजनीयापनोक्तिपद्धतिः षट्त्रिंशी ।

सप्तत्रिंशी पद्धतिः ।

दीर्घां निशां शमयितुं विरहे हरेण
निद्राप्रसक्तिरहितस्य वधूजनस्य ।
नानाविधानि चरितानि सखीं प्रकृत्य
जातानि यानि कथयाम्यहमद्य तानि ॥ १ ॥

आहूत एव न समीपमुपैति भिक्षां
गृह्णाति नैव मुहु····रर्थयते तथापि ।

---

१. "गौरीपतेरधरचौर्य" "रक्तकुमुदिन्यपि तादृगासीत्" इति पुस्तकान्तरे वर्तते । २. पुष्कलयाम् ।

धत्ते चिरादनुसृतोऽपि न चाभिमुख्यं
भिक्षुर्मृगाक्षि वद कोऽयमदृष्टपूर्वः ॥ २ ॥
भिक्षाप्रदानसमये न मया तदानी-
मालिङ्गितोऽभवदहं पुनरद्य दूये ।
चिन्तामणिं करतलस्थमुपेक्षयोर्व्यां
सद्यो निपात्य मृगये तमितस्ततोऽपि ॥ ३ ॥
भिक्षातिसर्जनमिषादहमिन्दुमौले-
र्वक्षः स्तनेन मम योजयितुं प्रवृत्ता ।
अत्रान्तरे श्वसितमूर्जितमुत्ससर्ज
हारो हरस्य सखि भाग्यविपर्ययेण ॥ ४ ॥
भिक्षां ददातु भवतीत्युदिते शिवेन
तां दातुमोदनमयीं मयि सोद्यमायाम् ।
यत्तस्य गर्भितरतार्थरहःप्रवृत्त-
मन्दस्मितं सखि न मे हृदयादपैति ॥ ५ ॥
गात्रं विकर्शितमभूद्गिरिशानवास्या
वृद्धासमीक्षणमदर्शनतः शिवस्य ।
लब्ध्वा शिवं सततमाहितसंनिधानं
संतप्यते सखि कथं हृदयं मदीयम् ॥ ६ ॥
यद्यागमिष्यति मदीयगृहोपकण्ठं
भिक्षाटनाय गिरिशः समनन्तरेऽपि ।
तस्योपगूहनविधिर्भवितव्य एव
दातुः प्रदानसमये स्ववशो हि भिक्षुः ॥ ७ ॥
ताट्ये कृतश्रममिवास्य पदं गतेन
देहीति दीनपदमप्यनुषक्तरागम् ।

पत्रावलम्ब्यपि करः करणप्रवीणः
　प्रायेण कोऽपि नट एव न भिक्षुरेषः ॥ ८ ॥
इक्षुर्धनुर्मधुकरावलिरेव मौर्वी
　शस्त्राणि पञ्च नवपुष्पमयानि कस्य ।
लोकत्रयं विजयते मदनस्तथापि
　मन्ये जयाय निजधैर्यमतन्त्रमेतत् ॥ ९ ॥
पुष्पायुधो गिरिशनेत्रहुताशनेन
　प्राग्भस्मसात्कृत इति स्म कथा वृथैव ।
आलिङ्गितोनलममुष्य तथोपदिष्टो
　मन्ये वियोगिजनदाहविधिप्रकारः ॥ १० ॥
बद्धा जटा नयनमप्यसमं चितैस्त-
　न्नीतं वपुश्च भसितैरतिधूसरत्वम् ।
एवं य··········नोह···भैक्षचारे
　कान्तीविगूहितमहो विबभूव शंभुः ॥ ११ ॥
तां पार्वतीं मनसिजः परमेश्वरेण
　यो येन योजयितुमक्षमतां प्रपेदे ।
तेनैव मां वशयितुं यतते मुधैव
　कामोऽपि कामुकवदेव विवेकहीनः ॥ १२ ॥
वीथ्यां तथा पुरत एव जनस्य शंभुं
　कण्ठे ग्रहीतुमभवं विहितोद्यमेव ।
लज्जा रुरोध सखि मां सहसा किमन्य-
　स्त्रीत्वेन साप्यभवदेव हि मे सपत्नी ॥ १३ ॥
स्त्रीजातिमात्रहृद्यार्तिकरे वृषाङ्के
　कंदर्पदौत्यमनुतिष्ठति केवकस्याः(?)

क्रीडाशुकः शरणमन्यतमो ममायं
लोके पुनः फलितमात्रवचा न दूतः ॥ १४ ॥
साक्षात्पुरस्थितमपोह्य वृषाङ्कमद्य
चित्रे निवेश्य परिरम्भणमाचरन्ती ।
भित्त्वा विहारसरसीं परिवृद्धपूरां
वाञ्छामि गाहितुमहं मृगतृष्णिकायाम् ॥ १५ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये रजनीयापनोक्तिपद्धतिः सप्तत्रिंशी ।

अष्टात्रिंशी पद्धतिः ।

नीरन्ध्रमुक्तशरपीडितमानसाना-
मेणीदृशामकरुणेन मनोभवेन ।
विश्लेषसुप्तिविषयाणि निशाविरामे
जातानि यानि चरितानि वदामि तानि ॥ १ ॥
निद्रावतीं गिरिजया कृतदेहसंधि-
रप्याजगाम विधुरां स्वयमिन्दुमौलिः ।
अप्यन्ययोषिदुपधानपदे निरुद्धे
पत्न्या ध्रुवं प्रभुजनो भजतेऽन्यनारीम् ॥ २ ॥
वामे विधौ भवति बन्धुजनोऽपि वैरी
सुप्तां कथंचिदपि जीवसखीं निशान्ते ।
मूर्छाभयाद्विरहणीं प्रतिबोधयन्ती
विच्छित्तिमाशु विदधे हरसंगमस्य ॥ ३ ॥
लभ्भं परार्थमपरत्र नयेद्विधाता
सुप्त्यागते विधुरया गिरिशे कयाचित् ।

गाढोपगूहनविधेरसकृत्कृतस्य
पार्श्वोपधानमभवत्सहसैव पात्रम् ॥ ४ ॥
रोमाञ्चितैरवयवैः स्फुरिताधरेण
किंचिद्विवल्गनवता च कुचद्वयेन ।
ज्ञात्वा सखी हरसमागमनं चरन्तीं
निद्रां स्वकीयहरनिर्वहणां ननन्द ॥ ५ ॥
काचित्कथंचन निशाविरतिप्रसुप्त्या
संमीलिताक्षियुगलापि शिवं ददर्श ।
या पुण्डरीकवदना च मृगायताक्षी
तस्या विरुद्धचरितास्पदतापि युक्ता ॥ ६ ॥
साक्षात्कृते पशुपतौ न कदापि शोच्या
जायेत मीलनदशा नियतं नराणाम् ।
यद्दृष्टवद्गिरिशमह्नि तदायताक्ष्या
यत्नं विनैव निशि मीलितमक्षियुग्मम् ॥ ७ ॥
जातप्रबोधजनलभ्यनिजानुभूतिं
सुप्त्यैव काप्यनुबभूव शिवं वियुक्ता ।
स्नेहः शिवे यदि भवेदमितो नराणां
मार्गेण सिध्यति निकर्षवतापि शंभुः ॥ ८ ॥
यत्सुप्तिभङ्गकरणं स्मृतिभिर्निषिद्धं
तन्नैव सर्वविषयं विरहार्तलक्ष्यम् ।
सख्या प्रभातमिति कापि निबोधयन्त्या
हा हन्त भञ्जितशिवानुभवा बभूव ॥ ९ ॥
उद्दिश्य कापि विधुरा गिरिशानुभूतिं
सुप्त्यैव लोचननिमीलनमाचकाङ्क्ष ।

तस्यास्तदेतदुचितं खलु येन सर्वे
पश्यन्ति तं शमधना विनिमीलिताक्षाः ॥ १० ॥
आलिङ्गनं किमथवाधरपानमस्य
मन्दस्मितं किमुत वा स्थितिरेव तूष्णीम् ।
अन्यक्रिया किमपि कापि सखीमपृच्छ-
त्स्वप्नागतेन गिरिशेन रतिं चिकीर्षुः ॥ ११ ॥
सर्वोऽपि चौर्यमपरो वनितासु कुर्व-
न्कामी समीप्सति परस्य जनस्य सुप्तिम् ।
आश्चर्यमेतदचलेन्द्रसुताभयेन
यत्सुप्तयैव विदधे रसचौर्यमेव ॥ १२ ॥
योगप्रबुद्धहरिनाभिसरोजसृष्टौ
संभाव्यते न खलु मे गिरिजापरेण ।
सृष्ट्यन्तरं कुरु तदागमनप्रधानं
सुप्त्येति कापि नयनाम्बुरुहं ययाचे ॥ १३ ॥
वामभ्रुवां हरसमानयनाय निद्रा
नाभ्यर्थिता तदपि सैव तमानिनीया ।
अभ्यर्थितापि विदधे न सखीति दृष्टं
किं कस्य केन फलमित्यतितर्क्यमेव ॥ १४ ॥
पार्श्वे तवेन्दुमुखि शंकरमानयामि
विश्वस्य मां नयनमीलनमाचरेति ।
स्वप्ने समागममनेन विबुध्य तन्व्या
निद्रावतीं प्रियसखी विदधे वियुक्ताम् ॥ १५ ॥
जाग्रत्प्रपञ्चविपरीतविधानदक्षे
देव्यद्य मे नयनयोः क्षणमात्रमास्व ।

काम्यार्थसिद्धिरियतैव ममेति निद्रा-
मन्तर्निगद्य विधुरा न च तल्पमाप ॥ १६ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये स्वप्नपद्धतिरष्टत्रिंशी ।

एकोनचत्वारिंशी पद्धतिः ।

संगत्य रात्रिविरतौ कथमप्यवाप्त-
निद्राप्रसादसुलभेन महेश्वरेण ।
स्वप्नोपभोगमवदन्प्रमदाः प्रमोदा-
त्सद्यो रहस्यभिमताय सखीजनाय ॥ १ ॥

स्वप्नो हरेण रतिमद्य विधातुमीष-
त्सक्तस्त्वयास्तकृपया प्रतिबोधिताहम् ।
सुप्तिं व्रजेयमधुनास्य समागमाय
भूयोऽपि नैव सखि मे प्रतिबोधिनी भूः ॥ २ ॥

आलिङ्गिताङ्गमभवं शशिभूषणेन
स्वप्ने मया तु स पुनर्न गले गृहीतः ।
व्रीडावशस्तिमितया सखि हन्त पापा-
न्नाज्ञासिषं किमिति सुप्तिविजृम्भितं तत् ॥ ३ ॥

स्वप्ने हरेण विहितेऽपि तथैव भोगे
नासीत्क्षतं वपुषि मे सखि हा हतास्मि ।
यन्नैव दष्टमधरं न रतिक्षतस्य
क्षेत्रं तदेवमुभयं फलहीनमेतत् ॥ ४ ॥

यः प्रस्थितो गतघृणः सखि चन्द्रमौलिः
स्वप्नागतः प्रथममेव मयोपगूढः ।

वीथीगतो यदि भवेत्त्रपयाभिभूता
तस्याग्रतो नहि यथैव पुरा भवेयम् ॥ ५ ॥
सुस्वप्नदर्शनफलं भवति प्रबोधे
पश्चादिति स्म कथयन्ति तदन्यथापि ।
स्वप्ने शिवस्य निशि वीक्षणमालि जातं
तस्योपगूहनविधिं तदसूत सद्यः ॥ ६ ॥
स्वप्ने हरेण परिभोगरसेप्सुना मे
वासो गृहीतमिदमेव तदा विबुद्धम् ।
सख्यावयोरुपरि यानि विचेष्टितानि
ज्ञाता परं विषमसायक एव तेषाम् ॥ ७ ॥
यन्मे हरेण सह संगमसौख्यहेतो-
र्नेत्रं निमीलनदशां स्वयमाससाद ।
सोढा स्वयं विपदमार्त्यपहारकृत्यं
नेत्रोपमस्य चरिते किमुत स्वदृष्टेः ॥ ८ ॥
स्वप्नोपलम्भनदशा मम सैव नित्यं
भूयात्प्रजागरदशा सखि मा कदापि (?) ।
यस्यामवापमचलेन्द्रसुतैकशेषं
वक्षः प्रजागरसुदुर्लभमीश्वरस्य ॥ ९ ॥
स्वप्ने शिवः सुदति संप्रति देहि भिक्षा-
मित्यूचिवानहमदामविलम्ब्य तस्मै ।
नैवाददे न च गतः स्मितमेव चक्रे
दत्ता मयास्य तु गले दृढमङ्कपाली ॥ १० ॥
यो वीक्षितोऽहनि शिवो निशि सुप्तिलब्ध-
शय्यागृहं मयिरिरंसुरिवाससाद ।

दृष्ट्वा तमाशु गलता वसनांशुकेन
　जारायितं चिरनितम्बनिषेविणा मे ॥ ११ ॥

आलम्ब्यमानवसना सकलेश्वरेण
　मुञ्चेत्यवोचमपतच्छिथिलोऽस्य हस्तः ।
स्वप्ने सखि क्षणत एव हतो भुजो मे
　जग्राह कण्ठमयमस्तदयस्तु तस्य ॥ १२ ॥

स्वप्ने हरेण सति निर्दयमारयुद्धे
　लुप्तो न चन्दनरसः कुचयोरयं मे ।
नैवाधरेऽपि दशनक्षतमीक्ष्यते य-
　ज्जाग्रद्रतादपि वरं सखि सुप्तिभोगः ॥ १३ ॥

आविस्मितेन गिरिशेन दृढाप्तलज्जा
　निद्रागमे सखि गृहीतकराहमासम् ।
आमूलकण्टकितपङ्कजनालकल्प-
　मद्यापि पश्य चरितार्थमिदं प्रकोष्ठम् ॥ १४ ॥

रत्युत्सवाय मम लम्बितमीश्वरेण
　वासो निशाविरतिसुप्तिसमागतेन ।
बोधेन तद्गलितमैक्ष्यत हन्त रन्तुं
　सोऽयं पुरा न खलु तिष्ठति चन्द्रमौलिः ॥ १५ ॥

निद्रैव जीवितसखी मम नैव सख्यो
　यूयं मृषाप्रणयडम्बरमाचरन्त्यः ।
या दुर्लभं गिरिसुतावरमद्य दूरा-
　दानीय मे शयनमध्यगतं चकार ॥ १६ ॥

निम्नीकृतस्तनयुगं विहितोपगूह-
स्वप्नागतेन यदहं परमेश्वरेण।
तेनैव हारगलिताः सखि पश्य मुक्ताः
सत्यं भवत्यनृतमेव कृतं शिवेन ॥ १७ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये स्वप्नोक्तिपद्धतिरेकोनचत्वारिंशी।

चत्वारिंशी पद्धतिः।

स्वप्ने मुहूर्तमनुभूय पिनाकपाणिं
निःशेषलुप्तविरहव्यसना युवत्यः।
तेनैव नित्यमपि सेवितयौवनाया
गौर्याः प्रशस्तिगिरमात्मगतां शशंसुः ॥ १ ॥
सा शैलराजतनया वनितासु वर्या
यालभ्य रूढिसुलभे विरहे हरेण।
पादोदकायितजला मुहुरेव यस्या-
स्तन्मौलिदिव्यतटिनी पदयोर्निपत्य ॥ २ ॥
सा पार्वती स्तनवती भुवने वृथान्याः
क्लेशावहा युवतयः स्तनमुद्वहन्त्यः।
यस्याः पयोधरयुगेन मनोजशत्रो-
र्वक्षःस्थलेऽपि विहिता रतिमर्दमुद्रा ॥ ३ ॥
सा राजते जगति शैलसुता वधूनां
या जायते हरगलग्रहणोत्सवेषु।
आनन्दनिर्भरतया मुकुलीकृताक्षी
मोहं गतेरखगरस्य महोष्मणैव ॥ ४ ॥

सैवोत्तमा जगति पर्वतराजपुत्री
　पीत्वा यदीयमधरामृतमिन्दुमौलिः ।
आत्मीयमप्रतिमृदुः सह कालकूट-
　क्ष्वेडोपतापमखिलं शमयांचकार ॥ ५ ॥

सा पार्वती विजयतां भुवनस्य माता
　स्थेमानमाजगतमङ्गलभूषणस्य ।
निश्चित्य या गतभया विदधेऽभ्यनुज्ञां
　भर्त्रा कृतस्य गरलाशनसाहसस्य ॥ ६ ॥

सौभाग्यजन्मवसतिः किल शैलकन्या-
　कामाभिभूत्युचितमस्य····संविधातुम् ।
कण्ठे मुहुर्मदनशत्रुमपेतशङ्का
　बध्नाति यानि भुजगद्वयशृङ्खलेन ॥ ७ ॥

सा राजते जगति पर्वतराजपुत्री
　संभोगकेलिकलहे बहुशः प्रवृत्ते ।
ईशस्य मौलिपरितः परिपूर्णचन्द्रो
　यूनां पुराश्रिकषणा कृशमेवमासीत् ॥ ८ ॥

सा पार्वती विजयतां जगदेकमाता
　यस्या विहारकलहे सुलभे हरेण ।
पादाम्बुजाश्रयणकाङ्क्षितयैव तस्य
　प्रागेव मौलिकुसुमान्मधुपाः श्रयन्ते ॥ ९ ॥

तप्तं तयैव हि तपो गिरिराजपुत्र्या
　यस्या पिपास····ममे परमेश्वरेण ।
हस्ता····हो न मनसैव कृतः कृतोऽभू-
　दभ्याधि(?)रोहणमिषाच्चरणावलम्बम् ॥ १० ॥

सा पार्वती जगति भाग्यवती वधूनां
या रुष्टपार्थदृढमुष्टिनिपातपीडाम् ।
सद्यो जहार गिरिशोरसि घट्टितेन
कामोष्मणेन(व) कुचपुट्टलिकद्वयेन ॥ ११ ॥

धन्या गिरीन्द्रतनया खलु यद्भवेन
संध्याप्रणामसमये स पिनाकपाणिः ।
एवं निमीलति सरोरुहमद्य पश्य
गौरीत्युदीर्य करमीलनमातनोति ॥ १२ ॥

सा नायिका विजयतां प्रणयेन रुष्टा
या साक्रनाय(?) विनतस्य पुरार्दनस्य ।
प्रद्योतिताम्भसि कपर्दसुरस्रवन्त्यां
बाष्पैरपूर्वसरितं पुनरातनोति ॥ १३ ॥

तां पार्वतीमनिशमेव सदा स्मरेव
संध्याप्रणामसमये परमेश्वरस्य ।
कोपेन यारुणतनुच्छविराजभूत्वं
निर्यात्पुनः परिणता स्वयमेव संध्या ॥ १४ ॥

सौभाग्यजन्मवसतेर्गिरिराजपुत्र्याः
कुर्मस्तयोश्चरणयोरसकृन्नमस्याम् ।
नित्यं ययोः स्वयमलक्तकसंनिधित्सो-
श्चेटीजनेन सुलभः कलहः शिवस्य ॥ १५ ॥

दाक्षायणीचिरसमीप्सितलाभहेतो-
र्विद्यासमस्तयुवतीस्पृहणीयवृत्ता ।

उन्मत्तवृत्तिरपि यत्सहचारसक्त्या
शंभुर्जगत्त्रयगरिष्ठकुसुम्बधुर्यः ॥ १६ ॥

नित्या हि सा भगवती गिरिराजकन्या
नम्रस्य केलिकलहेषु नवेन्दुमौलेः ।
मन्दाकिनीशिरसि या पदयावकेन
संध्यायमानसलिलामसकृत्करोति ॥ १७ ॥

सा पार्वती जगति विभ्रमजन्मभूमि-
र्या याचते स्म गिरिशं(?) सुरसंघमध्ये ।
यन्मे व्यलीकमभवन्मदनाङ्गदाहा-
त्तत्क्षम्यतामिति करग्रहणच्छलेन ॥ १८ ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटनकाव्ये गौरीप्रशंसापद्धतिश्चत्वारिंशी ।

समाप्तमिदं काव्यम् ।

काव्यमालायां प्रसिद्धा ग्रंथाः ।

		कि. रु.	आ.	ट. रु.	आ.
१	आर्यासप्तशती—[illegible] ...	१	८	०	४
२	काव्यालंकार—रुद्रटकृत [illegible]	[illegible]	[illegible]	०	४
३	श्रीकण्ठचरित—श्रीमङ्खकविकृत. ...	२	८	०	६
४	कर्पूरमञ्जरीसट्टक—राजशेखरकृत.	१	०	०	४
५	अनर्घराघव नाटक—मुरारिकृत.	२	०	०	४
६	कंसवधनाटक—[illegible]श्रीशेषकृष्णकृत. ...	०	८	०	२
७	कर्णसुन्दरीनाटिका—महाकविश्रीबिल्हणकृत. ...	०	८	०	४
८	धर्मशर्माभ्युदयकाव्य—महाकविश्रीहरिचन्द्रविरचित.	१	०	०	२
९	सुभद्राहरण श्रीगदित—श्रीमाधवभट्टप्रणीत.	०	४	०	१
१०	समयमातृकाकाव्य—क्षेमेन्द्रविरचित. ...	०	१०	०	२
११	कादम्बरीकथासारकाव्य—[illegible]	०	१०	०	८
१२	रसगङ्गाधर—महाकविश्रीजग[illegible]	[illegible]	[illegible]	०	१
१३	साम्बपञ्चाशिका[illegible]त.	[illegible]	४	०	२
१४	पारिजातहरणचम्पू—शेषकृष्णविरचित. ...	०	[illegible]	०	३
१५	काव्यालंकारसूत्राणि—वामनविरचित. ...	०	१२	०	४
१६	मुकुन्दानन्दभाण—श्रीकाशीपतिविरचित. ...	०	८	०	२
१७	उन्मत्तराघवप्रेक्षाणक—भास्करकविविरचित.	०	३	०	१
१८	अमरुशतक[illegible]कविविरचित	०	१२	०	४
१९	सूर्यशतक—मयूरकविविरचित.	०	[illegible]	०	१
२०	लटकमेलकप्रहसन—शंखधरविरचित. ...	०	५	०	१
२१	गाथासप्तशती—[illegible]ोपनामकसातवाहनसंकलित.	३	०	०	१२
२४	काव्यप्रदीप—महामहो[illegible]ध्यायश्रीगोविन्दविरचित.	[illegible]	०	०	६
२५	ध्वन्यालोक—[illegible]नन्दवर्धनाचार्यवि[illegible]त. ...	[illegible]	०	०	४
२६	दशावतारचरितकाव्य—[illegible]न्द्रविरचित.	१	०	०	४

पांडुरंग जावजी,
निर्णयसागरमुद्रणालयाध्यक्षाः,
२६–२८, कोलभाट स्ट्रीट, मुंबई नं० २.